आलिंग्य मूर्ध्न्यवघ्राय ददावाशिषमुत्तमाम्. ॥ ४८
वि **ज** नं **दं**डकारण्यं प्रस्थितो **राघवो**ऽब्रवीत्, ।
'गमिष्यामि वनं मातर्मामनुज्ञातुमर्हसि. ॥ ४९
प्र **य** च्छति महाराजो **भ**रताय वसुंधराम्[8], ।
मां पुनर्**दं**डकारण्यं विवासयति[9] तापसम्[10]. ॥ ५०
ची **रा** जिनधरो मातश्चतुर्दश समा वने ।
वन्येन वृत्तिं[11] कर्ताहं **कै**केय्याः प्रियकारणात्.' ॥ ५१
सा **म** हत्यप्रिये वाक्ये श्रुते राज्यतिवत्सला ।
सहसा महसा[12] त्यक्ता पपात[13] भुवि मूर्च्छिता. ॥ ५२
तां **श्री** मान्मातरं **राम**: क्षिप्रमुत्थाप्य विव्हलाम् ।
सांत्वयामास **सौ**मित्रिमपि तातवधोद्यतम्. ॥ ५३

---

१. शुश्रूषस्व (सेवा कर) हें सन्नन्त धातूचें उदाहरण. हा धातु 'श्रु' या मूळ धातूपासून सिद्ध झाला. खरोखर या धातूचा अर्थ 'वारंवार तो जें सांगेल तें ऐकण्याची इच्छा ठेव' असा आहे. पुढें त्याचा अर्थ 'सेवा कर' असा झाला तो ठीकच आहे. २.चरमं वयः=म्हातारपण, आयुष्याचीं शेवटलीं वर्षें. ३.अपथि=अमार्गे. 'पथो विभाषा' या नियमानें वैकल्पिक समासान्त होतो, म्हणून समासान्त झाला नाहीं, दुसरें रूप 'अपथे' असें होईल. 'अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः' इति रघुः. ४. स० १९ श्लो० २७ पहा. ५. स्त्रैण=स्त्रीवश, स्त्रीविधेय. ६. स०१९ श्लो०३८ पहा. ७. तुमन्तापुढें 'काम' किंवा 'मनस्' शब्द आला तर तुमन्ताच्या 'म्'चा समस्तपद करण्याचे वेळीं लोप होतो. ८. वसूनि (धनानि) धारयति इति पृथ्वी, वसुमती वसु+धृ+खच् खित्वात् मुमागमः. ९. स० २० श्लो० ३० पहा. १०. तापसम्=गरीबाला, दीनाला, अनाथाला. ११. वृत्तिं=उपजीविकाम्. १२. 'महस्'शब्द सान्त नपुंसक आहे. त्याचा अर्थ उत्सव, आनंद असा होतो. १३. स० २० श्लो० ३२ पहा.

'प **रा** क्रमस्य वत्सायं न कालः पितुराज्ञया ।
गमिष्यामि वनं, श्रेयः पुत्रस्यैकं गुरोर्वचः' ॥ ५४
'रा **म** ! माम[1]हिताचारा **कै**केयी दुर्वचः सदा ।
श्रावयिष्यति तन्नाहं सोढुं शक्ता कथंचन. ॥ ५५
व्र **ज** तस्तव मां त्यक्त्वा नैष्ठुर्यं [2]भविता परम् ।
वत्स! त्वया विना नाहं जीविष्यामि प्रसीद मे ॥ ५६
न **य** मामपि धर्मज्ञ! यशस्ते भवितानघ !' ।
[3]इत्यादि करुणं श्रुत्वा **रा**मो मातरमब्रवीत्, ॥ ५७
'त्वं **रा**[4]ज्ञि! राज्ञि **कै**केय्या हृदि [5]दुर्वागिषुक्षते ।
मया च रहिते वृद्धे न प्रेम शिथिलीकुरु. ॥ ५८
प्र **म** दानां कुलीनानां [6]पत्युर्नान्या [7]गतिर्हिता.' ।
एवमुक्त्वासकृ**द्रा**मो नत्वा पादौ विनिर्गतः. ॥ ५९
स **ज** गामाथ नि[9]लयं **सी**ताया रघुसत्तमः ।
कृतस्वस्त्ययनो मात्रा तां च कृत्वा [10]प्रदक्षिणम् ॥ ६०
'प्रि **य** सत्तम! [11]नो छत्रं न [12]बालव्यजने सिते ।
कुतः [13]स्तुतस्त्वं नासी'ति कांतं पप्रच्छ **जा**नकी. ॥ ६१
'[14]रा **ज** पुत्रि ! महावंशप्रभवे ! ! [15]धर्मचारिणि ! ।

---

१. अहिताचारा=जिचा आचार हितकारक नाहीं ती. २. भविता=होईल भू+लुट् तृ. ३. इति (पूर्वोक्तम्) आदौ यस्य तत् इत्यादि. करुणं=करुणं वचनम्=करुणा उत्पन्न करणारे शब्द. 'विशेषणादेव विशेष्यावगतिः' या नियमानें वचन किंवा तत्समानार्थक विशेष्य आपणाला अध्याहृत कल्पितां येतें. ४.पहिला 'राज्ञि' शब्द 'राज्ञी' या स्त्रीलिङ्ग शब्दाचें संबोधन आहे. दुसरा, 'राजन्' या शब्दाचें सप्तम्येकवचन. ५. दुष्टा वाक् दुर्वाक् सा एव इषुः तेन हृदि क्षते. हें 'रूपक' समासाचें उदाहरण होय. ६. हें भाषण २४ व्या सर्गाचें सारभूत आहे. ७. आश्रयस्थानम्, प्राप्यस्य वस्तुनः प्राप्तिमार्गः. ८. अनेक वेळां. ९. महाल. १०. स० २५ श्लो० ४३-४५ पहा. ११. नो=न. १२. दोहों बाजूकडील पांढऱ्या चमरी नांवाच्या मृगविशेषाच्या पुच्छाच्या केलेल्या चवऱ्या. 'चामर' यापासून 'चवर' व 'चमरी' यापासून 'चवरी' असे शब्द झाले आहेत. १३. स्तुत=बंदिजनांनीं स्तुत. १४. राजपुत्रि इत्यादि संबोधन पदें अत्यंत अप्रिय गोष्ट ऐकून मोह न प्राप्त व्हावा याकरितां घातलीं आहेत. व शेवटील संबोधन पदांत पुढें उत्तर कोणत्या धोरणाचें असावें हेंही रामानें सुचविलें आहे. पतिपुत्राच्या वियोगामुळें चित्त कसें होरपळतें हें जाणण्याची ज्यांची इच्छा आहे त्यांनीं अवश्य खालीं दिलेलीं कांहीं पद्यें वाचावीं:—'यदि पुत्र न जायेथा मम शोकाय राघव । ना स्म दुःखमतो भूयः पश्येयमहमप्रजाः ॥ एक एव हि वन्ध्याया शोको भवति मानसः ।

श्रृणु [1]तत्रभवांस्तातः प्रव्राजयति मां वने. ॥ ६२
प्रि **य** या खलु **कै**केय्या पुरा दत्तौ वरौ प्रभुः ।
याचितस्तत्र चैकेन **भ**रतस्याभिषेचनम् ॥ ६३
ची **रा** जिनभृतोऽन्येन मम प्रव्राजनं वने ।
चतुर्दश हि वर्षाणि वस्तव्यं **दं**डके मया ॥ ६४
प्र **म** दे! काननं याते मयि तापससेविते ।
[2]व्रतोपवासपरया भवितव्यं त्वयानघे! ॥ ६५
स **श्री** मान्[3]कल्य उत्थाय पिता मम जनेश्वरः ।
वंदितव्यस्त्वया [4]माता **कौ**सल्या चान्यमातरः ॥ ६६
तौ **रा** जपुत्रौ **भ**रतशत्रुघ्नौ मम सुप्रियौ ।
[5]भ्रातृपुत्रसमौ देवि! द्रष्टव्यौ प्रीतये मम. ॥ ६७
न **[6]म** नागपि कर्तव्यं विप्रियं **भ**रतस्य ते, ।
स हि राजा च **वै**देहि! देशस्य च कुलस्य च.' ॥ ६८
सा **[7]ज** गत्यात्मजा क्रुद्धा प्रणयादिदमब्रवीत्, ।
'[8]आर्यपुत्र! पिता माता भ्राता पुत्रस्तथा स्नुषा ॥ ६९
नि **य** मादुपजीवंति [9]स्वं स्वं भाग्यं न चेतरत्. ।
भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ! ॥ ७०

अप्रजास्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥ न दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे । अपि पुत्रे विपश्येयमिति रामास्थितं मया ॥ यथैव राजा पूज्यस्ते गौरवेण तथा ह्यहम् । त्वां साहं नानुजानामि न गंतव्यमितो वनम् ॥ तां तथा रुदतीं रामोऽरुदन्वचनमब्रवीत् । जीवंत्या हि स्त्रिया भर्ता दैवतं प्रभुरेव च ॥ भवत्या मम चैवाद्य राजा प्रभवति प्रभुः । अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ॥ शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता । एष धर्मः स्त्रिया नित्यो वेदे लोके श्रुतः स्मृतः ॥ आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा । स्वानि पुण्यानि भुंजानाः स्वं स्वं भाग्यमुपासते ॥ भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ । अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ॥ न पिता नात्मजो वात्मा न माता न सखीजनः । इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥ राजपुत्रि इत्यादि विशिष्ट पदें येथें हेतुगर्भ आहेत. धर्मचारिणि=सहधर्मिणि.

१. तत्रभवान्=पूज्यः । अत्रभवत् व तत्रभवत् ह्यांचा 'पूज्य' या अर्थी उपयोग करितात. मात्र अत्रभवत् शब्द ज्याचे संबंधानें योजावयाचा तो पूज्यपुरुष समोर असतांना त्याचा प्रयोग करितात, आणि तत्रभवत् त्याचे पश्चात् लावतात. २. व्रतें व तन्निमित्तक उपवास वगैरे करण्यांत त्वां आपला काळ घालवावा. ३. कलासु साधु यत् कल्यं तस्मिन् कल्ये प्रभाते=उषसि. ४. सर्ग २६ श्लो० ३०-३४ पहा. ५. भ्रात्रा पुत्रेण च समौ. ६. मनाक्=थोडें, किंचित्. ७. जगती+आत्मजा=भूमिबाला. ८. आर्यस्य श्वशुरस्य पुत्रः तत्संबुद्धौ आर्यपुत्र इति. ९. पिता माता भ्राता पुत्र हे आपा-

वी **रा** तश्चाहमादिष्टा गुरुभिस्त्वमिव ध्रुवम्, ।
न पिता नात्मजो माता स्त्रीणामेका पतिर्गतिः ॥ ७१

त्व **म** द्यैव वनं दुर्गं[1] प्रस्थितो यदि **रा**घव! ।
अग्रतस्ते गमिष्यामि मृद्नंती कुशकंटकान्.' ॥ ७२

'ग **ज** गामिनि! मा मैवं वद, दुःखतरं वनम्.' ।
इत्युवाचासकृद्रामो न नेतुमकरोन्मनः ॥ ७३

'न **य** मां वीर! विश्रब्धां पापं मयि न विद्यते, ।
यदि नेच्छसि मां नेतुं मरिष्यामि, त्वया विना.' ॥ ७४

रा **ज** कन्येति शोकार्ता विलप्य करुणं बहु, ।
पतिमालिंग्य बाहुभ्यां कंठे चुक्रोश सस्वरम्. ॥ ७५

'आ **य** ताक्षि! प्रिये!ऽहं त्वां सह नेष्यामि सर्वथा ।
त्वं हातुं न मया शक्या प्रीतिरात्मवता यथा. ॥ ७६

'वं **रा** रोहे!ऽद्य सर्वस्वं क्षिप्रं ब्राह्मणसात्कुरु.' ।
इत्युक्ता जानकी पत्या कृतवत्यखिलं तथा. ॥ ७७

प्र **म** थाधिपतेः साक्षाद्धनेश इव भक्तिमान् ।
रामस्य चरणौ गाढं निपीड्योवाच लक्ष्मणः ॥ ७८

पत्न्या कर्मफलांचा उपभोग घेतात, कारण त्यांचा सहाधिकार नाहीं. पत्नीलाच काय तो नवऱ्याबरोबर धर्मकृत्यें करण्याचा अधिकार आहे व ती नवऱ्याच्या कर्मफलाची वांटेकरीण होऊं शकते, म्हणून सीता रामाला म्हणूं लागली कीं, 'तुम्हांला ज्या अर्थीं वनवासाची आज्ञा केली त्या अर्थीं मला देखील सर्व कर्मांचे संबंधानें सहाधिकार असल्यामुळें आज्ञा केलीच आहे. मला देखील गुरुजनांचा आदेश अनुल्लंघ्य आहे.' [स० २७ श्लो० ४ टीका.]

१. दुर्गम्=दुर्गमम्, दुःखेन गम्यते अत्र. २. सर्ग २७ श्लो० ४-७ पहा. ३. पायीं पुढें चालून कुशकंटकांना चिरडून टाकीन व मग आपणांला मागून येतांना त्रास होणार नाहीं—असा सीतेच्या बोलण्याचा भावार्थ. [स० २७ श्लो० ७ टीका.] ४. स० २८ श्लो० १-१५ पहा. ५. त्याग-प्रयोजकं पापम्. ६. स० २९ श्लो० २१-२२ पहा. ७. स० ३० श्लो० २२ पहा. ८. आयते दीर्घे अक्षिणी यस्याः सा आयताक्षी दीर्घलोचना, तत्संबुद्धौ आयताक्षि । 'सक्थ्यक्ष्णोः स्वाङ्गे' षित्वात् ङीप्. ९. स० ३० श्लो० २९ पहा. १०. वरौ आरोहौ यस्याः सा, तत्संबुद्धौ वरारोहे! नितंबवति. ११. सर्व+स्वम्=सर्वधनम्. १२. ब्राह्मणेभ्यो देयं कुरु=ब्राह्मणेभ्यः देहि । 'देये त्रा च' या नियमानें 'सात्' किंवा 'त्रा' प्रत्यय 'देय' या अर्थी लागून रूप सिद्ध झालें आहे. १३. प्रमथ+अधिपतिः=शिवः. १४. धनेश=धनद=कुबेर. १५. स० ३१ श्लो० २ पहा.

'भोः **श्री** मन् [1]रामभद्रार्य ! [2]स्वानुगं नय मामपि'. ।
इत्युक्तवंतं **सौ**मित्रिं **कौ**[3]सल्येयोऽब्रवीदिदम्. ॥ ७९

'[4]धी **रा**[5]र्यव्रत ! वत्स ! त्वं मम [6]प्राणसमः [7]सखा ।
कौसल्यां च **सु**मित्रां च वद कोऽत्र भरिष्यति ?' ॥ ८०

त **म**यं प्राह, '**कौ**सल्यां **सु**मित्रां **भ**रतः स्वयम् ।
तवैव तेजसा **रा**म ! पूजयिष्यत्यसंशयम् ॥ ८१

ते **ज**सा तं वधिष्यामि नो चेदत्र न संशयः ।
[8]**कौ**सल्या बिभृयादार्या सहस्रं मद्विधानपि. ॥ ८२

[9]नै **य**ज्ञा [10]स्वस्य मातुश्च मम सा भरणक्षमा, ।
यस्याः सहस्रं [11]ग्रामाणां संप्राप्त[12]मुपजीविभिः ॥ ८३

[13]शै **रा**सनं समादाय [14]खनित्रपिटकाधरः ।
[15]अग्रतस्ते गमिष्यामि पंथानं त्वां प्रदर्शयन् ॥ ८४

श्र **म** आर्य ! न मेऽरण्ये भविता दयया तव. ।
[16]कृत्यं सर्वं करिष्यामि जाग्रतः [17]स्वपतश्च ते.' ॥ ८५

---

१. रामः एव भद्रः मङ्गलदायकत्वात्. तत्संबुद्धौ रामभद्र, आर्य=कर्तव्यमाचरन् कामम् अकर्तव्यमनाचरन्. २. स्व+अनुग=स्वानुचर. ३. कौसल्यायाः अपत्यं पुमान् कौसल्येयः. ४. धीर=स्थिरचित्तोन्नतियुक्त । 'विकारहेतौ सति विक्रियंते येषां न चेतांसि त एव धीराः.' [कालिदास—कुमारसंभव.] ५. 'आर्यव्रत' हा पाठ मनोरम नाहीं. त्याचे जागीं 'आर्यवृत्त' हा पाठ बरा होईल. पूज्य किंवा श्रेष्ठ आचार ज्याचा आहे तो 'आर्यवृत्त.' ६. स० ३१ श्लो० १० पहा. ७. सह समानं ख्यायते इति सखा. सखा हें सखि शब्दाचें प्रथमैकवचन. या शब्दाचें स्त्रीलिङ्गरूप 'सखी' असें होतें. ज्या अर्थी तूं प्राणसम आहेस, सखा आहेस त्याअर्थी तुझे विचार माझ्य विचारासारखेच असले पाहिजेत असें प्राणसम, सखा इत्यादि शब्दांनीं ध्वनित केलें आहे. ८. स० ३१ श्लो० १९-२७ पहा. ९. नयं जानाति या सा नयज्ञा. १०. आत्मनः (भरणक्षमा). ११. जीपासून उपजीविका इच्छिणाऱ्या जनांस सहस्र गांव प्राप्त झाले आहेत. १२. उपजीविभिः=सेवकैः. १३. शराः अस्यन्ते अनेन इति शरासनं धनुः. १४. खन्यते अनेन इति खनित्रं=कुदळ, 'खन्तर' पिटका=फलमूलाद्याहरणयोग्या वंशपेटी. खनित्रं च पिटका च खनित्रपिटके ते धारयति यः सः. धनुष्य श्वापदांपासून रक्षण करण्याकरितां, खनित्र—कंदमूळें खणण्याकरितां, व पिटका (दुर्डी)—कंदमूळफळें ठेवण्याकरितां, अशी योजना समजावी. १५. स० ३१ श्लो० २५ पहा. १६. जें जें कांहीं करणें योग्य आहे तें तें. येथें 'अहम्' असाही पाठ आहे. १७. 'स्वपतः ते' या शब्दांवरून स्वतः मी रात्रीं निजणार नाहीं असें लक्ष्मणानें ध्वनित केलें.

'व्र **ज** वत्साशु पृच्छ[1] त्वं सर्वमेव सुहृज्जनम् ।
ये च राज्ञे ददौ दिव्ये महात्मा **व**[2]रुणः स्वयम् ॥ ८६
सा[3] **य** कासनरत्ने च खड्गाव[4]क्षयसायकौ ।
तूणावाचार्यगेहस्थमानयैतद्ध[5]नं वरम्.' ॥ ८७
स **ज** ग्राह[6]ायुधं सर्वं गुरुमागत्य **ल**क्ष्मणः ।
श्री**रा**मं दर्शयामास पुनस्तं **रा**घवोऽब्रवीत् ॥ ८८
'स्व **य** मद्य धनं यन्मे त्वया सह प[7]रंतप ! ।
द्विजेभ्यो दातुमिच्छामि **ल**क्ष्मणानुमतेन ते ॥ ८९
ध[8] **रा** सुरवरं वत्स ! **सु**[9]यज्ञं गुरुनंदनम् ।
त्वमानयान्यांश्चाश्वत्र सर्वान्वत्सोपजीविनः'. ॥ ९०
तं **म** हर्षिसुतं गत्वा **सौ**मित्रिः प्राह, 'मंदि[10]रम् ।
सखे ! **सु**यज्ञ ! **रा**मस्य पश्य दु[11]ष्करकारिणः ॥ ९१
स[12] **श्री** मत्सदनं प्राप्तः शीघ्रं **सौ**मित्रिणा सह ।
तं नत्वा पूजयामास स[13]सीतो ल[14]क्ष्मणाग्रजः ॥ ९२

---

१. आपृच्छस्व. २. जनकाच्या महायज्ञांत संतुष्ट होऊन वरुणानें जनकाला दोन धनुष्यें दिलीं. तीं त्यानें रामलक्ष्मणास कवचें, भाले, खड्गें इत्यादि आयुधें आंदण म्हणून अर्पण केलीं. पुढें तीं आयुधें त्यांनीं आचार्यगृहीं ठेविलीं होतीं. तीं घेऊन ये असें राम लक्ष्मणाला सूचवीत आहे. [स० ३१ श्लो० २९-३१.] ३. धनूरत्नें. 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते.' ४. ज्यांतील बाण कधींच संपत नाहींत असे भाते. अक्षयाः सायका ययोस्तौ तूणौ. ५. धन, अर्थात् वीराचें धन, द्रव्य=धनुः, खड्ग, भाते इत्यादि. ६. आयुधम्=आयुधानि जातावेकवचनम्. ७. परान् शत्रून् तापयति इति । खच् प्रत्ययः । खित्वात् मुमागमः. ८. भूदेवश्रेष्ठम् । त्वम् आनय अन्यान् च आशु अत्र. ९. सुयज्ञ हा वसिष्ठपुत्र. [स० ३१ श्लो० ३७.] १०. वेश्म. [स० ३२ श्लो० २.] ११. 'हे सखे रामस्य वेश्म आगच्छ दुष्करकारिणो रामस्य प्राप्तराज्यत्यागपूर्वं वनं जिगमिषोः कृत्यं च पश्य इति शेषः' इति तिलके. दुष्करं करोति इति दुष्करकारी तस्य दुष्करकारिणः. **१२.** सः=पूर्वोक्तः सुयज्ञनामा गुरुपुत्रः । 'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दोपादानं नापेक्षते' इति मम्मटः । प्रक्रम (आरंभ), प्रसिद्धि, किंवा अनुभवविषयक 'तत्'शब्दाचा प्रयोग वाक्यांत 'यत्'शब्दाशिवाय होऊं शकतो यद्यपि 'यत्तदोर्नित्योऽभिसंबन्धः' असा नियम आहे (लोके नहि **स** विद्येत **यो** न राममनुव्रतः). याचीं क्रमानें उदाहरणें खालीं दिलीं आहेत:—(१) रामो दिलीपवंश्यो राजा आसीत् । **स** जनापवादात् भीतः स्वप्रियां तत्याज । (२) **सो**ऽहं पश्यामि वक्तव्यं त्वयि धर्मभृतां वर । पुत्रत्वं बालतां चैव तवावेक्ष्य च साहसम् ॥ (३) **तं** केशपाशं प्रसमीक्ष्य कुर्युर्बालप्रियत्वं शिथिलं चमर्यः ॥ [कालिदास—रघुवंश.] १३. सीतया सहवर्तमानः. १४. अग्रे जातः अग्रजः पूर्वज, वडील भाऊ. धाकट्या भावाला 'अवरज' म्हणतात.

हा **रा** दिभिरलंकारै [1]रामस्तं प्रत्यपूजयत् ।
तत्पत्न्यै[2] प्रददौ **सी**ता [3]स्वभूषाः [4]शीलभूषणा. ॥ ९३

स **म** स्तमन्यद्विप्रेभ्यो[5] धनं **रा**मः सलक्ष्मणः ।
प्रददावुपजीविभ्यः **सी**तापि प्रीतमानसा. ॥ ९४

तौ **ज** ग्मतुरथो[6] द्रष्टुं पितरं **सी**तया सह, ।
पद्भ्यामेव [7]महासत्वौ सुमुखौ **रा**मलक्ष्मणौ. ॥ ९५

[8]वं **य** स्यपौरप्रमुखो जनः सर्वोऽपि **रा**घवौ ।
जानकीं च तथा दृष्ट्वा बभूवातीव विव्हलः. ॥ ९६

न **रा** नार्योऽपि राजानं **कै**केयीं भृशदुःखिताः ।
गर्हयामासुरत्यंतं श्री[9]रामस्तवनादृताः. ॥ ९७

'स **म** र्थं पालनेऽस्माकं **रा**मं [10]राजीवलोचनम् ।
गच्छंतमनुगच्छामो वयमि'त्यब्रुवन् जनाः. ॥ ९८

स **ज** नन्या गृहं गत्वा दृष्ट्वा पितरमाकुलम् ।
सुमंत्रं **रा**घवः प्राह 'पितु[11]राख्याहि [12]मामि'ति. ॥ ९९

न **य** ज्ञः स **सु**मंत्रस्तं संबोध्य प्राह भूपतिम्, ।
'द्वारि तिष्ठत्ययं **रा**मस्त्वामिदानीं दिदृक्षते. ॥ १००

त्वां **ज** नेश्वरमायातः प्रष्टुं पृष्ट्वा सुहृज्जनम् ।
वनं गंतुं सुतः सिद्धस्तव सत्यपराक्रमः.' ॥ १०१

तं **य** ता दब्रवीद्राजा, '**सु**मंत्र! शृणु मे वचः ।
दारैः परिवृतः सर्वैर्द्रष्टुमिच्छामि **रा**घवम्.' ॥ १०२

---

१. रामानें सुयज्ञाला अनेकविध अलंकार देऊन 'शत्रुंजय' नामक हत्ती दिला. हा हत्ती रामाला त्याच्या मामानें दिला होता. [स० ३२ श्लो० १०.] २. सुयज्ञपत्नी ही सीतेची प्रियसखी होती म्हणून सीतेनें तिला हार, गोफ, बाजुबंद, कमरपट्टा इत्यादि अलंकार दिले. [स० ३२ श्लो० ७९.] ३. भूषाः=भूषणानि. 'भूषा'शब्द स्त्रीलिङ्ग आहे. ४. शील (सुस्वभाव) हेंच जीचें भूषण आहे ती शीलभूषणा । 'शीलं परं भूषणम्' इति भर्तृहरिशतके. ५. याच प्रसंगीं त्रिजट नामक ब्राह्मणाला रामानें विपुल गोधन देऊन संतुष्ट केलें. [सर्ग ३२.] ६. अथो=अथ । अनंतरम् ।. ७. महत् सत्वं बलं ययोस्तौ. ८. वयसा तुल्यः वयस्यः समानवयस्कः=Coeval. ९. श्रीराम+स्तवन+आदृत+प्र० ब०=श्रीरामाचे स्तवनाचा आदर किंवा प्रेम ज्यांचे अंतःकरणांत आहे ते. १०. राजीव+लोचन=कमलाक्ष. ११. 'पितुः' इत्यत्र संबंधविवक्षया षष्ठी. १२. स० ३४ श्लो० १ पहा.

दा **रा** स्ते तत्र भूभर्तु[1]राज्ञायाज्ञां **सु**मंत्रतः ।
कौसल्यां परिवार्यार्ता आजग्मु[2]स्ताम्रलोचनाः. ॥ १०३

सं[3] **म** हिष्या तया सार्धत्रि[4]शत्या योषितां वृतः ।
उवाच राजा तं सूतं, '**सु**मंत्रानय मे सुतम्.' ॥ १०४

तं **श्री** मंतं सुतं दृष्ट्वा सूतानीतं महीपतिः ।
[5]उत्पपातासनात्तूर्णमार्तः [6]स्त्रीजनसंवृतः. ॥ १०५

[7]आ **रा** दालिंगनं कर्तुमभिदुद्राव वेगतः ।
[8]तम[9]संप्राप्य दुःखार्तः पपात भुवि मूर्च्छितः ॥ १०६

[10]तं **म** सा व्याकुलं **रा**मोऽभ्यपतत्तं सलक्ष्मणः ।
[11]स्त्रीसहस्रनिनादोभू'द्धाहा **रा**मे'ति वेश्मनि. ॥ १०७

रा **ज** श्रेष्ठं परिष्वज्य भुजाभ्यां **रा**मलक्ष्मणौ ।
सीता च निन्युः पर्यंके रुदंतस्तं शनै[12]स्त्रयः. ॥ १०८

श **य** ने [13]लब्धसंज्ञं तं **रा**मः प्रोवाच सांजलिः ।
'[14]आपृच्छे त्वां महाराज! पश्य त्वं कुशलेन माम्. ॥ १०९

---

१. आज्ञाय=जाणून. सुमंत्रद्वारा राजाची आज्ञा किंवा शासन जाणून. २. रामप्रयाणश्रवणानें रडून रडून ज्यांचे नेत्र आरक्त झाले होते अशा राजस्त्रिया. ३. महिष्या सहिता समहिषी तया । अर्धसहिता सार्धा । तद्विधा त्रिशती. पट्टमहिषी कौसल्येबरोबर असलेल्या साडेतीनशें राण्यांनीं वेष्टिलेला राजा दशरथ. [स० ३४ श्लो० १३.] दशरथाला साडेतीनशें बायका होत्या असें स्पष्ट आहे. [स० ३९ श्लो० ३६.] ४. 'त्रिशतस्त्रीभिरावृतः' इति वा पाठः. ५. उठला. ६. स० ३४ श्लो० १६ पहा. ७. आरात्=दूरतः दुरूनच, वेगानें पुढें धांवला, परंतु दुःखावेगानें मोह पावून मध्येंच पडला. ८. तम् ज्याच्या आलिंगनाची इच्छा केली होती त्याच्याजवळ. ९. असंप्राप्य=न पोहोंचून. १०. तमः शोकः तेन. ११. स० ३४ श्लो० १९ पहा. १२. पुंलिंगाचें प्रथमेच्या अनेकवचनाचें 'त्रि'शब्दाचें रूप. हें 'स्त्रिया पुमान् तल्लक्षणश्चेद्विशेषः' या नियमानें झालेलें 'एकशेषा'चें उदाहरण. ज्यांचीं स्त्रीलिंग व पुंलिंग रूपें एकाच मूळ शब्दापासून होतात असे शब्द एकत्र आले असतां पुंलिंग शब्दाचाच सर्वांबद्दल उपयोग करितात. जसें:—हंसी च हंसश्च हंसौ, वृद्धा च वृद्धश्च वृद्धौ; त्याप्रमाणेंच एकश्च एकश्च एका च त्रयः.' १३. लब्धा संज्ञा चेतना येन सः. वाल्मीकिरामायणांत किंवा **मो**रोपंताच्या रामायणांत कैकेयीच्या वर मागण्यांत चतुरता दिसत नाहीं. मुरारिकवीनें या प्रसंगीं कुशलता दाखविली:—'अस्त्वेकेन वरेण वत्स भरतो भोक्ताधिराज्यश्रियः यात्वन्येन विहाय कालहरणं रामो वनं दंडकाम्. १४. स० ३४ श्लो० २३-२४ पहा.

मां **रा** जन्नि[1]यमन्वेतु **जा**नकी भवदाज्ञया, ।
लक्ष्मणं चानुजानीहि वार्यमाणौ न चेच्छतः.' ॥ ११०

स **म** हीश उवाचैनं, '**कै**केय्या वरदानतः ।
[2]मोहितं मां नि[3]गृह्य त्वं भव **राम**! भुवः पतिः.' ॥ १११

प्रां **ज** लिस्तमुवाचासौ **राम**ः सत्यपराक्रमः ।
'भवान् वर्षसहस्राय [4]महाराज! धरापतिः ॥ ११२

प्रि[5] **य** कृद्दंडकारण्यं, राज्यं नाद्य, मुदे मम. ।
तव पादौ ग्रहीष्यामि [6]प्रतिज्ञान्ते पुनः पितः!' ॥ ११३

'र **ज** नीं त्वमि[7]मामेकां पुत्र! मा गच्छ सर्वथा ।
त्वया सहाहं भो[8]क्ष्यामि' दीनो राजाब्रवीदिति. ॥ ११४

'प्रि **य** वत्सैतदा[9]श्चर्यं नैव ज्येष्ठः सुतो मम ।
[10]अपानृतकथं यत्त्वं तातं मां कर्तुमि[11]च्छसि.' ॥ ११५

तं **रा** मः प्राह, 'ये मेऽद्य[12] न गुणाः श्वस्तु ते पितः! ।
वृणे गमनमेवातः सर्वकामास्तिरत्र मे. ॥ ११६

---

१. 'तस्यां चीरधरश्चतुर्दशसमास्तिष्ठत्वसौ तं पुनः सीतालक्ष्मणमात्रकात् परिजनादन्यो न चानुव्रजेत्. ' २. निरुत्तरतया शोकपरवशो जातः. ३. बद्ध्वा अयोध्यायां त्वमेव स्वभुजवैभवेन राजा भव. [स० ३४ श्लो० २६.] ४. आपण अद्यापि बहुत वर्षें राज्य करावें, आपण अनेक कालपर्यंत राज्य चालवावें, असें न केलें तर आपलें वरदान असत्य होऊन आपणावर नरकपातप्रसंग गुदरेल—असा भाव. ५. 'प्रियकृत्' हें हेतुगर्भविशेषण आहे. वनगमनाज्ञा रामाला प्रियच होती. 'हे प्रियकृत्! अद्य दंडकारण्यं मम मुदे (भवति) न राज्यम्' असा अन्वय. ६. प्रतिज्ञासमाप्तौ. ७. स० ३४ श्लो० ३३ पहा. ८. भोक्ष्यामि=भोक्ष्ये=भोजन करीन, वस्तूंचा उपभोग घेईन. 'भोक्ष्यामि' हा प्रयोग अशुद्ध दिसतो, कारण 'भुजोऽनवने आत्मनेपदम् ' या सूत्रानें आत्मनेपद पाहिजे. 'पालन' अर्थ असेल तर हा धातु परस्मैपदी होतो, अन्यथा होत नाहीं. 'एकाहं दर्शनेनापि साधु तावच्चराम्यहम्' असें वाल्मीकिरामायणांत आहे. [स० ३४ श्लोक ३३.] ९. 'त्वम् माम् अपानृतकथम् कर्तुम् इच्छसि इति यत् आश्चर्यं नैव यतो ज्येष्ठो (गुणैः वयसा च) सुतोऽसि त्वम्.' दशरथराजाचा भाव हाच कीं ज्येष्ठ पुत्रानें पित्याला सत्यप्रतिज्ञ करणें हा धर्म ठीकच आहे, यांत नवल कांहीं नाहीं. १०. अपानृतकथम्=अपगता अनृता कथा यस्मात् तम्=अपगतानृतवचनम् सत्यप्रतिज्ञम् इत्यर्थः. ११. स० ३४ श्लो० ३८ पहा. १२. राजानें एकरात्र मजबरोबर रहा असें म्हटलें, कैकेयीनें तर त्याच दिवशीं जाण्याची आज्ञा केली. हें मनांत आणून राम म्हणतो कीं, 'प्रतिज्ञापालनाचे गुण जे मला आज मिळतील ते उद्यां मला कोण देणार? उद्यां जाण्यांत अधर्म होणार, करितां वनाला जाण्याचीच मी आतां इच्छा करीत आहें, त्यानें माझे सर्व मनोरथ पूर्ण झाले असें समजतों.' 'अद्य ये मे गुणाः ते तु श्वः न'—असा अन्वय.

वि[1] **म** र्शो मास्तु, [2]वसुधा **भ**रताय प्रदीयताम् ।
भवान्सत्यप्रतिज्ञोऽस्तु वनं गच्छाम्यहं पितः !' ॥ ११७

स **श्री** मान्सुतमालिंग्य [3]श्रुत्वैवं [4]मूर्च्छितोऽभवत्. ।
देव्यः समस्ता रुरुदुः **कै**केयीं [5]तामृते भृशम्. ॥ ११८

क्रू **रा** मनार्यां **कै**केयीं **सु**मंत्रः प्राह, 'किं त्वया ।
प्रारब्धं? व्यसने देवि! [6]मा मज्जय **र**घोः कुलम्. ॥ ११९

न **म** हीं **भ**रतो जातु त्रातुमर्होऽ[7]ग्रजे सति, ।
वयं तत्र गमिष्यामो यत्र **रा**मो गमिष्यति. ॥ १२०

द्वि **ज** [8]स्ते विषये [9]कश्चिन्नानार्ये! वस्तुमर्हति, ।
[10]पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि [11]चांततः. ॥ १२१

त्वं **य**[12] त्पत्युर्न मरणाद्भीता व्हीता महाजनात् ।
[13]दुःशीलं तव मन्येऽहं यथा मातुस्तथैव हि ॥ १२२

धी **रां**[14] वदंति [15]निंबान्न स्रवे[16]त्क्षौद्रं न तन्मृषा ।
[17]पितॄन्समनुजायंते [18]नरा, [19]मातरमंगनाः' ॥ १२३

---

१. विचार, संदेह. २. सर्वथा वसुमती भरताय दीयतामित्यर्थः. ३. रामाचें पूर्वोक्त भाषण ऐकून. ४. मूर्च्छा संजाता अस्य इति मूर्च्छितः । 'तारकादिभ्यः इतच्' । ५. त्या प्रसिद्ध कठोरहृदयाच्या कैकेयीशिवाय. ६. मा मज्जय=बुडवूं नकोस । 'मस्ज् (मज्ज्)' णिजन्त धातूचें 'लोट्' लकाराचें रूप. ७. रामे. ८. तुझ्या देशांत. ९. कश्चित् न अनार्ये. १०. 'कर्मणि टक् (हन्तेः)—' । 'गमहन' इत्यादिना उपधालोपश्च; तेन स्त्रियाम् पतिघ्नी इति. ११. शेवटीं. १२. 'त्वं यत् पत्युः' इत्यादि वाल्मीकिरामायणांत नाहीं. येथें मोरोपंताची चतुरता व्यक्त होते. १३. तुझ्या आईप्रमाणेंच तुझेंही दुःशील (वाईट स्वभाव) आहे असें मी समजतों. १४. विद्वान्, पंडित. १५. कडु निंबापासून मध कधीं उत्पन्न व्हावयाचा नाहीं असें सुज्ञजन म्हणतात तें मिथ्या नव्हे. १६. क्षुद्राभिः सरघाभिः (मधमाशांनीं) निर्वृत्तम् क्षौद्रम्=मधु । 'मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु । मुनिभिः क्षौद्रम् कथ्यते. १७. अश्वपति राजाला एका ऋषीनें वर दिला होता, त्या योगें राजाला सर्व प्राण्यांची भाषा समजत असे, मात्र त्याला समजलेली गोष्ट जर त्यानें दुसऱ्याला कळविली तर त्याला तत्काल मरण होतें. एके प्रसंगीं राजा शय्येवर निजला असतां त्यानें जृंभक नांवाच्या पक्ष्याचा शब्द ऐकला. त्यामुळें त्याला हंसूं आलें. तें पाहून कैकेयीच्या आईनें हंसण्याचें कारण जाणण्याचा भारीच हट्ट धरला. तेव्हां राजानें सांगितलें कीं, 'कारण सांगितल्यास मला मरण येईल.' त्यावर राणी म्हणाली, 'शंस मे जीव वा मा वा न मां त्वं प्रहसिष्यसि.' त्यावेळीं वर देणाऱ्या ऋषीच्या सांगण्यावरून तिला महालांतून घालवून दिलें. [वा० रा० अयो० स० ३५ श्लो० १७-२६.] १८. नराः पुत्ररूपाः इत्यर्थः. १९. बापासारखा मुलगा होतो व मातेसारखी मुलगी होते—असा जो लौकिक प्रवाद आहे तो खरा दिसतो. [स० ३९ श्लो० ३६.]

स **म** क्षं नृपतेरित्थं सुमंत्रकृतगंजना[1] ।
न तस्याजाग्रहं दुष्टा;ऽब्रवीद्दशरथस्ततः. ॥ १२४
‘रं **ज** नायास्य सुहृदो वणिजो वारयोषितः[2] ।
सेना व्याधाश्च निर्यांतु धनवस्त्रान्नराशयः’[3] ॥ १२५
भ **य** मा[4]प्यात्रपोवाच, ‘नृपैवं क्रियते यदि ।
निःसारं **भ**रतो राज्यं शून्यं नाभिप्रपत्स्यते.’ ॥ १२६
तां **ज** गत्यधिपः प्राह, ‘पूर्वमेव ममाहिते ! ।
सर्वं त्यक्त्वा वनं **रा**मो यात्वित्येवं न किं वृतम् ?’ ॥ १२७
सा **य** शस्कारिणी प्राह, ‘तव वंशेऽसमंजसम्[5] ।
यथा तत्याज **सगर**स्त्वमप्येनं तथा त्यज.’ ॥ १२८
स **रा** जा तद्वचः श्रुत्वा तां ‘धिगि’[6]त्यब्रवीत्तदा. ।
कैकेय्याः सेवकजनः सर्वोपि[7] व्रीडितोऽभवत्. ॥ १२९
तां **म** हामात्र[8]उद्रोषः[9] **सि**द्धार्थो[10]ऽप्यब्रवीत् हितम् ।
तदप्यणु प्रभोः पादानतया[11] न तया श्रुतम्. ॥ १३०

---

१. सुमंत्रेण कृता गंजना अवज्ञा निंदा वा यस्याः सा. २. वारस्य जनसमूहस्य योषित् साधारणत्वात् । ताः वारवध्वः. ३. ‘सुमंत्राच्या भाषणाचा कांहीं उपयोग झाला नाहीं असें पाहून राजा दशरथ त्यास म्हणाला, सुमंत्रा, रामाबरोबर जाण्याकरतां चतुरंग सेना तयार कर. सैन्याबरोबर गाणारे वाजविणारे वगैरे करमणूक करणारे लोक पाठवावे. तसेंच अनेक प्रकारचे व्यापारीही पाठवावे. मल्ल बरोबर द्यावे, अनेक शस्त्रें, गाड्या वगैरे बरोबर असावीं. रानांतील माहितगार पारधी बरोबर पाठवावे. याप्रमाणें राम अरण्यांत गेला असतां त्यास राज्याची आठवण होणार नाहीं. धान्याचीं कोठारें आणि द्रव्याचा खजिना रामाच्याबरोबर द्या, म्हणजे पुण्यक्षेत्रांच्या ठायीं दानधर्म करून ऋषींसहवर्तमान वनांत सुखानें राहील. भरत राज्य करील, राम अरण्यांत सुखानें राहील.’ [दाशरथिरामचरितामृत–पृ० ११७]. ४. भयम् आप्य अत्रपा (निर्लज्जा) उवाच; त्रपा=लज्जा. ५. असमञ्जस किंवा असमञ्ज हें सगराच्या ज्येष्ठ मुलाचें नांव. त्याची नांवाप्रमाणें करणी असे, तो पौरांच्या मुलांना सरयू नदींत बुडवीत असे. याकारणास्तव प्रजापालनदक्ष सगर राजानें त्याला राज्यांतून घालविलें, अशी कथा आहे. [वा. रा. अयो० स. ३६ श्लो० १९–२३] ६. स्वप्रतिश्रुतातिरिक्तप्रलापाद्राज्ञो धिगित्युक्तिः. ७. सर्वस्वामिन्या असम्बद्धप्रलापात् व्रीडितः इति तिलककृतः । ८. महामात्रः=प्रधानामात्यः. । ‘मन्त्रे कर्मणि भूषायाम् वित्ते माने परिच्छदे । मात्रा (अवधारणम्) तु महती येषाम् महामात्रा स्तुते स्मृताः ।’ ९. उद्गतो रोषः क्रोधो यस्य सः; संजातक्रोधः. १०. सिद्धार्थ नांवाचा प्रधानामात्य । ११. लज्जित होऊन महाराजांच्या पायां पडून कैकेयीनें थोडेसें देखील प्रधानाच्या सांगण्याप्रमाणें केलें नाहीं असा अर्थ. ‘प्रभोः पादानतया’ इत्यत्र ‘सापेक्षत्वेऽपि गमकत्वात् समासः ।’

'स **श्री** मान् **सग**रः पौरबालघ्नं सूनुमत्यजत् ।
राम: किमकरोत्पापं येनैवमुपरुध्यते[1]? ॥ १३१
न **रा** घवे वयं दोषं पश्यामो, यदि पश्यसि ।
त्वमद्य ब्रूहि तत्त्वेन, तदा **राम**ो विवास्यते' ॥ १३२
तां **म** नुष्येश्वरोऽथाह, 'भुंक्ष्व राज्यं यथासुखम् ।
अनुव्रजिष्याम्यद्याहं **राम**ं सर्वैर्जनैः सह'. ॥ १३३
'रा **जं**[2] न्मे त्यक्तराज्यस्य किं सैन्येन धनेन वा ।
त्यक्त्वा गजं कः कक्ष्यायां[3] कुरुते मानसं[4] कृती[5] ॥ १३४
स्व **य** मेवानुजानामि[6] सर्वं प्रीतेन चेतसा ।
खनित्र[7]पिटके चोभे चीराण्येवा[8]नयंतु मे.' ॥ १३५
सा **रा** म इत्युक्तवति स्वयं[9] **के**कयकन्यका ।
चीराण्याहृत्य तं प्राह, 'परिधत्स्वे[10]'ति निस्त्रपा. ॥ १३६
स **म** हार्हमवक्षिप्य सूक्ष्मं वासो **र**घूत्तमः ।
मुनिवस्त्रमवस्ताथ[11] लक्ष्मणोऽप्युरुलक्षणः ॥ १३७
नं[12] **ज** ग्राह न सा चीरं **सी**ता कौशेयवासिनी[13], ।
परं तत्प्रेक्ष्य संत्रस्ता पृषती[14] वागुरामिव[15]. ॥ १३८
भ **य** लज्जाकुला **राम**मुवाचाकुशला[16] सती ।
'कथं नु चीरं बध्नंति मुनयो बनवासिनः' ॥ १३९
नि **ज** कंठे सती कृत्वा चीरं तस्थौ, तदा प्रभुः[17] ।
तस्या बबंध तच्चूर्णं[18] कौशेयस्योपरि स्वयम्. ॥ १४०

---

१. हट्ट किंवा आग्रह धरितेस. २. हें रामाचें भाषण दशरथाला उद्देशून आहे. ३. कक्ष्या=गजमध्यबन्धन रज्जुः इति तिलके जेरबंद इति भाषायाम् । ४. हत्ती दिल्यावर त्याची दोरी देत नाहीं असें मनांत आणून काय उपयोग? 'विक्रीते करिणि किमंकुशे विवादः' हा समानार्थक चरण जाणावा. ५. कृती=शहाणा, समजदार मनुष्य. ६. अनुजानामि=मातृप्रीतये भरताय ददामि. ७. कुदळ आणि टोपली. ८. वल्कलें. ९. एतत्पर्यन्तं मन्थराप्रेरितं सिद्धं कृत्वा ब्राह्मणशापप्राप्त लोकासूयाविषयत्वसम्पादकं कर्म कैकेय्यारभते—स्वयंचीराण्याहृत्य प्राह परिधत्स्व. इति तिलके. १०. परि+धा+लोट् स्व=हीं वल्कलें नेस. ११. अवस्त=परिधान केलें. अ+वस्+लङ् त. वस् आच्छादने अदादिः, आत्मने० सक० सेट् । १२. ग्रहणदार्ढ्याय नञ्द्वय प्रयोगः. ग्रहण केलें नाहीं असें नाहीं, तर ग्रहण केलें च परंतु इत्यादि. १३. कौशेयं वस्ते या सा. १४. पृषती=मृगी. १५. वागुरा=जाळें. १६. अपरिचयात् चीरबन्धनेऽनिपुणा. १७. रामचन्द्रः श्रेष्ठ इत्यर्थः. १८. सीता वल्कल गळ्याशीं घेऊन उभी होती तेव्हां राम तें घेऊन लुगड्यावरून स्वतः नेसवून दाखवूं लागला.

न **य** नै मुमुचुस्तोयं तदा **रा**मस्य मातरः ।
ऊचु, 'वत्स! नियुक्तेयं वनवासे न, मा नय'. ॥ १४१
धी **रा** ग्रणीर्वसिष्ठस्तां निर्भत्स्यानयमास्थिताम् ।
कैकेयीमब्रवीत् क्रुद्धः सबाष्पो नयधर्मवित्. ॥ १४२
'न **म** हीं **भ**रतः पित्रा [1]अदत्तां शास्तुमिच्छति ।
[2]त्वयि वा पुत्रवद्वस्तुं यदि जातो महीपते[3]:' ॥ १४३
स **श्री** मानेवमुक्त्वा तां बहु सद्वृत्तवर्जिताम्[4] ।
सीतामप्याह, 'वत्से! त्वं चीरं मा स्पृश जातुचित्[5].' ॥ १४४
गु **रा** वेवं वदत्यार्तो राजा धिक्कृत्य तां खलाम् ।
तस्यावाक्[6]-शिरास्तूष्णीं **रा**मस्तमिदमब्रवीत्. ॥ १४५
'म **म** धार्मिक मातेयं **कौ**सल्या त्वां न गर्हते[7] ।
मया हीनामिमां देव! भूयः [8]संमंतुमर्हसि' ॥ १४६
रा **ज** श्रेष्ठ इति श्रुत्वा वनं संप्रस्थितं सुतम् ।
नाशक्नोद्द्रष्टुमत्यार्तो विललापातिवत्सलः ॥ १४७
'अ **य**[9] सा घटितं नूनं हृदयं मे न दीर्यते[10], ।
विवत्सा[11] बहवो जीवा कृतास्तन्[12]मामुपस्थितम्.' ॥ १४८

---

१. अदत्ताम्=प्रीतिपूर्वमदत्ताम् किन्तु स्वन्निर्बन्धेन दत्ताम् । २. त्वयि वा परंपाराप्राप्तधर्मनाशिकायामतःपरं पुत्रवद्वस्तुं नार्हति । कुतस्तत्राह–यदीति । यदीत्यसंदेहे संदिग्धवचनम् । 'वेदाश्चेत् प्रमाणम्' इतिवत् । वसिष्ठाच्या म्हणण्याचा भाव कीं राजानें जर प्रीतीनें राज्य दिलें नाहीं तर भरताला राज्य करण्याचा अधिकार नाहीं; दुसरें, 'पितॄन् समनुजायन्ते नरा' हा न्याय जर खरा असेल तर अधर्मानें वागणारी जी तूं त्या तुजपाशीं भरत राहण्याला योग्य नाहीं व तो रहावयाचाही नाहीं. ३. भरत जर राजाच्या पोटचा खरा असेल तर तो तुझ्या ठिकाणीं पुत्रासारखा वागणार नाहीं. ४. सदाचारहीनां. ५. कदापि. ६. अवाक् शिरो यस्य सोऽवाक्शिराः, ज्यानें खालीं मान घातली आहे असा. ७. तुला दोष देत नाहीं. ८. हिचा चांगला मान राखणें उचित आहे. ९. 'अयस्' हा हलन्त नपुंसकलिङ्ग शब्द आहे. १०. 'दृ' धातु दिवादिगणीय परस्मैपदी आहे, या करितां 'दीर्यति' असा पाठ पाहिजे, किंवा 'दीर्यते' हें 'कर्मकर्तृवाच्या'चें उदाहरण आहे असें मानलें पाहिजे. जी क्रिया कर्तृद्वारा व्हावयाची तीच जर कर्मद्वारा अनायासें घडून येत असेल तर त्यावेळीं 'कर्मकर्तृ' वाच्याचा प्रयोग होतो; जसें, काष्ठं भिद्यते । काष्ठ कर्त्याच्या साहाय्याशिवाय म्हणजे आपोआप मोडतें असा वरील उदाहरणाचा अर्थ. 'कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्' कर्मस्थफलसमानाधिकरणव्यापारो यत्र धात्वर्थो विवक्ष्यते तत्र कर्मकर्तृव्यवहारः 'न विदीर्ये कठिनाः खलु स्त्रियः' [कुमारसं० स ४ श्लो० ५]. ११. वियोजिता वत्साः पशुशिशवो येषाम् ते विवत्साः. १२. तें पातक.

न **रा** धिपो विलप्यैवं सुमंत्रं प्राह, 'मे रथम् ।
आनय त्वमितो नेतुं रामं जनपदांतरम्.'[1] ॥ १४९

स **म** यज्ञस्तथा चक्रे तं पुनः प्राह पार्थिवः ।
'रथे स्थापय जानक्या वासांस्याभूषणानिच.' ॥ १९०

रा **ज** पुत्रीं नतां श्वश्रूः कौसल्या मणिभूषणैः ।
भूषयित्वा समालिंग्य साश्रु प्राह मनस्विनीम्. ॥ १९१

'प्र[2] **य** ता भज भर्तारं पतिरेव गतिः स्त्रियः ।
तव देव समस्त्वेष सधनो निर्धनो[3]ऽपि वा. ॥ १९२

भ **ज** नीयोऽवमंतव्यो नायं प्रव्रजितो[4]ऽपि ते ।
जनकस्य[5] सुताऽसित्वं धर्मं जानासि शाश्वतम्.' ॥ १९३

सा **थ** ज्ञक्षितिसंभूता[6] श्वश्रूं प्रोवाच सांजलिः ।
'करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम्.' ॥ १९४

तां **रा** मः प्रांजलिः प्राह मातरं पुत्रवत्सलाम् ।
'अंब[7]! मा दुःखिता भूत्वा येपश्यस्त्वं पितरं मम. ॥ ३९९

स **र्म** ग्रमिह संप्राप्तं[8] मां द्रक्ष्यसि सुहृद्वृतम्[9] ।
सुप्तायास्ते[10] गमिष्यंति नव वर्षाणि पंच च.' ॥ १९६

---

१. अन्यो जनपदः जनपदान्तरम् । मयूरव्यंसकादित्वात् समासः. २. पवित्रा, नियमयुक्ता. प्रयता इत्यादि कौसल्येचे बहुमोलाचे शब्द प्रत्येक सुज्ञ आईनें किंवा बापानें आपल्या आवडत्या मुलीला शिकवावे. त्याच प्रमाणें वनपर्वांतील द्रौपदीचा व सत्यभामेचा संवाद मुलींनीं नित्य लक्ष्यांत ठेवण्याजोगा आहे. [मोरोपंत–वनपर्व–अध्याय ६, आर्या ५७–६४] ३. 'सीते, पतीच्या लाडक्या असल्या तरी त्यावर संकट आलें म्हणजे ज्या त्याचा अनादर करूं लागतात, त्या बायकांला लोक वाईट म्हणतात. नवऱ्यानें पुष्कळ सुख दिलें असलें तरी त्याला थोडी अडचण आली कीं वाईट बायका त्याला त्रास देतात, केव्हां केव्हां त्याला टाकून देखील देतात. हा वाईट बायकांचा स्वभावच आहे. वाईट बायकांचा स्वभावच खोटा दुष्ट आहे. पति कुलवान्, विद्वान्, उदार, असा असला तरी त्यावर त्यांचें प्रेम नसतें. परंतु चांगल्या बायका असतात त्या पतीस देव असें मानतात सत्य, सुस्वभाव ज्ञान यांच्या योगानें पति त्यांस पवित्र वाटतो. यासाठीं तू पतीची अवज्ञा करूं नको. तो सधन असो किंवा निर्धन असो तुला पूज्यच आहे.' [दाशरथिरामचरितामृत पृ० १२१-१२२] ४. प्रव्राजित असा णिजन्त पाठ पाहिजे. 'प्रव्रजित' असा मूळांतील चांगला नाहीं, कारण कौसल्या जानकीला उपदेश करीत आहे कीं जरी रामाला वनवासाला पाठविला तरी तूं त्याचा यत्किंचितही आपमान करूं नकोस. 'एष स्वभावो नारीणामनुभूय पुरा सुखम् । अल्पा मायापदं प्राप्य दुष्यन्ति प्रजहत्यपि' तत्त्वया नावमन्तव्यः पुत्रः प्रव्राजितो वनम् । ५. ब्रह्मवेत्ता जो जनक त्याची आत्मजा. ६. वेदीगर्भसम्भवा. ७. 'अम्बा' शब्दाचें 'अम्ब' हें सम्बोधन. ८. भ्रातृभार्यासहितं सममश्रेयस्कं च । ९. राजत्वेन सुहृद्भिर्वृतम्. १०. सुप्तायाः इव चतुर्दशघटीवत् चतुर्दशवर्षाणि गमिष्यन्ति.

सुं[1] **श्री** रेवं प्रसू[2]मुक्त्वा मातॄरन्या नतोऽब्रवीत्, ।
'संवासात्[3] परुषं[4] किंचिदज्ञानादपि यत्कृतम् ॥ १५७
आ **रा** धने यत्स्खलितं[5] मातरः शीलभूषणाः ।
तन्मे समुपजानीत[6] सर्वाश्चामंत्रयामि[7] वः.' ॥ १५८
स **म** स्तास्ता इति श्रुत्वा **रा**मस्य प्रांजलेर्गिरम् ।
रुरुदुर्वत्सला[8] रामास्तस्मै प्रददुराशिषः. ॥ १५९
व्य[9] **ज** नानिलशीतांबुहृतमोहं धरापतिम् ।
नत्वा **सौ**मित्रि**सी**ताभ्यां सह **रा**मो विनिर्ययौ. ॥ १६०
प्र **यं**[10] त्नात्प्रणतं पुत्रं **सु**मित्रा पुत्रवत्सला ।
'**रा**मं[11] **द**शरथं विद्धि मां विद्धि **ज**नकात्मजाम् ॥ १६१
त्वं **रा** जधानीमटवीं विद्धि **श**त्रुघ्नपूर्वज[12]!' ।
अश्रुपूर्णमुखी[13]त्याह प्रस्थितं निर्जनं वनम्. ॥ १६२
अ[14] **म** लात्मा 'तथे'त्युक्त्वा नत्वा सर्वा नृपांगनाः ।
रामेण **सी**तया सार्धमारुरोह रथोत्तमम्. ॥ १६३
'व्र **ज** तूर्ण'मिति प्राह **सु**मंत्रं **रा**म आत्मवान् ।
यं जनेशो[15]जनश्चापि 'क्षणं तिष्ठे'त्यचोदयत् ॥ १६४
प्रि **य** पुत्राननं द्रष्टुमुत्थाय द्वारमागतः ।
गच्छत्येव[16] द्रुतं **रा**मे पपात भुवि भूपतिः. ॥ १६५
न **ज** नन्या न तातस्य न मित्राणां तथा वचः ।
तत्पूर्वं[17] मानयामास **रा**मः श्रुत्वाप्यकर्णवत्[18]. ॥ १६६

---

१. शोभना श्रीर्यस्य स रामः २. प्रसूते या सा प्रसूः जननी इत्यर्थः ताम्ः ३. संवासः=सहवासः. ४. परुषम् उक्तमित्यर्थः । ५. चुकी. ६. क्षमा केली असें म्हणा । क्षान्तमित्यनुजानीतेत्यर्थः। ७. 'आमन्त्रयामि' (आमन्त्रये.) हा आर्ष प्रयोग आहे. ८. स्नेहयुक्ताः स्त्रियः । ९. व्यजन+अनिल+शीत+अंबु+हृत+ मोह+द्वि० प्र०=पंख्याचा वारा व थंड पाणी यांच्या योगानें ज्याची मूर्च्छा गेली आहे त्याला. व्यजनानिलश्च शीताम्बु च व्यजनानिलशीताम्बुनी ताभ्याम् हृतो मोहो यस्य स तम्. १०. प्रयासानें. ११. रामाला दशरथ समज, सीतेला मज प्रमाणें मान, अटवीला अयोध्या समज. १२. शत्रुघ्नपूर्वज=शत्रुघ्नाग्रज । १३. अश्रुभिः पूर्णं मुखं यस्याः सा अश्रुपूर्णमुखी अश्रूपूर्णमुखा वा ताम्. 'अवयवात् बहुव्रीहौ वा' इति नियमात्. १४. विमलमानसः (लक्ष्मणः). १५. नरेश, राजा दशरथ. १६. गच्छति=गम् (गच्छ)+शतृ+सप्त० प्र० भावे सप्तमी 'यस्य च भावेन भाव लक्षणम्' इति नियमात्. गच्छत्येव=जातां च. एवकारोऽत्राविलम्बं सूचयति । १७. तत्पूर्वं वचः=क्षणं तिष्ठ क्षणं तिष्ठेत्येतत् पूर्वं यस्मिंस्तत् वचः । १८. न कर्णौ विद्येते यस्य स तद्वत्, बधिरवत् इत्यर्थः ।

शें[1] **य** नं चरमं मत्वा स्त्रियो रुरुदुरुच्चकैः ।
कौसल्या पतिमुत्थाप्य[2] समाश्वासयदाकुलम् ॥ १६७

सा **रा** ज्यस्य भुजं धृत्वा दक्षिणं मंदिरांतरे ।
नेतुं प्रचलिता[3] वामं कैकेयी चार्थलालसा[4]. ॥ १६७

अ[5] **म** नोज्ञचरित्रां तामाह राजा, 'न मां स्पृश ।
नाहं त्वां द्रष्टुमिच्छामि न त्वं भार्या न बांधवी[6]. ॥ १६९

स **श्री** लाभात्प्रतीतः[8] स्याद्भरतश्चेद्दुराशये[9] ! ।
यन्मे[10] प्रदद्यात्प्रीत्यर्थं मा मां तद्दत्तमन्वगात्[11]. ॥ १७०

का[12]**रा**[13] मे बत ! कैकेय्या गेहमेतद्[14]संशयम् ।
मां राममातुः सदनं नयन्त्वित्यब्रवीन्नृपः. ॥ १७१

स **म** हिष्या गृहे नीतः शायितः शयनोत्तमे ।
अपश्यद्राम[15]रहितं तदचंद्रमि[16]वांबरम्. ॥ १७२

रं[17] **ज** न्यां चिंतयन् रामं भुजमुद्यम्य भूपतिः ।
ऊच्चैः स्वरेण प्राक्रोश'द्धा ! राम ! विजहासि नौ ॥ १७३

---

१. चरमं शयनम्=Last Sleep.=अखेरची झोंप. २. उद्+स्था+णिच् (पुगागम)+ल्यप् । 'उदः स्थाः स्तम्भोः' या नियमानें 'स्' चा लोप झाला. ३. प्रचलिता इत्यत्र 'गत्यर्थाकर्मके' त्यादिना कर्तरि क्तः । ४. अर्थविषये लालसा यस्याः सा. । वाल्मीकि रामायणांत 'पार्श्वं' असा पाठ 'वाम' या बद्दल आढळतो, तो बरा आहे; कारण पुढील श्लोकांत राजानें मला स्पर्श करूं नकोस असें सांगितल्यामुळें अर्थलालसा कैकेयी केवळ डाव्या बाजूकडे होऊन चालूं लागली. कैकेयीनें राजाचा डावा हात धरल्यावर 'मला स्पर्श करूं नकोस' असें म्हणणें विशेष चांगलें नाहीं. तथापि आहे त्यांतच संतोष मानला पाहिजे. ५. न मनोज्ञं मनोहरं चरित्रं यस्याः सा ताम्. मनो ज्ञापयति बोधनाय प्रवणीकरोति इति मनोज्ञम्. । वर सांगितलेला मनोहर वस्तूचा नैसर्गिक धर्मच आहे. ६. स्नेहेन बध्नाति इति बन्धुः, बन्धुरेव बान्धवः; स्त्रियाम् बान्धवी. ७. हे दुष्टे ! राज्यलक्ष्मीप्राप्तीनें भरताला जर संतोष झाला असेल तर त्यानें माझें उत्तरकार्य देखील करूं नये. ८. प्रतीतः=हृष्टः. ९. दुष्टः आशयः यस्याः सा तत्सम्बुद्धौ दुराशये पापाशये पापनिश्चये. १०. 'यन्मे प्रदद्यात् प्रीत्यर्थं 'याचे जागीं 'यन्मेस दद्यात् पित्रर्थं' असा वाल्मीकि रामायणाचा पाठ आहे. 'पित्रर्थं' याचा अर्थ 'तिलक'टीकेंत 'पितृत्वप्रयुक्त श्राद्धार्थं असा' दिला आहे. ११. 'मा अन्वगात्' यांत 'न माङ्योगे' या नियमानें 'अगात्' यांतील 'अ' चा लोप होणें योग्य होतें. 'इणोगा लुङि 'या नियमानें 'इ' धातूचा 'गा' असा आदेश लुङ् लकारांत होतो. १२. 'कारामेवते' त्यादि वाल्मीकि रामायणांत नाहीं. १३. कारा=बन्धनागार, बंदिशाळा. १४. गेह=मंदिर, गृह. १५. तत्=कौसल्याभवनम्. १६. अचन्द्रम्=नास्ति चन्द्रो यस्मिंस्तत्. 'अपश्यत् भवनं राजा

तं **य** शस्विनमत्यासम[1]योध्यां पुनरागतं ।
दृष्ट्वालिंग्य भविष्यंति प्रहृष्टा ये त उत्तमा[2]:' ॥ १७४

न **रा** धीशो वदन्नित्थं महिषीमाकुलोऽब्रवीत्, ।
'न त्वां पश्यामि **कौ**सल्ये! साधु मां पाणिना स्पृश[3] ॥ १७५

म **मे**[4] देव्यलिनी पद्मं महावातहतं यथा ।
वत्सं तेऽनुगता दृष्टिरद्यापि **न** निवर्तते.' ॥ १७६

सा **ज** नन्यपि **रा**मस्य विललापाकुला शुचा ।
'सभार्यं सानुजं **रा**मं पश्येयं किमहं नृप! ॥ १७७

दै[5] **य** या त्यक्तया नूनं मया राजन् पुरा बलात् ।
वत्सेषु पातुकामेषु मातॄणां शातिता[6]: स्तना:. ॥ १७८

द्वि[7] **ज** राजमिवाल्हादप्रदं विद्याविशारदम् ।
नैकपुत्रा विना पुत्रमहं जीवितुमुत्सहे.' ॥ १७९

व **य** स्ये व प्रिया साध्वी **सु**मित्रा **रा**मसंस्तवैः ।
शमयामास **कौ**सल्याशोकमग्निमिवांबुभिः. ॥ १८०

ची **रा** जिनधरं **रा**मं गच्छंतमपराजितम् ।
सी[8]तेवा[9]नुगता लक्ष्मीस्तस्य[10] किं नाम दुर्लभं? ॥ १८१

हि **म** रश्मिस्तथा युक्तशीतोष्णोऽतिसुखोऽनिलः ।
शुचिं सेविष्यते **रा**मं न रविस्तापयिष्यति. ॥ १८२

नष्टचन्द्रमिवाम्बरम्.' असा आर्ष रामायणाचा पाठ आहे. १७. रज्यतेऽत्रेति 'रजनि:' अथवा 'रजनी'=रात्रि:, रात्रि, क्षणदा. पुत्रशोकामुळें राजाला क्षणदा देखील अक्षणदा झाली. । रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणामहः' इति मनुस्मृतौ. 'उच्चैः स्वरेणे' त्यादि आर्षरामायणांत आहे.

१. अत्यासम्=अतिशय हित करणाऱ्याला. २. धन्या. ३. तूं आहेस हें समजण्याकरितां मला स्पर्श कर. राजाला कौसल्या जवळ नाहीं असा भास, त्याची दृष्टि व मन रामाचे ठायीं लीन होऊन गेल्यामुळें, झाला. ४. 'मम देव्यलिनी'त्यादि आर्षरामायणांत नाहीं. पुढील अर्ध आर्षरामायणांत आहे. ५. निर्दयया. ६. शातित=शो+णिच्+क्त. वासरांच्या तोंडांतून स्तन काढून घेतले. ७. द्विजानां चकोराणाम् राजा स्वामी तम् 'द्विजराजः शशधरो नक्षत्रेशः क्षपाकर' इत्यमरः 'नैकपुत्रे'त्यादि आर्षरामायणांत आढळतें. ८. 'सीतेवे'त्यादि आर्षरामायणधृत पाठ. राम भगवदवतार असल्यामुळें त्याला कांहीं दुर्लभ नाहीं हें व्यक्त करण्याकरितां पुढील श्लोकांत सकलदेवसेव्यत्व सांगितलें आहे. ९. इवशब्द एवार्थे. १०. तस्य=तेन. 'तस्य' हा आर्षप्रयोग आहे. 'न लोकाव्ययनिष्ठाखलर्थ तृनाम् । इत्यनेन षष्ठीनिषेधः. [अष्टाध्यायी २ । ३ । ६९].

स **श्री** मान् **गा**धिजो यस्मै सर्वास्त्राण्याशिषो ददौ, ।
तस्य के न भविष्यन्ति नम्राः, सम्राट्[1] तवात्मजः' ॥ १८३

पौ **रा** रामं पुरीं त्यक्त्वानुगताः सर्व एव ते ।
पांथा वटमिव श्रान्ता वार्योघा इव वारिधिम्[2]. ॥ १८४

तं[3] **म** सातीरमागम्य पीत्वा तोयं द्रुमच्छदैः[4] ।
सूतानुजकृते[5] **रा**मः सुष्वाप शयने प्रभुः. ॥ १८५

स **ज** नान्वृक्षमूलेषु सुप्तानालोक्य दुःखितान् ।
अपृष्ट्वैव जगामाशु दर्शितोदग्गतिः क्षणं[6]. ॥ १८६

द **थ** मानमपि त्यक्तस्नेहं मत्वा **र**वूत्तमम् ।
पौरा रुदंतो निःश्रीकाम**य**योध्यामगमन्[7] शनैः. ॥ १८७

प **रा** वृत्य विना **रा**ममागतान्स्वपतीन् स्त्रियः ।
रुदत्योगर्हयामासुरात्मजेष्वप्यनादराः. ॥ १८८

गो[9] **म** तीमतरत्तीर्त्वा पूर्वं **वे**दश्रुतिं[8] नदीम् ।
उत्तीर्य **स्यं**दिकां **रा**मः **को**सलानत्यगाद्द्रुतम्. ॥ १८९

श्री **ज** न्हुकन्यामगमन् मुन्याश्रमविभूषिताम् ।
शंकरस्य जटाजूटाद्[10]भ्रष्टां **सा**[11]गरतेजसौं[12] ॥ १९०

भ[13] **य** घ्नीं संसृतेः प्राप्य[14] **शृं**[15]गवेरपुरं प्रति ।
तत्रेंगुदी[16]तरोर्मूले रथात्प्रभुरवातरत्. ॥ १९१

---

१. सम्राट्=चक्रवर्ती. २. वारिधिम्=जलधिम्. ३. "तमसा" हें नदीचें नांव आहे. या नदीवर रामानें पहिल्यानें मुक्काम केला. [स० ४६ श्लो० ३२.] ४. द्रुमच्छदैः=पर्णैः. ५. सुतानुजकृते=सुमंत्र व लक्ष्मण यांनीं केलेल्या पर्णशय्येवर. ६. थोडा वेळ उत्तरेकडील मार्गानें लोकांला फसविण्यासाठीं जाऊन पुनः दक्षिणेकडच्या मार्गाला वळले. एवढ्यानेंच लोक कसे फसले त्याबद्दल तिलककार ह्मणतातः—महामायाधिष्ठातुर्भगवत इयत्या क्रियया पौरमोहनं नाश्चर्याय इति मन्तव्यम्. क्षणं यावत् दर्शिता उदग्गतिर्येन सः सापेक्षत्वेऽपि गमकत्वात् समासः ७. अगमन्=गम्+लुङ् अन् । ८. वेदश्रुति । [स० ४९—श्लो० ९] गोमती [स० ४९—श्लो० १०] स्यन्दिका [स० ४९—श्लो० ११] ह्या नद्या उतरून कोसल देशाच्या सीमेपलीकडे आला. ९. गोमती=गोयुतानूपा. १०. जटाजूटात्=कपर्दात् । ११. सगरस्यापत्यं पुमान् सागरः भगीरथ इत्यर्थः । सपत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया । गरेण सह तेनैव तस्मात् स सगरोऽभवत् ॥ [अयो० स० ११०-श्लो० २४.] १२. तेजसा=तपसा १३. संसारप्रवाहाचें भय नाहींसें करणारी (गंगा) तिला. सापेक्षत्वेऽपि गमकत्वात् समासः १४. राम गंगेवर आला. [स० ५० श्लो० १२] १५. शृंगवेरपुरास आल्यावर तेथें निषादराज गुह हा त्याला भेटला. [स० ५० श्लो० २६] १६. इंगुदी=तापसतरुः=हिंगणबेट.

स्व **ज** नैः सह धर्मात्मा **रा**मस्यात्मसमः[1] सखा ।
गुहो राजा निषादानामाजगाम[2] संमुत्सुकः[3]. ॥ १९२

तं **य** शस्वी स्वयं **रा**मः समालिंग्याब्रवीदिति. ।
'प्रियैः पितुर्हयैस्तृप्तैरहमंग ! सुपूजितः'[4] ॥ १९३

स **रा** त्रावुदकं प्राश्य सुप्ते **रा**मे धरातले ।
गुहः सलक्ष्मणोऽतिष्ठद्विनिद्रश्चापबाणभृत्. ॥ १९४

र **म** णीयगुणः प्रातः **सु**मंत्रं बहु सांत्वयन् ।
'पितुः समीपं याही'ति प्रोवाच विरहातुरम्. ॥ १९५

स **श्री** मान् वटदुग्धेन[6] **गु**हानीतेन[5] **रा**घवः ।
सलक्ष्मणो जटाः कृत्वाऽतरन्नावा समुद्रगाम्[7]. ॥ १९६

वं[8] **रा** हादीन्मृगान् हत्वा चतुरः स कृताशनः ।
न्यग्रोधमूले[9] सुप्त्वाथ[10] प्रातर्निर्गत्य[11] **रा**घवः ॥ १९७

---

१. आत्मसमः=प्राणसमः । २. निषाद=चण्डाल, शूद्रजातीच्या लग्नाच्या स्त्रीच्या पोटीं ब्राह्मणापासून झालेला मुलगा, पारशव. ३. 'राम गंगातरीं आला त्या वेळेस तेथें एका निषादनामक हीन जातीच्या राजाचें राज्य होतें. त्या राजाचें नांव गुह असें होतें. राम आपल्या देशांत आला आहे असें ऐकून तो राजा आपल्या वृद्ध प्रधानांस बरोबर घेऊन रामास भेटावयास आला. तो आला तेव्हां रामलक्ष्मणांनींहि त्याचा उत्तम सत्कार केला. परस्परांच्या भेटी होऊन कुशल प्रश्न झाल्यावर गुह म्हणाला, रामा, जशी अयोध्या तसेंच हें ठिकाण समजावें. आज्ञा कराल त्याप्रमाणें सर्व होईल. आपल्यासारखा पाहुणा आमच्या घरीं कधीं येणार? याप्रमाणें सांगून त्यानें भोजनाची उत्तम तयारी करविली. सर्व तयारी झाल्यावर तो पुनः रामास म्हणाला, महाराज, हें सर्व राज्य आपलें आहे. आपण स्वामी आणि आम्ही आपले सेवक. ही सर्व सिद्धता आपणासाठीं आहे. [दाशरथिरामचरितामृत-पृ १३३]. ४. बापाचे (दशरथाचे) फार आवडते घोडे तृप्त झाल्यानें माझें पूजन झालें—असें राम म्हणाला. ५. हे गुह. ६. वटदुग्ध=वडाचा चीक. ७. गंगानदीम्. [राम, सीता व लक्ष्मण हीं नावेंत बसून गंगेच्या पार आलीं.] ८. वराह वगैरे चार पशु मारून त्यांनीं भोजन केलें [वा० रा० अयो० स० ५२ श्लो० १०२] "मांसस्य वन्याहारान्तर्गतत्वात् च मृगहनने न दोषः मृगया धर्मकत्वात् च मृगहनने न दोषः । इति तिलके । ९. वटमूले. १०. लक्ष्मणानें सिद्ध केलेल्या तृणशय्येवर राम व सीता हीं निजलीं. ११. "दुसऱ्या दिवशीं प्रातःकाळ झाल्यावर गंगायमुनेच्या संगमाकडे जाण्याकरितां तीं तिघें पुढें चालूं लागलीं. तीं पुष्कळ वेळ चालत नानाप्रकारचे वनप्रदेश पहात प्रयागाजवळ आलीं; तेव्हां राम लक्ष्मणास म्हणाला, लक्ष्मणा, अग्निहोत्राचा धूम दिसत आहे यावरून प्रयागक्षेत्र जवळ आहे असें वाटतें. गंगा आणि यमुना यांचीं उदकें एकमेकांवर आपटल्यामुळें लाटांचा शब्द ऐकूं येत आहे. याप्रमाणें बोलत बोलत चालत असतां तीं संध्याकाळच्या सुमारास प्रयागास पोंचलीं. प्रयागास भारद्वाज ऋषीचा आश्रम होता,

स **म** दर्शिनमर्चा[1]र्हं [2]**भ**रद्वाजं **र**घूद्वहः ।
[3]प्रयागे सायमासाद्य ननाम परया मुदा. ॥ १९८

र **ज** नीमवस**द्रा**मो **भ**रद्वाजाश्रमेऽर्चितः ।
[4]चित्रकूटमगात्तेन मुनि[5]ना प्रोक्तवर्त्मना. ॥ १९९

तौ **य** मस्य [6]स्वसारं तां तीर्त्वा [7]काष्ठैः [8]कृतप्लवौ ।
तस्यास्तीरे निशां नीत्वा **चि**त्रकूटं नगं गतौ. ॥ २००

त्यांतील पशुपक्षी धनुष्य धारण करणाऱ्या रामलक्ष्मणांस पाहून भिऊं लागले. कांहीं वेळ चालून भारद्वाज ऋषीच्या आश्रमास पोंचल्यावर रामानें ऋषीस आपली दर्शन घेण्याची इच्छा कळविली. ऋषीची परवानगी आल्यावर आश्रमांत जाऊन तिघांनीं ऋषीचें वंदन केलें. भारद्वाज ऋषि मोठा तपस्वी व ज्ञानी होता. ऋषि अग्निशाळेंत बसला आहे, भोंवतालीं शिष्यमंडळी बसली आहे, असें पाहून, मी दशरथ राजाचा ज्येष्ठ पुत्र राम, पित्याच्या आज्ञेनें कंदमूल भक्षण करून वनांत राहण्याकरतां आलों आहें. हा माझा कनिष्ठ बंधु लक्ष्मण, व ही माझी भार्या सीता हीं मजबरोबर वनांत रहाण्याकरितां आलीं आहेत वगैरे हकीगत रामानें कळविली. [दाशरथिरामचरितामृत पृ० १४१].

१. पूजार्हम्. २. भरद्वाज हा ऋषि बृहस्पतिपासून तज्ज्येष्ठ भ्राता उतथ्य याचे पत्नीचे (ममतेच्या) ठायीं झाला । ममतेच्या उदरांत गर्भ (दीर्घतमा) असतांही बलात्कारानें बृहस्पति मैथुन करण्यास प्रवर्तला. तेव्हां आंतील गर्भानें (दीर्घतमानें) या नव्या गर्भाला पायानें बाहेर लोटून दिलें. या गर्भाचें पोषण करण्याची ममतेची इच्छा नव्हती । त्यावेळीं आकाशवाणी झाली कीं ज्या अर्थीं हा दोघांचा पुत्र (उतथ्याचा क्षेत्रज व बृहस्पतीचा औरस) आहे त्या अर्थीं याचें भरण (पोषण) तुला केलें पाहिजे यास्तव त्याला "भरद्वाज" म्हणूं लागले. भर=विभृहि, यतो द्वाजः ३. प्रयागराजाचें वर्णन असें आढळतें:—'श्रुतिः प्रामणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम् । यत्रैव गंगा यमुना सरस्वती स तीर्थराजो जयति प्रयागः' ब्रह्मदेवानें सर्व तीर्थांची तुलना केली तेव्हां प्रयागतीर्थाचें पारडें खालीं बसलें म्हणून त्याला 'तीर्थराज' 'राजतीर्थ' 'प्रयागराज' असें नांव दिलें. राम प्रयागास जातो, तेथें भरद्वाजाकडे जातो. (स० ५४—श्लो० २-९.) प्रयागापासून दहा कोसांवर चित्रकूट पर्वत होता तेथें जाण्याचा विचार करतो. (श्लो० २८) एक रात्र भरद्वाजाकडे राहून नंतर मग चित्रकूटास जातो. (स० ५५—श्लो० १) लांकडांचे तराफ्यानें यमुना उतरून तिच्या दक्षिणेस येतो. (श्लो० १४—२२) प्रयागास आगगाडीनें जातांना वाटेंत माणिकपुर नांवाचें रेलवेस्टेशन लागतें. तेथून माणिकपुर—झांशी रेलवेनें गेलें असतां चित्रकूट लागतो. चित्रकूट हें विंध्याचें शिखर आहे. येथें मंदाकिनी नांवाची नदी आहे. प्रयागापासून पायरस्त्यानें चित्रकूट तीस कोश आहे. येथें अलीकडे अमृतराव साहेब व त्यांचे चिरंजीव विनायकराव साहेब रहात असल्यामुळें चित्रकूट महाराष्ट्रांत पुष्कळ माहित झाला आहे, व त्यामुळेंच येथें महाराष्ट्रीयांची वस्ती झाली होती. ५. मुनिना प्रोक्तवर्त्मना=मुनिप्रोक्तवर्त्मना । सापेक्षत्वेऽपि गमकत्वात् समासः । ६. यमस्य स्वसारम्=यमुनाम् । ७. सापेक्षत्वेऽपि गमकत्वात् समासः । ८. प्लव=उडुप, नौका.

ध रां[1] मरवरान्नत्वा वाल्मीकिप्रमुखान्प्रभुः ।
तत्राकरोत्पर्णशालां लक्ष्मणो भ्रातुराज्ञया. ॥ २०१

स म स्तं रामवृत्तान्तं गुहचारै[2]र्निवेदितं ।
ज्ञात्वा सुमंत्रः साकेतं प्रययौ गाढदुर्मनाः. ॥ २०२

रा[3] ज मार्गेण सचिवः सुमंत्रः पिहिता[4]ननः ।
यत्र राजा दशरथस्तदेवोपययौ गृहम्. ॥ २०३

आं[5] य ताक्ष्यस्तु ता दृष्ट्वा सूतं रामं विनाऽगतम् ।
रुरुदुर्नृपतेर्भार्या, मूर्छितो न्यपतन्नृपः. ॥ २०४

र ज न्यामथ ष[6]ष्ठ्यां स शापं स्मृत्वा तमात्मनः ।
महिषीं कथयामास राजा दशरथः स्वयम् ॥ २०५

'क्षि[7] य प्रियेण सत्वानां निशायां शब्दवेधि[8]ना ।
शू[9]द्राकुक्षिभवो वैश्य[10]पुत्रो देवि ! मया हतः. ॥ २०६

मां रा ज्ञि! तत्पिता प्राह कुपितः पुत्र[11]घातिनम् ।
'यथाहं पुत्रशोकेन त्वमप्यार्तो मरिष्यसि' ॥ २०७

स म मासून् मुनेः शापः प्राप्तो हर्तुमसंशयम् ।
अंजलिं ते करोम्यद्य साध्वि ! मंतुं[12] क्षमस्व मे.' ॥ २०८

---

१. भूसुरश्रेष्ठान्, ब्राह्मणश्रेष्ठान्. २. गुहाच्या गुप्त हेरांनीं सांगितलेलें. ३. राजयोग्यः मार्गः [मध्यमपदलोपी समासः] अथवा मार्गाणाम् राजा=राजमार्गः=घण्टापथः । "राजदन्तादिषु परम्" [अष्टाध्यायी २।२।३१.] ४. अपि+धा+क्तः=पिहितः । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा.' [सि० कौ० पृ० ४६] ज्यानें आपलें तोंड झांकून घेतलें आहे असा. ५. दीर्घलोचनाः स्त्रियः ६. दिनद्वयेन शृङ्गवेरपुरे रामागमनम्, तद्द्वितीय दिने गङ्गोत्तरणम्, तदा दिनत्रयं सुमन्त्रस्य तत्र स्थितिः, तत्र तृतीयदिवसे मध्याह्ने प्रयागतः आगतचारेभ्यो रामवृन्तातं लब्ध्वा ततः प्रस्थाय मध्येऽव'सानम्, ततः षष्ठेऽपराह्णेऽयोध्याप्रवेशः सुमन्त्रस्य, तदर्धरात्रे राज्ञो मरणमिति तिलककृतः ७. सापेक्षत्वेऽपि गमकत्वात् समासः । सत्वक्षयप्रियेण इत्येव साधु । "वा प्रियस्य" (सि० कौ० पृ० ९१) या नियमानें वैकल्पिक परनिपात प्रिय शब्दाचा झाला । दुसऱ्या रीतीनें "प्रियसत्वक्षयेण" असें समस्त पद होईल. ८. प्रतिशब्दं लक्ष्यं कृत्वा विध्यतीति शब्दवेधी तेन ९. शूद्राकुक्षौ भवो जन्म यस्य सः । [वा० रा० अयो० स० ६३ श्लो० ५०–५१] १०. श्रावणनामा. ११. पुत्रं हन्तुं शीलमस्येति पुत्रघाती तम् । १२. मन्तुम् =अपराधम्.

वि **श्री**[1]रत्याकुलो राजा 'हा! **रा**मेति' वदन् मुहुः ।
अर्ध[2]रात्रे स्मरन् पुत्रं जीवितांतमुपागमत्. ॥ २०९
तं **रा** त्र्यन्ते मृतं ज्ञात्वा रुरुदुः सकलाः स्त्रियः ।
भूयः शोकार्णवे मग्नं सर्वमन्तःपुरं पुरम्. ॥ २१०
तं **म** ह्याः पालकं तैल[3]द्रोण्यां संवेश्य साधवः ।
चक्रु**र्व**सिष्ठेनादिष्टाः सचिवाः कार्य[4]मस्य यत्. ॥ २११
स **ज** वेन पटून् दूतान् **व**सिष्ठः प्राहिणोत्[5]स्वयम् ।
गत्वा **भ**रत**श**त्रुघ्नावानिन्युस्ते पुरीं प्रति. ॥ २१२
प्र **य** त्नात्सप्तभिर्गत्वा दिनैस्तावद्भिरेव ते ।
दूता **भ**रत**श**त्रुघ्नावादाय पुनरागताः. ॥ २१३
त्व **रा** वानेत्य मातुः स ज्ञात्वा दुष्कर्म तत्तथा ।
गर्हयामास तां पापां **भ**रतो भरतो[6]रुषः ॥ २१४
'आ[7] **म** बुद्धेऽहिते! क्रूरे! भूरेषा तस्य धर्मतः ।
यः **कौ**सल्यासुतः श्रीमांस्त्वया**रा**मो विवासितः ॥ २१५
त्वं **ज** गन्निंद्यचरिता, **रा**मस्य त्वयि मातृ[8]धीः ।
अतोहं न त्यजामि त्वां दुष्टां तस्यैव[9] गौरवात्.' ॥ २१६

---

१. विनष्टा श्रीः शोभा यस्य सः विश्रीः । "नद्यृतश्च" (सि० कौ० पृ० ८५) या नियमानें 'क' पाहिजे होता. "विश्रीकः" असें रूप वरील नियमानें झालें असतें. २. अर्धं रात्रेः इति अर्धरात्रः तस्मिन् इत्येकदेशिसमासः । "अर्द्धं नपुंसकम्" [सि० कौ० पृ० ७२.] "अहःसर्वैक-देशसंख्यातपुण्याच्च रात्रेः" [सि० कौ० ७९] राम अयोध्येहून गेल्यावर सहावे दिवसीं मध्य-रात्रीस दशरथ मरण पावला [सर्ग ५७ श्लो० २ टीका, सर्ग ६२ श्लो० ४, आणि सर्ग० ६४ श्लो० ७८ पहा.] ३. तैलद्रोणी=तैलपूर्णकटाहः । रामादिक पुत्रांपैकीं कोणीही समीप नसल्यामुळें सचिवांनीं राजाचें प्रेत तैलपूर्णकटाहांत घालून राखून ठेविलें होतें [सर्ग ६६ श्लो० १३.] ४.दुःख-परिपालनादि कर्म. [पुत्राशिवाय प्रेतनिर्हार इतरांना करतां येत नाहीं हें जाणून तेलाच्या कढईत राजाच्या देहाचें रक्षण केलें.] ५. पाठविले. राम गेल्यापासून आठवे म्हणजे राजा दशरथ मृत झाल्यानंतर एक दिवस व एक रात्र गेल्यावर भरतास आणण्यासाठीं दूत पाठविले. (सर्ग ६८ श्लोक ११-१२.) भरत आजोळाहून (राजगृह नामक नगराहून; सर्ग ६७ श्लोक ७) अयोध्येस आठवे दिवशीं आला. (सर्ग ७१ श्लोक १८, सर्ग ७२ श्लोक ८ पहा.) ६. क्रोधावेशानें. 'तृती-यार्थे तसिल्' भर+तस्=भरेण 'रुषः' रुष् शब्दाचें षष्ठ्यैकवचन । ७. आमा अपक्वा अपरिणता बुद्धिः यस्याः सा तत्सम्बुद्धौ आमबुद्धौ इति । ८ मातृबुद्धिः. ९. तस्यैव गौरवात्=त्याचा मान राखण्याकरितां.

प्र[1] **य** तः सोसकृद्रोषार्त्तां धिक्कृत्यातिवत्सलां ।
कौसल्यां सांत्वयामास चक्रे तातस्य सत्क्रियाम्. ॥ २१७
स्व **ज** नन्याः समक्षं तां **मं**[2]थरां हंतुमुद्यतं ।
शत्रुघ्नं वारयामास **भ**रतो **रा**मसाध्व[3]सात्. ॥ २१८
गे[4] **य** कीर्तिर्गुरोराज्ञां विलंघ्यापि महामतिः ।
भरतस्त्यक्तरा[5]ज्येहः **श्री**रामं शरणं ययौ. ॥ २१९
वी **रा** मात्यगुरुभ्रातृमातृपौरसुहृद्वृतः ।
भरतः **शृं**गवेरस्थ**गु**हेन सह संगतः. ॥ २२०
तं **म** हर्षि**भ**रद्वाजः परीक्ष्य शुचिमानसं ।
ससैन्यं पूजयामास विससर्जाग्र[6]जप्रियम्. ॥ २२१
तं **श्री** मंतं **चि**त्रकूटे ददर्श **भ**रतोऽग्रजं ।
पतित्वा पादयोस्तस्य रुरोदातीव भक्तिमान्. ॥ २२२
प[7] **रा** सुं पितरं श्रुत्वा 'हा! तातेति' भृशं रुदन् ।
सदारः सानुजो **रा**मस्तस्मै नद्यां जलं ददौ. ॥ २२३
स[8] **म** मात्यैर्वसिष्ठाद्यैः सचिवैर्मातृभिर्भृशं ।
गु[9]रुरभ्यर्थितो **रा**मो **भ**रतेन निवर्तनम्. ॥ २२४
तं **ज** गादानुजं **रा**म 'श्चतुर्दश समा वने ।
मया स्थेयं, त्वया कार्यं राज्यं तातस्य शा[10]सनात्. ॥ २२५
श्रे **य** एतत्परं विद्धनस्तु सत्यं वचः पितुः ।
प्रियमस्याश्रमे मा[11]तुर्निर्बंधं तात मा कुरु. ॥ २२६
भा **रा** पनयनं तेऽहं कर्ता पूर्णे चतुर्दशे ।
मा[12] रोदीस्तात! वर्षाणि गमिष्यंत्याशु मा शुचः.' ॥ २२७

---

१. प्रयतः=पवित्रः । २. ही विरोचनकन्या, रावणवधरूप देवकार्य साधण्यासाठीं देवांनीं या कुब्जावेषधारिणी अप्सरेला केकयराजाकडे पाठविलें होतें. केकयराज अश्वपति यानें दासी म्हणून हिला कैकेयीपाशीं ठेविलें होतें. (सर्ग ७ श्लोक १-३० पहा.) ३. रामाच्या भीतिमुळें. ४. गेया गातुं योग्या कीर्तिर्यस्य सः । ५. त्यक्ता राज्यस्य ईहा येन सः. ६. अग्रजः प्रियो यस्य सोऽग्रजप्रियः । "वा प्रियस्य" [सि० कौ० पृ० ९१.] ७. परागता असवः प्राणा यस्मात् स परासुः=गतप्राणः. ८. समम्=सह 'दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत्'. ९. ज्येष्ठो भ्राता. १०. शासनमनुरुध्य । ल्यब्लोपे कर्मण्यधिकरणे च । सि० कौ० पृ० ६२. ११. अस्मग्रहम्. १२. 'मा रोदीः' व 'मा शुचः' असे प्रयोग 'न माङ्योगे' या नियमानें झाले. सि० कौ० पृ० १९०.

तं **म** हा मुनयः क्षिप्रं [1]दशकंठवधैषिणः ।
भरतं प्रोचु'रार्यस्य ग्राह्यं **रा**मस्य ते[2] वचः' ॥ २२८
द्वि **ज** वर्यो **व**सिष्ठोऽपि प्रोवाचैवं ततः प्रभुं ।
भरतः प्रार्थयामास पादुके हेमभूषिते. ॥ २२९
'[3]दं **य** यार्याधिरोह त्वं पादाभ्यां भक्तवत्सल! ।
एते हि सर्वलोकस्य योग[4]क्षेमं विधास्यतः.' ॥ २३०
ते **ज** स्वीशः सोधिरुह्य व्यव[5]मुच्य च पादुके ।
[6]प्रायच्छत्पुरुषव्याघ्रो **भ**रताय महात्मने. ॥ २३१
प्र **य** तो [7]राममाहासावहं पूर्णे चतुर्दशे ।
न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशने.' ॥ २३२
आ **रा** ध्यं **भ**रतो नत्वा **रा**मं कृत्वा[8] प्रदक्षिणं ।
मूर्ध्नि[9] ते पादुके धृत्वा प्रययौ साश्रुलोचनः. ॥ २३३
तं **म** हर्षिं **भ**रद्वाजं नत्वाऽयोध्यां गतो व्रती ।
[10]नंदिग्रामेऽवसन्मातॄः सं[11]स्थाप्य पितुरालये. ॥ २३४
स **श्री** मान् **रा**घवो [12]हंतुमैंद्रं काकं कृतागसं ।

---

'इयं **सी**ता **रा** घवस्य महिषी परमप्रिया ।
[१०]प्रनष्टापि सती यस्य मनसो न प्रणश्यति ॥ ९७

अस्या देव्या **म** नस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् ।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति.' ॥ ९८

इत्याह सोऽ**ज** नासूनुर्हृष्टः **सी**तां विलोक्य ताम् ।
[११]जगाम मनसा **रा**मं प्रशशंस च तं प्रभुम्. ॥ ९९

घोराः [१२]कीला **य** समहाशूलमुद्गरधारिणीः ।
ददर्श राक्षसीस्तत्र सदा [१३]मांससुराप्रियाः ॥ १००

---

१. वातात्मजः । समीरात्मजनिः. २. रुद्रेन्द्रयमानिलेभ्यः । चंद्राग्निमरुद्गणेभ्यः. [स० १३ श्लो० ५७.] ३. पिंवळ्या रंगाचा एका जातीचा वृक्ष. शिंशपा=सिताफली. [स० १४ श्लो० ४१.] ४. अविदूरात्=अदूरे=समीपे. ५. मलिनेन. ६. सर्ग १५ श्लो० १८-२० पहा. ७. निश्चयात्मकवृत्तिमता अंतःकरणेन युक्तः. ८. कळपांतून फुटलेली. 'श्वभिः' हें 'श्वन्'शब्दाचें तृतीयेचें रूप । दुःखं संजातमस्येति दुःखितः. ९. सर्ग १५ श्लो० २४ पहा. १०. 'न नशेः षांतस्य' या नियमानें 'न'च्या ठिकाणीं 'ण' झाला नाहीं. कारण येथें 'श'च्या ठिकाणीं 'ष' झाला. ११. सस्मार. (स० १६ श्लो० ६.) १२. एका जातीचें कठीन लोखंड, पोलाद. १३. प्रियमांससुराः अथवा मांससुराप्रियाः । 'वा प्रियस्य' इति वार्तिकात् प्रियशब्दस्य परनिपातः.

दशास्यो[1] र **ज** नीशेषे कामार्तः स्त्रीशतावृतः ।
तत्राजगाम सहसा वैदेहिगतमानसः[2]. ॥ १०१
उग्रतेजा **य** द्यपि स प्रभंजनसुतस्तदा ।
शाखांतरेऽभवद्गूढो निर्धूतस्तस्य तेजसा. ॥ १०२
समागते **रा** क्षसेंद्रे दीपिकाभिः प्रकाशिते ।
प्रावेपत वरारोहा प्रवाते कदलीव सा. ॥ १०३
ऊरुभ्यां क्षा[3] **म** मुदरं बाहुभ्यां च पयोधरौ ।
संप्रच्छाद्योपविष्टा सा रुदती शीलसादरा. ॥ १०४
संदिदृक्षुः[4] **श्री** मतीं तामुपासर्पत्स **रा**वणः ।
ददर्श दीनामासीनां[5] धरण्यां संशितव्रताम्[6]. ॥ १०५
शुद्धप्रचा[7] **रा** मत्यार्तामुवाच **द**शकंधरः, ।
'मां दृष्ट्वा[8] देवि! कस्मात्त्वमप्रसन्ना भयाकुला? ॥ १०६
त्वां देवीं का **म** ये **सी**ते! बहु मन्यस्व मां प्रिये! ।
रक्षोधर्मः[9] परस्त्रीणां[10] हरणं गमनं खलु. ॥ १०७
तथाप्यं बु **ज** पत्राक्षि! त्वां न संस्प्रक्ष्याम्यहं[11] बलात् ।
मयि विश्वसिहि प्राज्ञे! मैवं भूः शोकलालसा. ॥ १०८
पानानि श **य** नानि त्वं दिव्यान्याभरणानि च ।
अंबराणि महार्हाणि लभस्व मंदिरेक्षणे[12]! ॥ १०९

---

१. दश+आस्य(ः)=दशाननः. २. 'वैदेहिगतमानसः' या समस्तपदांतील 'वैदेहि' असा ऱ्हस्व इकारान्त शब्द व्याकरणदृष्ट्या अशुद्ध दिसतो । त्या ठिकाणीं 'वैदेही' असा दीर्घ ईकारान्त स्त्रीलिङ्ग शब्द पाहिजे । मोरोपंताच्या रामायणांतील अनुष्टुभ्वृत्ताचें लक्षण खालीं दिलेल्या लक्षणाशीं जुळत नाहीं हेंही लक्ष्यांत ठेवलें पाहिजे । 'श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् । द्विचतुःपादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥' 'वैदेहीं गतं मानसं यस्य सः.' ३. कृशम्. शीलसादरा=पातिव्रत्यरूपे शीले सादरा । शीलरक्षणतत्परा. ४. सम्+दृश्+सन्+उः=सम्यक् द्रष्टुमिच्छुः. ५. आस्+शानच्. ('आ'चे ठिकाणीं ई होते. 'ईदासः' सि० कौ० पृ० २११)+आ. ६. तीक्ष्ण किंवा फार कठीन व्रत जिचें आहे अशीला. ७. विमलाचाराम्. कं (शिरः) धारयति या सा कंधरा ग्रीवा. ८. सर्ग २० पहा. यांत रावणाचें भाषण आहे. ९. रक्षसाम् धर्मः. १०.'कर्तृकर्मणोः कृति' इति नियमात् कर्मणि षष्ठी. ११. रावण बलात्कारानें वश करूं शकत नव्हता याचें खरें कारण नलकूबराचा उग्र शाप हें होय. परंतु येथें लटकेंच सांगून वश करूं पहात आहे. १२. मदिरायुक्ते (दृष्टिविशेषयुक्ते) ईक्षणे यस्यास्तत्संबुद्धिः । 'आघूर्णमानमध्या या क्षामा चाञ्चितलोचना । दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे ।' इति हरविजयटीकायां अलकराजानकः. [मागें पृ० १३३

स्त्रीरत्नं त्वं **रा** वणं मां मैवं भूः प्राप्य **मै**थिलि! ।
यौवनं मास्तु [1]ते मोघं कुरु गात्रेषु भूषणम्. ॥ ११०
यद्यत्तव **म** नोज्ञांगि! गात्रं पश्यामि शोभने! ।
तस्मिंस्तस्मिन्[2]पृथुश्रोणि! चक्षुर्मम निबध्यते. ॥ १११
भव मे [3]कं **ज** नेत्रे! त्वं भार्या [4]मोहं विसर्जय ।
बह्वीनामुत्तमस्त्रीणां ममाग्रमहिषी भव. ॥ ११२
त्रिलोकेभ्यो **य** त्नवता यानि रत्नानि भामिनि! ।
हृतानि तानि सर्वाणि राज्यं चेदं ददामि ते ॥ ११३
तव पित्रे **ज** नकजे! [5]तव हेतोर्विलासिनि! ।
प्रदास्यामि विजित्याहं सर्वामपि वसुंधराम्. ॥ ११४
असकृत्सं **य** ति मया भग्ना मग्ना भयार्णवे ।
अशक्ताः पुरतः स्थातुं मम सर्वे सुरासुराः. ॥ ११५
गतश्रिया **रा** जपुत्रि! तेन त्वं किं करिष्यसि? ।
द्रष्टुमप्यसमर्थस्त्वां शंके जीवति वा न वा! ॥ ११६
सीते! [6]लल **म** यि त्वं ते [7]ललंतु त्वयि बांधवाः ।
न स **रा**मो मया तुल्यस्तेजसा [8]तपसापि वा.' ॥ ११७
वाक्यं तस्य **श्री** मती सा श्रुत्वा रौद्रस्य रक्षसः ।
[9]तृणमंतरतः कृत्वा प्रत्युवाच महासती. ॥ ११८

टीप २ पहा; काव्यमाला—द्वितीय गुच्छक पृ० ७६ टीप १ पहा.] मदिरलोचना=मदकरवीक्षणा. [सर्ग १८ श्लो० ३५ टीका पहा.]

१. 'ते मोघं' असाच पाठ पाहिजे. 'तेऽमोघं' हा असंबद्ध पाठ आहे. तुझें तारुण्य व्यर्थ न जावो. २. हे नितंबिनि. ३. कमललोचने । अंबुजपत्राक्षि । उत्तरार्ध वा० रामायणांत आहे. ४. मी याला वश व्हावयाची नाहीं अशी बुद्धि टाक. ५. तुझ्या प्रीत्यर्थ. ६. ईप्सावती भव. [स०२० श्लो०२४ टीका पहा.] ७. प्राप्तसमस्तेप्सिताः भवंतु. ८. या रावणाच्या भाषणाचा जसा येथें विस्तार केला तसा प्राकृत मंत्ररामायणांत केला नाहीं. तेथें हें प्रकरण एका आर्येंत आटपून घेतलें आहे. [काव्यसंग्रहग्रंथमाला—मोरोपंत—रामायणें भाग १ पृ० ७८ आर्या ३६.] ९. हें अर्ध बहुतेक असेंच वा० रामायणांत आहे । 'परपुरुषस्य साक्षात् संभाषणानर्हत्वात् भूम्यां किंचिदंतर्धाय मूत्रादिविसर्जनवत् तृणांतरेण तस्य मुखे प्रत्युत्तरदानम् । एतेन तृणीकृतप्राणतया तृणतुल्यतया रावणस्य ग्रहणाच निर्भयप्रत्युत्तरदानमिति बोध्यम्' इति तिलके. [स० २१ श्लो० ३ टीका.]

'[1]मत्तः प्रवी **रा** धिपतेः कलत्रात्सत्कुलोद्भवात् ।
निव[2]र्तय स्वदारेषु प्रीयतां ते मनः स[3]दा. ॥ ११९
अकार्यं न **म** या कार्यमेकै[4]पत्न्या विगर्हितम् ।
न मां प्रार्थयितुं योग्यस्त्वं सिद्धि[5]मिव पापकृत्. ॥ १२०
इत्युक्त्वा सा **ज** नकजा राक्षसं **राव**णं खलम् ।
स्मृत्वा **राम**ं परावृत्य स्थित्वा भूय उवाच तम्. ॥ १२१
'निशाचर! **य** था भार्यास्तवान्येषां तथा ध्रुवम्, ।
श्रे[6]यस्कामेन तु सदा परिहार्याः परस्त्रियः. ॥ १२२
नात्र सं[7]तो **रा** त्रिचर! सं[8]तो वा नानुवर्तसे ।
रक्षसां त्वमभावाय न गृह्णासि सतां वचः. ॥ १२३
क्षपाचर! **म** नुष्येंद्रप्रिया लोभयितुं त्वया ।
नाहं शक्या, न खद्योतप्राप्या जा[9]तु रवेः प्रभा. ॥ १२४
उ[10]पधाय **ज** नेंद्रस्य तस्य तं सत्कृतं भुजम् ।
कथं नामोपधास्यामि भुजमन्यस्य कस्यचित्? ॥ १२५
मां समान **य** **राम**ेण साधु **राव**ण! दुःखिताम् ।
रामः सखा त्वया कार्यो वधं घोरमनिच्छता. ॥ १२६
धर्मज्ञोऽसौ **ज** गत्ख्यातः श[11]रणागतवत्सलः ।
तेन मैत्री भवतु ते यदि जीवितुमिच्छ[12]सि. ॥ १२७
मां चास्मै प्र **य** तो भूत्वा नि[13]र्यातयितुमर्हसि ।
अन्यथा त्वं हि कुर्वाणः परां प्राप्स्यसि चापदम्. ॥ १२८
शराः सुघो **रा** ना[14]मांका **राम**लक्ष्मणयोः क्षणात् ।
लंकां शून्यां करिष्यंति ज्वलितास्या इवोरगाः. ॥ १२९

---

१. मजपासून. २. हा पाठ चांगला नाहीं. कारण 'मनः'शब्दाची प्रथमा व द्वितीया एकाच काळीं करावी लागते । 'निवर्तस्व, स्वदारेषु' असा पाठ घेतला तर सर्व ठीक होईल. ३. प्राकृत मंत्ररामायण—सुंदरकांड—गीति ३८-४४ पहा. (काव्यसंग्रहग्रंथमाला—रामायणें—भाग १ पृ० ७८-७९ पहा.) ४. एकः पतिर्यस्याः सा । तया. ५. मनांतील हेतु पूर्ण करणारी एक प्राप्त झालेली शक्ति किंवा ऐश्वर्य. ६. आपल्या बऱ्याची ज्याला इच्छा आहे असा. ७. सज्जनाः. ८. सज्जनान्. ९. कदाचिदपि. १०. उपधानीकृत्य । उशीप्रमाणें त्या बाहूचा उपयोग करून. ११. शरणमागतास्तेषु वत्सलः. १२. सर्ग २१ लोक २१ पहा. १३. प्रत्यर्पयितुम्. १४. नामचिन्हांनीं युक्त असलेले.

राक्षसाध **म**! चौर्येण [1]शून्यस्थाहं त्वया हृता ।
तयोस्त्यक्त्वाश्रमं दूरं गतयोर्नरसिंहयोः[2]. ॥ १३०

उपाघ्राय **श्री** मतोर्न त्वया [3]गंधलवं तयोः ।
शक्यं संदर्शने स्थातुं शुना [4]शार्दूलयोरिव. ॥ १३१

असंशयं **रा**[5] जराजगिरिं वांबुपतेः [6]सभाम् ।
गतोऽपि त्वं **दा**शरथे[7]रागस्कृन्न भविष्यसि.' ॥ १३२

तत्**सी**ताया **म** हच्छ्रुत्वा परुषं वाक्यमीदृशम् ।
उवाच भूयस्तां राजा रक्षसां **द**शकंधरः. ॥ १३३

'लोके स्त्रीणां **ज** नः सर्व इष्टः [8]सांत्वयिता खलु ।
त्वया तु परिभूतोऽहमसकृत्सांत्वयन्नपि. ॥ १३४

त्वयि तु न्या **य** तः प्राप्तं मम क्रोधं सुदारुणम् ।
सीते! [9]त्वद्विषयः कामो निरुणद्धि [10]हृदुत्थितः. ॥ १३५

[11]वामः कामो **रा** जकन्ये! यस्मिन्नेव निबध्यते ।
जने तस्मि[12]न्ननुक्रोशः स्नेहश्च खलु [13]जायते. ॥ १३६

रक्षितव्यौ **म** या मासौ द्वौ पुरा [14]योऽवधिः कृतः ।
ततः शयनमारोह मम त्वं वरवर्णिनि! ॥ १३७

आभ्यामूर्ध्वं **ज** नकजे! भर्तारं मामनिच्छतीम् ।
त्वां मम [15]प्रातराशाय [16]सूदाश्छेत्स्यंति खंडशः.' ॥ १३८

तां सीतां द **य** या दे[17]वगंधर्वतनयास्तदा ।
नेत्रैराश्वासयामासुस्तर्जितां तेन रक्षसा. ॥ १३९

आश्वासिता **ज** नकजा देवीभिरथ तं पुनः ।

---

१. विजनस्था. २. 'षष्ठी चानादरे' या नियमानें (७०२–२।३।३८) भावलक्षणार्थी षष्ठी झाली. हीच Genitive Absolute Case होय. ३. गंधलेश । 'शुना' ही 'श्वन्'शब्दाची तृतीया. ४. सर्ग २१ श्लोक ३१ पहा. ५. राजराज+गिरिम्=कुबेर+गिरिम्=कैलासम्. ६. वरुणालयम्. ७. आगस् (अपराधं) करोतीति । जीवंत राहणार नाहींस म्हणजे विनाश पावशील. ८. सांत्वन करणारा पुरुष स्त्रियांचा आवडता होतो. [सर्ग २२ श्लो० २-१२.] ९. त्वं विषयो यस्य सः. १०. हृदि उत्थितः. ११. क्रूरः. १२. दया. १३. हा श्लोक मूळांत आहे. [स० २२ श्लो० ४.] १४. अरण्यकांडांत बारा महिन्यांच्या केलेल्या मर्यादेपैकीं दोन महिने वाट पाहण्याचे राहिले होते. १५. न्याहारीसाठीं । 'प्रातराश'=breakfast. प्रातःकालिकं भोजनम्. १६. सैंपाकी. १७. देवानां गंधर्वाणां च (तनयाः पुत्र्यः).

उवाच, 'क्व गतो **रा**मात्प्रभोरधम! मोक्ष्यसे ॥ १४०

वने दृप्तो **य** था सिंहस्तथा **रा**मो [1]महामहाः ।
त्वं नीच! शशवच्छ्रेष्ठं क्षिपन्[2]िह न लज्जसे ॥ १४१

[3]पापाविचा **रा** धम! ते न [4]नेत्रे गलिते कथम्? ।
एवं [5]व्याहरतः साध्वीं कथं जिह्वा न शीर्यति? ॥ १४२

भस्म त्वां पा **म** राद्याहं **रा**मासंदेशतस्तथा ।
तपसः पालनाच्चापि न करोम्यात्मते[6]जसा. ॥ १४३

[7]शूरो भ्राता [8]**श्री** दनाम्नो बलैः समुदितो वरैः ।
त्वया **रा**म[9]मपोह्यैवं दारचौर्यं कुतः कृतम्? ॥ १४४

एवमुक्तो **रा** क्षसेंद्रो भृशं क्रुद्धोऽतिदुर्मतिः ।
[10]उत्फाल्य नयने क्रूरे **जा**नकीमन्ववैक्षत. ॥ १४५

'एवं पर **म** धृष्टे! त्वामर्थहीनमनुव्रते! ।
नाशयाम्यद्य **वै**देहि! भृशं परुषभाषिणीम्. ॥ १४६

त्वं [11]भद्रभा **ज** नं नासि दुर्वृत्तं बहु मन्यसे ।
श्रीमंतं मामनादृत्य गतश्रीकमनुव्रता. ॥ १४७

वदस्यप्रि **य** मत्यर्थं प्रियवक्तारमीश्[12]वरम् ।
वध्यासि मम निःशंकं कैवं वक्तुमिहार्हति?' ॥ १४८

प्रोवाच घो **रा** बहुशो [13]राक्षसीर्मांसभोजनाः, ।
'यथा मद्वशगा **सी**ता क्षिप्रं [14]भवति सर्वथा, ॥ १४९

तथाद्य [15]सा **म** प्रमुखैरुपायैः कुरुताखिलाः.' ।
इत्याज्ञप्ता **द**शास्येन लोम[16]हर्षणदर्शनाः ॥ १५०

---

१. महत् महः यस्य सः । महातेजाः. (स० २२ श्लो० १६.) २. अधि क्षिपन्. ३. पाप अविचार अधम ते. ४. 'माझ्या मंचकावर ये' इत्यादि बोलणाऱ्याची. [स० २२ श्लो० १५.] ५. लेढि अनया इति जिह्वा. ६. हे दशग्रीवा! तुला भस्म करण्याची रामाची आज्ञा नाहीं म्हणून व तपाचा नाश न व्हावा म्हणून मी आपल्या पातिव्रत्यतेजें करून तुझें भस्म करीत नाहीं. ७.येथें 'शूर' हें हेतुगर्भ विशेषण आहे. या विशेषणपदानें रावणाचा उपहास केला आहे.[स० २२ श्लो० २२ टीका.] ८. श्रीदः (धनदः) इति नाम यस्य तस्य । कुबेराचा. ९. मायामृगाच्या साहाय्यानें रामाला भलतीकडे वाहवून । अपोह्य एवम्. १०. विवृत्य. ११. कल्याणपात्रम्. १२.सर्व कांहीं करण्याकरितां जो समर्थ त्याला.१३. 'राक्षसीः' द्वितीयानेकवचन. १४.स०२२ श्लो०३७-३८ पहा. १५. गोडीगुलाबीचे वगैरे उपाय योजून. साम प्रमुखः येषां ते तैः. १६. ज्यांना पाहिलें म्हणजे अंगावर कांटा उभा राहतो । भयानें केंस उभे राहतात हें सुप्रसिद्ध आहे.

[1]तथाति र **ज** सा व्याप्तं तर्जयंतं नृपात्मजाम् ।
तं [2]धान्यमालिनी कांतं परिष्वज्येदमब्रवीत्. ॥ १९१

'मया क्रीड **य** थाकामं, सीतया किं तवानया? ।
विवर्णया कृपणया मानुष्या राक्षसेश्वर! ॥ १९२

नूनमेषा **ज** नकजा न महाभोगभाजनम् ।
[3]अकामां कामयानस्य शरीरमुपतप्यते.' ॥ १९३

एवमुक्त्वा **य** शस्विन्या तयान्यत्रापसारितः ।
[4]प्रहसन्प्रस्थितो राजा प्रविवेश निवेशनम्. ॥ १९४

तां राक्षस्यो **रा** जकन्यां रावणाज्ञावशानुगाः ।
परं परुषया वाचा तर्जयंत्योऽब्रुवन्बहु. ॥ १९५

'पुलस्त्यस्य **म** हर्षेस्त्वं सूनोर्विश्रवसः स्नुषा ।
भवे'त्ये[5]कजटोवाच तथा हरिजटापरा ॥ १९६

'[6]अत्यद्भुत **श्री** स्त्रिजगद्रत्नभोक्ता सुवंशजः ।
कुतो न रोचते भर्ता, किं त्वं [7]प्रव्राजिते रता? ॥ १९७

[9]भव भार्या **रा** जराजभ्रातुः प्रव्राजितं त्यज ।
अभिलाषो वरं दुग्धे मुग्धे कः [8]कांजिके रसः. ॥ १९८

असकृद्वी **म** वीर्येण सुरगंधर्वदानवाः ।
निर्जिताः समरे येन स ते पार्श्वमुपागतः. ॥ १९९

तस्य त्वं भ **ज** तः सर्वां समृद्धिं जयतो जगत् ।
भार्यात्वं राक्षसेंद्रस्य किं न कामयसें[10]ऽगने!? ॥ २००

दिवाकरो **य** स्य भयान्न तपत्यद्रयो जलम् ।

---

१. अतिशयित रजोगुणानें व्याप्त झालेल्याला. २. सीतेची धान्यमालिनी नांवाच्या राक्षसीला दया येऊन रागाच्या सपाट्यांत प्रहार वगैरे करूं नये यासाठीं आलिंगन करून बोलली. [स० २२ श्लो० ३९।४३.] ३. हें अर्ध वा० रामायणांत आहे. अकामुक स्त्रीची इच्छा करणाऱ्या पुरुषाच्या शरीरास संताप होतो. ४. 'धान्यमालिन्या उचितव्यवहारदर्शनेन अवशप्राप्तस्त्रीप्रहारापकीर्तिपरिहारेण च प्रसन्न इत्यर्थः' इति तिलके. ५. एकजटा आणि हरिजटा हीं राक्षसीचीं नांवें आहेत. ६. अत्यद्भुता श्रीर्यस्य सः । त्रिजगत्सु यानि रत्नानि तेषां भोक्ता. ७. प्रव्राजिते=निर्वासिते । 'प्रव्रजिते' ह्या पदाचा अर्थ संन्यासिनी असा होईल । पण राम काय संन्यासी होता? ८. कांजीच्या ठायीं काय गोडी. ९. हें विकटा व दुर्मुखी या राक्षसींचें भाषण आहे. [स० २३ श्लो० ९-१९.] १०. प्रशस्तानि अंगानि यस्याः सा तत्संबुद्धिः । हे चारुगात्रि.

मुंचंति तरवः पुष्पं फलं वातो न वाति च, ॥ १६१

तं त्वं कथं **रा** क्षसेंद्रं **द**शास्यमवमन्यसे ?' ।

[1]'कामं खादत मां सर्वा, न करिष्यामि वो वचः. ॥ १६२

शक्रं पु[2]लो म जादेवी श्रीवसिष्ठमरुंधती ।

तथाह**मि**क्ष्वाकुवरं **रा**मं पतिमनुव्रतां[3]. ॥ १६३

सोऽस्तु भर्ता ज[4] न्मजन्मन्यन्यं कांतं न कामये, ।

[5]वामेनाप्यंघ्रिणा स्प्रष्टुं नाहमिच्छामि **रा**वणम्.' ॥ १६४

एवं श्रुतं **य** दा वाक्यं राक्षस्यः क्रोधमूर्च्छिताः ।

भर्त्सयंति स्म परुषैर्वचनैस्तामनिंदिताम्. ॥ १६५

भर्त्स्यमाना **ज** नकजा राक्षसीभिः समंततः ।

रुदती शिंशपामूलं गत्वा तस्थौ [6]तपस्विनी. ॥ १६६

वि[7]नताख्या,'य दि त्वं नो वचनं न करिष्यसि ।

भक्षयिष्यामहेऽद्य त्वामि'त्युवाचातिनिर्दया[8]. ॥ १६७

ता राक्षस्यो **रा** जपुत्रीं [9]भर्तुर्विप्रियकारिणीम् ।

'त्वां मारयाम' इत्यूचुर्लोमहर्षणदर्शनाः ॥ १६८

विकटा ना म तामाह, 'भर्तारं **रा**वणं भज ।

नो चेदुत्पाट्य हृदयं भक्षयिष्याम्यहं तव.' ॥ १६९

एवं क्रूराः **श्री** मतीं तामन्याश्चोचुः सुदारुणम् ।

हंतव्या राक्षसेंद्रस्य [10]यदाज्ञाभंगकारिणी. ॥ १७०

कुंडोदरी रा क्षसस्त्री प्राह, 'मे [11]दोहदो महान् ।

खादेयमस्या हृदयं कोमलायाः [12]सबंधनम्.' ॥ १७१

---

१. हें सीतेचें भाषण आहे. [स० २४ श्लो० ८.] २. पौलोमी=शची=इंद्राणी. ३. मूळ रामायणांत असें आहे:—'यथा शची महाभागा शक्रं समुपतिष्ठति । अरुंधती वसिष्ठं च रोहिणी शशिनं यथा ॥ १० ॥ लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा । सावित्री सत्यवंतं च कपिलं श्रीमती यथा ॥ ११ ॥ सौदासं मदयंतीव केशिनी सगरं यथा । नैषधं दमयंतीव भैमी पतिमनुव्रता ॥ १२ ॥' ४. जन्मनि जन्मनि. येथें उष्णोष्ण, शीतशीत इत्यादिकांप्रमाणें जन्मजन्मनि हा शब्द निपातनानें सिद्ध झाला. ५. डाव्या पायानें देखील. ६. दीना, निरालंबा, गरीब बिचारी. ७. विनता नामक राक्षसी. ८. कठोरहृदया. ९. स्वामिनः रावणस्य. १०. यस्मात् कारणात् । यतः. ११. 'डोहाळे' इति महाराष्ट्रभाषायाम् । गर्भिण्यभिलाषः. १२. हृदयकमलासभोंवतीं असलेल्या स्नायूसह. [स० २४ श्लो० ४०.]

वि[1]घसा ना **म** दुर्वृत्ता तदोवाच भयंकरम्, ।
'कंठमस्या नृशंसायाः पीडयामः किमास्यते? ॥ १७२

मृतेति र **ज** नीचर्यो! **रा**वणाय निवेद्यताम् ।
ततोऽसंशयमेवास्मान्खाद[2]तेति स वक्ष्यति.' ॥ १७३

ततो निर्द **य** मश्राव्यमत्यंतं लोमहर्षणम् ।
उवाचाजामुखी, 'पिंडान्कुरुतेमां विश[3]स्य तान्. ॥ १७४

यथायथं **रा** क्षसीभ्यः सर्वाभ्योऽपि विभागशः ।
विभजामानया मोघो विवादो मे न रोचते.' ॥ १७५

'आनीयता **म** द्य मद्यमि'ति **शू**र्पणखाब्रवीत्, ।
'भुक्त्वा पीत्वा च नृत्यामः स्तुत्वा देवीं **नि**कुंभिलाम्.'[4] ॥ १७६

निर्भर्त्सिता **ज** गत्पूज्या ताभिरेवं तदा भृशम् ।
सा बालारुददत्यार्ता प्रत्युवाच च ताः पुनः, ॥ १७७

'नारी[5] न न्या **य** तो रक्षोभार्या भवितुमर्हति, ।
कामं खादत मां सर्वा, न करिष्यामि वो वचः.' ॥ १७८

उष्णैर्नेत्र **ज** लैः **सी**ता स्नापयंती[6] पयोधरौ ।
अशोकशाखामालंब्य वेपमानारुदद्भृशम्. ॥ १७९

'हा **रा**म! प्रि **य** हा! सौम्य! **सौ**मित्रे! गुरुवत्सल! ।
हा **कौ**सल्ये! हा **सु**मित्रे!' इति **सी**ता रुरोद सा. ॥ १८०

'पीडिताया **रा** क्षसीभिर्वियुक्तायाः प्रियेण मे ।
न ह्यस्ति जीवितेनार्थो मर्तुमप्यत्र दुर्घटम्. ॥ १८१

हृदयं म **म** येनेदं न दुःखेन विशीर्यते ।
अश्म[7]सारमयं नूनमथवाप्यजरामरम्. ॥ १८२

ख्यातः पूज्यः **श्री**[8] मदीड्यः सा[9]नुक्रोशश्च **रा**घवः ।
कृतज्ञोऽप्यदयो जातः शंके मद्भाग्यसंक्षयात्. ॥ १८३

निरुद्धाहं **रा** वणेन स्वल्पवीर्येण पापिना ।
समर्थः खलु मे भर्ता नेहस्थां मां स बुध्यते. ॥ १८४

---

१. 'विघसा' हा पाठ 'विघसा' असावा. २. या जानकीला खाऊन टाका असें रावण आम्हांला म्हणेल. ३. कापून. ४. निकुंभिलोपवनांतील देवी. (श्लो० ४५.) ५. नरजातीया स्त्री. [सर्ग २५ श्लो० ३.] ६. स्ना+णिच् (पुगागम)+शतृ+ई । 'अनुपसर्गात् ज्वलह्वलग्ला-स्नावमनमां वा' या सूत्रानें स्नापयंती किंवा स्नपयंती असें रूप होईल. ७. लोखंडाचें केलेलें. (सर्ग २६ श्लो० ६.) ८. श्रीमद्भिः ईड्यः (स्तुत्यः). ९. दीनवत्सलः, करुणात्मकः.

[1]कामं **लं**का **म** हादुर्गं वारिधौ दुष्प्रधर्षणम् ।
न तु **रा**घवबाणानां [2]गतिरोधो भविष्यति. ॥ १८५
राक्षसानां **ज** नस्थाने सहस्राणि चतुर्दश ।
एकेनैव निरस्तानि स मां किं नाभिपद्यते ? ॥ १८६
इहस्थां मां **य** शस्वींद्रो न जानीते रघूत्तमः ।
जानन्न खलु तेजस्वीधर्षणां मर्षयिष्यति. ॥ १८७
वृत्तं वक्ता **रा** घवाय यो [3]गृध्रः श्वशुरो मम ।
पापेन रक्षसा सोऽपि मत्समक्षं रणे हतः. ॥ १८८
वर्तमाना **म** त्र चेन्मां जानीयाद्रघुनंदनः ।
लंकां महोदधिं चापि निर्दहेदस्त्रतेजसा. ॥ १८९
करोमि नि **ज** नाथेन रहिता रोदनं यथा ।
मत्तोऽधिकं करिष्यंति राक्षस्योऽत्र गृहे गृहे.' ॥ १९०
सीतां ता भू **य** एवोचु, 'रनार्ये ! पापनिश्चये ! ।
राक्षस्यो भक्षयिष्यन्ति तव मांसमसंशयम्.' ॥ १९१
[4]राक्षसीस्त्रि **ज** टा वृद्धा [5]प्रबुद्धा वाक्यमब्रवीत् ।
सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा, ॥ १९२
'अनार्या यू **य** मात्मानं खादतार्या न **जा**नकीम् ।
भक्षयिष्यथ दृष्टो हि मया स्वप्नोऽद्य दारुणः.' ॥ १९३
स्वप्नं पृष्टा **रा** क्षसीभिः कथयामास साथ तम्, ।
'राक्षसाना[6]मभावाय **सी**ताभर्तुर्भ[7]वाय यः ॥ १९४
अद्य स्वप्ने **म** या दृष्टः शुक्लमाल्यानुलेपनः ।
रामः श्वेतगजारूढः शुक्लवासाः सलक्ष्मणः ॥ १९५
सीता च सु **श्री** रारूढा [8]श्वेताद्रिं सिंधुवेष्टितम् ।
मुक्ता शुक्लांबरधरा शुक्लमाल्यानुलेपना. ॥ १९६

---

१. कबूल आहे कीं. २. हें अर्ध मूळांत आहे. [सर्ग २६ श्लो० १३.] ब्रह्मलोकापर्यंत रामबाणांची गति कुंठित होणें नाहीं असें येथें सूचविलें आहे. 'तूं दुर्गमस्थानीं आहेस, येथें रामबाण येणार नाहींत' असें जें रावणाचें भाषण त्याचें सीतेनें निरसन केलें आहे. ३. सर्ग २६ श्लोक १६ पहा. ४. द्वितीयानेकवचन. ५. आतांपर्यंत निजलेली परंतु ह्याक्षणीं जागृत झालेली त्रिजटा. [स० २७ श्लो० ४.] ६. नाशाय. ७. मंगलाय। संपद्यमानः इत्यर्थः. ८. श्वेत नांवाच्या पर्वताच्या शिखरावर । 'आरोहणं गोवृषकुंजराणां प्रासादशैलाग्रवनस्पतीनाम् । ध्रुवमर्थलाभदम्'. [स० २७ श्लो० १४ टीका पहा.]

ततश्चेयं **रा** जपुत्री **रा**मेण सह संगता ।
आरूढा **पु**ष्पकं यानं प्रस्थिता चोत्तरां दिशम्. ॥ १९७
रावणश्च **म** या स्वप्ने दृष्टो रक्तस्रगंबरः ।
प्रस्थितः खरयानेन राक्षसैर्दक्षिणां दिशम्. ॥ १९८
दशास्यात्म **ज** वर्गश्च **कुं**भकर्णश्च तद्विधः ।
उष्ट्रारूढा गताः सर्वे सचिवा दक्षिणां दिशम्. ॥ १९९
एक एव **य** था **रा**मः श्वेतच्छत्रो **बि**भीषणः ।
चतुर्भिः सचिवैर्दृष्टो मया स्वप्ने वियद्गतः. ॥ २००
लंका सार्धं **रा** त्रिंचरैर्मुंडै रक्तस्रगंबरैः ।
सागरे पतिता दृष्टा भग्नगोपुरतोरणा. ॥ २०१
आगसाल **म** लं प्रोक्ता मयोपरमत द्रुतम् ।
ईक्षध्वं न चिरादेनां **सी**तां प्राप्नोति **रा**घवः. ॥ २०२
रामस्तीर्त्वा **ज** लनिधिं दयितादुःखदायिनीः ।
घातयेत्परमामर्षी युष्मान्सह निशाचरैः. ॥ २०३
महद्वो भ **य** मागामि तदलं परुषोक्तिभिः ।
अभियाचाम **वै**देहीमेतद्धि मम रोचते. ॥ २०४
सर्वा यूयं **ज** नकजां भर्त्सितामर्ष्यसाध्वसम् ।
याचध्वं रक्षसां घोरं भयं **रा**मादुपस्थितम्. ॥ २०५
कुलजा द **य** या पूर्णा प्रसन्ना प्रणिपाततः ।
अलमेषा परित्रातुं राक्षस्यो महतो भयात्. ॥ २०६
वामममस्या **रा** जपुत्र्याः स्फुरच्चक्षुः प्रदृश्यते ।

---

१. लाल फुलांची माळ व लाल वस्त्र ज्याचे अंगावर आहेत असा। रक्ता स्रक् रक्तं अंबरं च यस्य सः. २. सर्ग २७ श्लोक २२ पहा. ३. रावण, वराहावर, इंद्रजित्, शिशुमारावर आणि कुंभकर्ण उंटावर बसून गेले—असें मूळांत आहे. (श्लो० २७-२९.) ४. मुंडितमुंडैः । सार्धम्=सह । उत्तरार्ध वा० रामायणांत आहे । भग्नानि गोपुराणि (पुरद्वाराणि, शहराचा मुख्य दरवाजा, वेशीचा दरवाजा=गोपुर) तोरणानि (शहरांतील लहान कमानी दरवाजे) यस्याः सा. ५. दयितां दुःखं ददति यास्ताः। घातयेत्=हन्+णिच्+विधिलिङ्ग ईत् । हन् धातूचें प्रयोजकरूप घातय् असें होतें. ६. परम+अमर्ष+इन्=अतिक्रोधयुक्तः. ७. आगामिन्=पुढें येणारें, होणारें. ८. अभयम्. ९. स्त्रियांच्या सव्य नेत्राचें, सव्योरूचें स्फुरण शुभसूचक समजतात । व पुरुषांच्या दक्षिणांगांचें स्फुरण शुभावह आहे । दर्शनालिंगनसंगमसूचक हें स्फुरण आहे हें सीतेच्या त्या त्या अंगाच्या स्फुरणावरून सुव्यक्त आहे.

कंपते बाहुरुरुश्च दक्षिणाया [1]ह्यदक्षिणः ॥ २०७
[2]पक्षी चो[3]क्तै **म** सामोक्तिर्ब्रूते मुहुरिमां सतीम् ।
[4]आगतं शोभनं प्रत्युद्गच्छेति प्रेरयन्निव.' ॥ २०८
तां ऱ्हीमती **श्री** मती सा भर्तुर्विजयहर्षिता ।
उवाच, 'यदि [5]तत्तथ्यं भवेयं [6]शरणं हि वः.' ॥ २०९
पुनश्च सा **रा** जकन्या विलप्य बहुदुःखिता ।
जग्राह [7]वेण्युद्ग्रथनं शाखां तस्य द्रुमस्य च. ॥ २१०
विषं शस्त्र **म** लभ्यं मे कंठमुद्बध्य जीवितम् ।
त्याज्यमित्यकरोद्बुद्धिं यावच्छोकाकुला सती. ॥ २११
तावत्पंक **ज** पत्राभमस्फुरद्वाममीक्षणम् ।
भुजश्चोरुश्च तेनाशु पुनर्धैर्यमवाप सा. ॥ २१२
स **आंजने य** स्तत्सर्वं दृष्ट्वा श्रुत्वा महामतिः ।
चिंतां चकार बहुधा **सी**तां दृष्ट्वा प्रहर्षितः. ॥ २१३
'यदि ह्यहं [9]**रा** मरामां [10]शोकोपहतचेतनाम् ।
अनाश्वास्य गमिष्यामि दो[11]षवद्गमनं भवेत्. ॥ २१४
इतो गते **म** यि स्पष्टं शोकार्तेयं नृपात्मजा ।
परित्राणमपश्यंती सर्वथा जीवितं त्यजेत्. ॥ २१५
अत्रैव र **ज** नीशेषे कार्यमाश्वासनं मया ।
निशाचरीणां प्रत्यक्ष[12]मक्षमं चाभिभाषितुम्. ॥ २१६
पृच्छेद्रामो **य** दि स मां किं मां **सी**ताब्रवीदिति ।
किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमाम्. ॥ २१७

---

१. वामः (बाहुः). २. काकादि. ३. उत्तम शांत स्वरवादी. ४. रामचंद्र प्राप्त झाला आहे यास्तव तूं उठून सामोरी जा—अशी प्रेरणा करणारा. ५. तत् तथ्यम्=तें खरें. तें त्रिजटावचन. ६. रक्षण करणारी । 'शरणं गृहरक्षित्रोः' इत्यमरः. ७. वेणीग्रथन, वेणीबंधन, 'केंसाळी'। गळ्याला फांस लावून घेण्याचे उद्देशानें ती केंसाळी घेऊन शिंशपावृक्षासमीप गेली । व ती गळ्यांत बांधलेल्या केंसाळीला त्या वृक्षाच्या शाखेला बांधीत असतां शुभ शकुन झाले म्हणून उद्बंधन तसेंच राहिलें. ८. सर्ग २८ श्लोक १६-१८ पहा. ९. रामप्रियाम्. १०. शोकेन उपहता (नष्टा) चेतना (बुद्धिः, ज्ञानं वा) यस्याः ताम् । शोकाच्या भरांत काय करील आणि काय नाहीं याचा नेम नव्हता कारण बुद्धि कोठें त्या वेळीं जाग्यावर राहते. 'कांतोदंतः सुहृदुपनतः संगमात् किंचिदूनः.' [मेघदूत.] ११. कार्यहानिदोषवत्. (स० ३० श्लो० ८.) १२. अयोग्यम्.

रक्षणीया **ज** नकजा **रा**मस्य कुशलोक्तिभिः ।
कथं नु खलु कर्तव्यं [1]महत्कृच्छ्रं गतो ह्यहम् ? ॥ २१८

करोमि कं **य** त्नमहं किं कृत्वा सुकृतं भवेत् ।
रामलक्ष्मण**सु**ग्रीवप्रसादः प्राप्यते कथम् ? ॥ २१९

आसाद्याहं **रा** [2]क्षसीनामंतरं मानुषीं गिरम् ।
उदाहरिष्याम्येवं सन्नतिसूक्ष्मतनुः कपिः. ॥ २२०

मां **रा**वणं **म** न्यमाना **सी**ता [3]भीता भविष्यति ।
यदि वाचं प्रदास्यामि द्विजातिरिव [4]संस्कृताम्. ॥ २२१

अथवा तं [5]**श्री** मदाढ्यं श्री**रा**ममनुकीर्तयन् ।
नैनामुद्वेजयिष्यामि **सी**तां तद्गतमानसाम्.' ॥ २२२

इति कृत्वा **रा** जदूतो मतिं मतिमतां वरः ।
[6]समीपदेशे मधुरं वचनं व्याजहार सः. ॥ २२३

गुणानुत्त **म** शीलस्य सख्युर्व[7]ज्रभृतोऽतुलान् ।
राज्ञो **द**शरथस्यादौ वर्णयामास **मा**रुतिः. ॥ २२४

तस्य [8]चात्म **ज** मुख्यस्य श्री**रा**मस्य जगत्पतेः ।
लक्ष्मणस्य महाबुद्धे**र्ज**नकस्य च धीमतः ॥ २२५

यत्संप्राप्तं **य** [9]शश्चाग्र्यं त्यक्ते राज्ये गुरोर्गिरा ।
जगौ [10]जनस्थानवासिरक्षःकदनमद्भुतम्. ॥ २२६

तस्या देव्या **रा** वणेन हरणं सोऽन्वकीर्तयत् ।
सुग्रीवेण ततः सख्यं बलिनो **वा**लिनो वधम्. ॥ २२७

[11]तदप्रति [12]**म** सत्त्वौजाः **सी**तायाः परिमार्गणम् ।
आत्मना लंघनं सिंधोः **सु**ग्रीवस्य निदेशतः. ॥ २२८

---

१. संकटांत. २. अनवधानसमयम् । असावधपणाची वेळ पाहून. ३. भयभीत, भ्यालेली. ४. व्याकरणसंस्कारवतीम्. [सर्ग ३० श्लोक १७-१८ पहा.] ५. श्रीमत्सु आढ्यः । तम् । तस्मिन् रतं (अनुरक्तं) मानसं यस्यास्ताम्. ६. जेथून चांगलें ऐकूं येईल अशा स्थळीं. ७. वज्रं बिभर्तीति वज्रभृत् इंद्रः तस्य । अतुलान्=न तुला येषां ते तान्. ८. आत्मजेषु मुख्यस्तस्य अर्थात् रामस्य. ९. श्रेष्ठम्. १०. जनस्थाने वासिनां रक्षसां कदनं (मर्दनम्, मारणम्) । जगौ=गाता झाला. ११. पद्यें २२८-२२९ यांचें युग्मक आहे. १२. अप्रतिमं सत्त्वं च ओजश्च यस्य सः । निदेशतः=निदेशेन, आज्ञया.

कीर्तयित्वा **ज** गादाथ, 'शनैर्दृष्टेयमीश्वरी ।
धन्योऽहं कृतकृत्योऽस्मि **रा**मस्यैव प्रसादतः.' ॥ २२९

तच्छ्रुत्वा प्रि **य** मत्यंतं प्रथमं मुदिताभवत् ।
दृष्ट्वा कपिं ततः **सी**ता भीता **रा**वणशंकया. ॥ २३०

सोऽवतीर्यां **ज** नासूनुर्विद्रुमाभाननो[१] द्रुमात् ।
विनीतवेषः कृपणः[२] प्रणिपत्योपसृत्य च. ॥ २३१

उवाचाधा **य** स शिरस्यंजलिं मधुरां गिरम्, ।
'का त्वं पद्मपलाशाक्षि क्लिष्टकौशेयवासिनि[३]. ॥ २३२

तिष्ठस्युदा **रा** वृक्षस्य शाखामालंब्य भामिनि! ।
किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजम्[४]? ॥ २३३

किंतु चंद्र **म** सा हीना पतिता विबुधालयात्[५] ।
रोहिणी[६] **वा**रुंधती त्वं **व**सिष्ठांकपरिच्युता. ॥ २३४

जनकस्य **श्री** मती त्वं सुतेति प्रतिभासि मे ।
त्वां **रा**मदयितां मन्ये तन्नामग्रहणादहम्. ॥ २३५

पंचवट्यां **रा** वणेन बलात्प्रमथिता यदि ।
सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः.' ॥ २३६

सीतोवाच, '**म** नुष्येंद्रो राजा **द**शरथः प्रभुः ।
तस्य स्नुषाहं **रा**मस्य भार्या **ज**नकनंदिनी. ॥ २३७

रावणेन **ज** नस्थानाद्धृताहं वत्स! मायया ।
द्वौ मासौ तेन मे कालो जीवितानुग्रहः[७] कृतः. ॥ २३८

---

१. विद्रुमस्येव आभा यस्य तत् विद्रुमाभम् आननं यस्य सः । पोंवळ्याच्या झाडाप्रमाणें ज्याचें तोंड लाल आहे तो । पोंवळ्याच्या झाडाला विद्रुम (एक विशेषजातीचा वृक्ष) असें म्हणण्याचें कारण एवढेंच कीं त्या प्रवालकीटकांनीं (Polyp) बनविलेल्या अथवा त्यांच्या आंगाच्याच बनलेल्या द्रव्याला वृक्षाप्रमाणें कधीं कधीं आकार येतो. विद्रुम हा कीटकविशेष-निर्मित पदार्थ आहे या संबंधाची चांगली माहिती प्रोफेसर हक्स्लेच्या Physiography नामक पुस्तकांत आहे. [सर्ग ३३ श्लो० १.] २. मातुः सीताया दुःखदर्शनाद्दीनः. ३. क्लिष्टं (मलिनं) कौशेयं (रेशमी वस्त्र) वस्ते इति तत्संबुद्धौ. ४. हें अर्ध मूळांत आहे. [स० ३३ श्लो० ४.] ५. स्वर्गांत. ६. रोहिणी ही चंद्राची आवडती स्त्री होय अशी प्राचीन समजूत आहे. ७. जीविते अनुग्रहः यस्मिन् सः. त्या रावणानें माझ्या जीवितरक्षणाविषयीं दोन महिन्याचा कालावधि केला आहे त्या मुदतींत रामदर्शन न झालें तर मी प्राणत्याग करीन. [स० ३३ श्लो० ३०-३१.]

तन्मासद्व **य** तः पश्चादहं त्यक्ष्यामि जीवितत्.' ।
तच्छ्रुत्वा तां महाबुद्धिः सांत्वमुत्तरमब्रवीम्, ॥ २३९

'आज्ञयाहं **रा** घवस्य देवि! दूत इहागतः ।
वैदेहि! कुशली **राम**: स त्वां कौशलमब्रवीत्. ॥ २४०

लक्ष्मणश्च **म** हातेजा भर्तुस्तेऽनुचरः प्रियः ।
कृतवांच्छोकसंतप्तः शिरसा [2]तेऽभिवादनम्.' ॥ २४१

तच्छ्रुत्वा सा **ज** नकजा संप्रहृष्टेदमब्रवीत्, ।
'[3]एति जीवंतमानंदो नरं वर्षशतादपि. ॥ २४२

सत्या [4]गाथे **य** [5]मद्यांग! लौकिकी प्रतिभाति मे. ।
यत्त्वां पश्यामि कुशलं कथयंतं प्लवंगम!' ॥ २४३

इत्युक्त्वा सा **ज** नकजा पुनः शंकान्विताभवत् ।
समीपमागतं दृष्ट्वा तममन्यत **रावणम्**. ॥ २४४

वंदमानं **य** तात्मानं दीर्घमुच्छ्वस्य साब्रवीत्, ।
'**रा**वणस्त्वमसि त्रासमुत्पादयसि मे पुनः.' ॥ २४५

अथवा त्वं **रा** घवस्य दूत एवासि वानर! ।
मनसो हि मम प्रीतिर्[6]रुत्पन्ना तव दर्शनात्. ॥ २४६

यदि **श्रीरा म** दूतस्त्वमागतो भद्रमस्तु ते. ।
मम प्रियस्य **राम**स्य गुणान्कथय वानर!' ॥ २४७

[7]गुणान्कपिः**श्री रा**मस्य रूपं च सुमनोहरम् ।
सौमित्रेरपि सद्बुद्धिर्वर्णयामास तत्त्वतः. ॥ २४८

गुणाञ्छ्रुत्वा **रा** घवयोर्लक्षणानि च सा पुनः ।
पप्रच्छ, 'सख्यं क्व कथं **राम**ेण भवतामि'ति. ॥ २४९

स प्लवंग **म** नाथेन **सु**ग्रीवेण समागमम् ।
विस्तरात्कथयामास मतिमान्**मा**रुतात्मजः. ॥ २५०

स्वं च प्रभं **ज** नसुतं **सु**ग्रीवसचिवं प्रियम् ।

---

१. सर्ग ३४ श्लो० ३३-४० पहा. २. हा श्लोक मूळांत आहे. [स० ३५ श्लो० ४.] ३. मनुष्य जर जीवंत असेल तर त्याला शतावधि वर्षांतून कधीं तरी आनंद प्राप्त व्हावयाचाच, यास्तव बहुत दुःख प्राप्त झालें तरी तें मनुष्यानें सोसून जीवंत असावें. ४. श्लोक. ५. अंग=हे. ६. 'विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा' इति भारविः. ७. सर्ग ३५ यांत रामाच्या गुणाचें वर्णन आहे.

कथयित्वा कपिः शंकां तस्याश्चितामपानुदत्. ॥ २५१
'त्वद्भर्तुः प्रि **य** कृद्देवि! सखा सर्वकपीश्वरः ।
महाप्रतापः **सु**ग्रीवः स त्वां **कौ**शलमब्रवीत्. ॥ २५२
सर्वान्रणे **रा** त्रिचरान्हत्वा **स**दशकंधरान् ।
अचिरात्त्वामितो देवि! नेता जेता द्विषां प्रभुः. ॥ २५३
प्रबलाः स **म** रं कर्तुं वानरा मानराशयः ।
अत्रागमिष्यंत्यचिरात्**सु**ग्रीवेण सहामिताः. ॥ २५४
संपातिना **ज** टायोस्त्वमग्रजेन निवेदिता ।
शतयोजनमंभोधिं तीर्त्वैकोऽहमिहागतः. ॥ २५५
रामांगुली **य** मेतत्त्वं गृहाणार्ये! तदर्पितम्.' ।
इत्युक्त्वा स ददौ मुद्रामंजलौ धरणीभुवः. ॥ २५६
तद्गृहीत्वा **ज** नकजा प्रेक्षमाणांगुलीयकम् ।
भर्तारमिव संप्राप्ता मुदिताभूदथाब्रवीत्. ॥ २५७
'कुशली स **य** दि श्रीमान्सानुजो **र**घुसत्तमः ।
किं नु क्षितिं न दहति प्रलयाग्निरिवोत्थितः. ॥ २५८
शक्तिमंतौ **रा** घवौ हि सुराणामपि निग्रहे ।
ममैव तु न दुःखानामस्ति मन्ये विपर्ययः. ॥ २५९
कच्चिन्न प्रे **म** रहितो विवासान्मयि **रा**घवः? ।
कच्चिन्मां व्यसनादस्मात्**का**कुत्स्थो मोचयिष्यति?' ॥ २६०
उवाच तां **श्री** हनुमान्, 'इहस्थां त्वां न वेत्ति सः ।
तेन त्वां नानयत्याशु **श**चीमिव **पु**रंदरः. ॥ २६१
श्रुत्वोक्तं मे **रा** घवस्त्वां क्षिप्रमेष्यति सानुजः ।
चमूं प्रकर्षन्महतीं हर्यृक्षगणसंयुताम्. ॥ २६२
करिष्यति **म** नुष्येंद्रो **लं**कां निहतराक्षसाम् ।

---

१. दूर घालविली, दूर केली. २. कुशलमेव कौशलम्. ३. दशग्रीवसहितान्. ४. मानस्य राशयः मानिन इत्यर्थः चित्तसमुन्नतियुक्ताः. ५. सह अमिताः. ६. धरण्या भवतीति धरणीभूः भूमिजा । तस्याः. ७. कां बरें. ८. वनवास कपाळीं आल्यामुळें मजवरील प्रेम तर नाहींसें झालें नसेल ना? ९. मला या व्यसनांतून सोडवितील ना? 'कच्चित्' याचा अर्थ 'मला आशा आहे' असा आहे. १०. सर्ग ३६ श्लो० २० पहा. ११. तूं येथें आहेस हें जाणत नाहीं म्हणून. १२. अनुह्लाद नांवाच्या दैत्यानें शचीला नेली होती तिला इंद्रानें परत आणिली. [सर्ग ३६ श्लो० ३२ टीका पहा.] १३. हरि+ऋक्ष+गण+संयुताम्.

विष्टंभयित्वा[1] बाणौघैरक्षोभ्यं वरुणालयम्[2]. ॥ २६३

अदर्शन **ज** शोकेन **रा**घवः परिपूरितः ।
न शर्म[3] लभते **सी**ते! सिंहार्दित[4] इव द्विपः. ॥ २६४

यथा सुन **य** नं वक्त्रं पत्युर्द्रक्ष्यसि सत्वरम् ।
तथा शपे[5] **मं**दरेण **विं**ध्येन **म**लयेन च. ॥ २६५

नैव मांसं **रा** मभद्रो भुंक्ते मद्यं न सेवते ।
वन्यं विहितम्[6]अश्नाति भक्तं[7] काले स पंचमे[8]. ॥ २६६

न दंशजं[9] **म** शकजं स्पर्शं जानाति **रा**घवः ।
अहीन्[10]नापनयत्यंगात्त्वद्गतेनांतरात्मना. ॥ २६७

रामोऽनिद्रोऽ**ज**[11] स्रमेव सुप्तोऽपि च कदाचन ।
सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते.' ॥ २६८

तमुवाचा **य** ताक्षी सा, 'यावदेव न पूर्यते ।
अयं संवत्सरः कालस्तावद्धि मम जीवितम्. ॥ २६९

मासोऽय**मं** **ज** नासूनो! वर्तते दशमः खलु ।
रावणेन नृशंसेन ममैष समयः कृतः. ॥ २७०

बिभीषणो **य** त्नपरो मम प्रत्यर्पणं प्रति ।
तेनानुनीतो[12] **दि**क्तुंडो[13] न च तन्मन्यते खलः. ॥ २७१

न रोचते **रा** वणस्य मम प्रत्यर्पणं कपे! ।
अविंध्यस्यापि[14] सद्बुद्धेर्वचो न कुरुते हृदि. ॥ २७२

या **क**ला ना **म** सुमतिर्**बि**भीषणसुता कपे! ।
तया ममैतदाख्यातं मात्रा प्रहितया स्वयम्[15].' ॥ २७३

---

१. स्तंस्तभ्य, सेतुबंधनं कृत्वा. २. समुद्रम्. ३. सुखम्. ४. सिंहपीडितः. हा श्लोक मूळांत आहे. (श्लो० ३७.) ५. आपल्या निवासस्थानाची मी शपथ करतों. ६. आरण्यकशास्त्रबोधितम्. ७. ओदनम्. ८. 'प्रातःसंगवमध्याह्नापराह्णात् पंचमं सायाह्नं प्राप्येत्यर्थः. यद्वा प्रातः सायं प्रातः सायमिति कालचतुष्टयं त्यक्त्वा पंचमे प्रातःकाले इत्यर्थः. दिनद्वयमतीत्य भुंक्ते इत्यर्थः' इति तिलके. [स० ३६ श्लो० ४१.] ९. डास, चिलटें चावलीं तरी रामाला कांहीं समजत नाहीं, कारण तो त्वद्गतांतरात्मा आहे; शरीर मात्र तेथें आहे आणि प्राण येथें. १०. अहीन् (सर्पांला) न अपनयति (अंगावरून दूर करीत नाहीं). ११. सर्वदा. १२. प्रार्थितः १३. दशाननः। बिभीषणाचा वगैरे उपदेश रावणानें ऐकला नाहीं. ही बातमी बिभीषणाच्या बायकोनें आपल्या कला नामक ज्येष्ठ मुलीच्या द्वारें सीतेला कळविली. १४. अविंध्य हा रावणाचा एक मंत्री. १५. सर्ग ३७ श्लोक ११ पहा.

अथोवाच **श्री** मतीं तां **वा**युसूनुर्विचक्षणः, ।
'**सी**ते! श्रुत्वैव मद्वाक्यं क्षिप्रमेष्यति **रा**घवः. ॥ २७४
अथवा त्वां **रा** जकन्ये! मोचयिष्यामि दारुणात् ।
अस्माद्दुःखादुपारोह मम पृष्ठमनिंदिते! ॥ २७५
सरावणा **म** पि पुरीं [1]वोढुं शक्तिर्ममास्ति हि, ।
प्रापयिष्यामि **रा**माय त्वामद्यैव नृपात्मजे!' ॥ २७६
सीतोवा,'**चां ज** नासूनो! [2]कैपित्वमुचितं तव ।
कथमल्पशरीरस्त्वं मामितो नेतुमिच्छसि?' ॥ २७७
तस्याः प्रत्य **य** हेतोः स **मे**रुमंदरसन्निभम् ।
स्वाकारं दर्शयामास तं दृष्ट्वोवाच **जा**नकी. ॥ २७८
'वत्स! वायो **रा** त्मजस्त्वं गतिर्दीप्तिश्च तेऽद्भुता ।
प्राकृतोऽन्यः कथं चेमां भूमिमागंतुमर्हति? ॥ २७९
अयुक्तं तु **म** या गंतुं कपिश्रेष्ठ! त्वया सह ।
भवतो वायुवेगस्य वेगो मां मोहयिष्यति. ॥ २८०
प्रपतेयं **ज** लनिधौ पृष्ठाद्वेगवतस्तव ।
भवेयमाशु [3]विवशा [4]यादसामन्नमुत्तमम्. ॥ २८१
नाहमिच्छे **य** मन्यस्य गात्रं स्प्रष्टुं स्वतः कपे! ।
अनीशा चाप्यनाथा च रक्षःस्पर्शं तदा गता. ॥ २८२
यदि **रा**मो **ज** गन्नाथो हत्वेह **द**शकंधरम् ।
गृहीत्वा मामितो गच्छेत्तत्तस्य सदृशं भवेत्.'[5] ॥ २८३
स **आं**जने **य** स्तामाह, 'त्वयोक्तं शुभदर्शने! ।
[6]सदृशं [7]स्त्रीस्वभावस्य साध्वीनां विनयस्य च. ॥ २८४
[8]अभिज्ञानं **रा** जपुत्रि! प्रयच्छ त्वमपि प्रभोः ।
येन प्राप्तप्रत्ययं सत्प्रसन्नं भविता मनः.' ॥ २८५

---

१. वह्+तुम्=वाहून नेण्यासाठीं. २. मी आपल्या पाठीवर बसवून तुला समुद्रापलीकडे घेऊन जातों असें मारुतीनें म्हटलें तेव्हां एवढासा वानर मला (सीतेला) कसा घेऊन जाईल, ही सर्व माकडचेष्टा आहे, असें मनांत समजून सीता मारुतीला म्हणते:—माकडपणा तुला योग्य आहे. सीता मारुतीच्या पाठीवर बसून कां गेली नाहीं याचें खरें कारण एवढेंच कीं रावणाचा वधकाळ, तसें करण्यानें, बराच लांबला असता. ३. विवशा=व्याकुला. ४. यादस् शब्दाची षष्ठी. जलजंतूनाम्. ५. सर्ग ३७ श्लोक ३०-६४ पहा. ६. अनुरूपम्. ७. भीरुत्वादेः (स्वभावस्य). ८. सर्ग ३८ श्लोक २-१० पहा.

देव्युवाच, '**म** हेंद्रस्य पुत्रः काकः स मां पुरा ।
चित्रकूटेऽसकृत्तात! व्यदारयत[1] दुर्मतिः. ॥ २८६
ब्रह्मास्त्रेण **श्री** मताशु दर्भे संयोज्य **मा**रुते! ।
प्रक्षिप्ते वायसस्त्रस्तस्त्रिजगत्सु परिभ्रमन्. ॥ २८७
स त्राणमो[2] **रा** ज्जनकादी[3]श्वरात्परमेष्ठिनः[4] ।
अप्राप्य शरणं **रा**मं प्राप्तो मुक्तोऽक्षिदानतः. ॥ २८८
एतदेक **म** भिज्ञानमिमं चूडामणिं[5] च मे ।
नय दर्शय **रा**माय सत्यप्रत्ययकारकम्.' ॥ २८९
एवमुक्तोऽ **ज** नासूनुर्नत्वा तां विश्वमातरम् ।
मणिमाशिषमादाय गमनायोपचक्रमे. ॥ २९०
तमुवाचा **य** ताक्षी सा बाष्प[6]गद्गदया गिरा, ।
'हनूमन्कुशलं ब्रूयाः सहितौ **रा**मलक्ष्मणौ. ॥ २९१
प्लवंगवी **रा** धिपतिं **सु**ग्रीवं सचिवैर्युतम् ।
वृद्धान्सर्वान्कपींश्चापि ब्रूयास्त्वं कुशलं कपे! ॥ २९२
यथा च स **म** हाबाहुर्मां तारयति **रा**घवः ।
अस्माद्दुःखांबुधेः शीघ्रं त्वं तथा कर्तुमर्हसि. ॥ २९३
प्लवंगमा **ज** लनिधिं तरिष्यंति कथं नु ते? ।
तरिष्यतः कथं तौ च दुस्तरं **रा**मलक्ष्मणौ?' ॥ २९४
तदांजने **य** स्तामाह **सु**ग्रीवो वानरेश्वरः ।
सखा **रा**मस्य सत्वाढ्यस्तवार्थे कृतनिश्चयः. ॥ २९५
कोटिशस्ते **ज** सा पूर्णाः सत्ववंतो महाबलाः ।
मनः[7]संकल्पसंपाता निदेशे तस्य वानराः. ॥ २९६
मत्तुल्यास्ते **य** त्नशीला मद्विशिष्टाश्च वानराः ।
मत्तः कोऽपि न हीनोऽयमहं तावदिहागतः. ॥ २९७
किं पुनस्ते **रा** ज्ञि! वीरा महाबलपराक्रमाः ।
न हि प्रकृष्टाः प्रेष्यंते प्रेष्यंते हीतरे जनाः. ॥ २९८
एष्यंति ते **म** हालंकामेकोत्पातेन **जा**नकि! ।
मम पृष्ठगतौ[8] तौ च नृसिंहावागमिष्यतः ॥ २९९

---

१. व्यदारयत. २. आरात् जनकात्=जनकसकाशात्=इंद्रात्. ३. महादेवात् विष्णोर्वा. ४. ब्रह्मणः, पितामहात्. ५. शिरोभूषणम्. ६. रडण्यामुळें जिच्या तोंडांतून शब्द तुटक तुटक निघत होते अशा वाणीनें. ७. मनःसंकल्पवदतिदूरपतनशीलाः. ८. सर्ग ३९ श्लोक ७-४१ पहा.

त्वां नेष्यतः[1] **श्री** मदीशौ हत्वा **रा**वणमाहवे ।
शपे सत्येन ते देवि! **लं**कां भस्मीकरिष्यतः.[2]' ॥ ३००
इत्युक्त्वा तां **रा** जसुतां नत्वा निर्गत्य **मा**रुतिः ।
बभंज तद्वनं कर्तुं युद्धं द्रष्टुं **द**शाननम्. ॥ ३०१
राक्षसीनां **म** हद्रूपं स चकार भयावहम्[3] ।
तास्तं दृष्ट्वा महाकायं पप्रच्छुर्**ज**नकात्मजाम्. ॥ ३०२
'कोऽयं जल **ज** पत्राक्षि! किंनिमित्तमिहागतः ।
संवादश्च[4] कृतोऽनेन त्वया तत्कथयाखिलम्.' ॥ ३०३
उवाच न्या[5] **य** निपुणा रक्षसां कामरूपिणाम्, ।
'विज्ञाने मम का शक्तिर्नैव जानामि को ह्ययम्. ॥ ३०४
भीतास्म्येनं **रा** त्रिचरं वेद्म्यहं कामरूपिणम् ।
यूयमेवास्य जानीत योऽयं यद्वा करिष्यति. ॥ ३०५
अहिरेव **मं**[6] तो ज्ञातुमहेः पादान्न संशयः.' ।
इत्युक्तास्तास्ततो भीता राक्षस्यो **रा**वणं गताः. ॥ ३०६
शशंसू र **ज** नीचर्यो, 'वानरः कश्चिदागतः ।
[8]**जा**नक्या कृतसंवादस्तिष्ठत्यमितविक्रमः. ॥ ३०७
राजन्! सा तो **य** जाक्षी तं प्लवगं कृतसाहसम् ।
नास्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति. ॥ ३०८
शक्रस्य **रां**[9] **ज** राजस्य दूतो वायं महाबलः ।
प्रेषितो वापि **रा**मेण [10]**सी**तान्वेषणकांक्षया. ॥ ३०९
तेनैवाद्य **य** दत्यंतं प्रियं तव मनोहरम् ।
नानामृगखगाकीर्णं नाशितं प्रमदावनम्[11]. ॥ ३१०

---

१. नी+लुट् स्यतः । नेतील. २. भस्मन्+कृ+च्विप्र०+लुट्स्यतः । 'भस्मीकृ' हा नामधातु आहे । भस्म करतील । 'कृभ्वस्तियोगे संपद्यकर्तरि च्विः' । ५।४।५० अभूततद्भाव इति वक्तव्यम्. ३. राक्षसींना भयप्रद. [स० ४२ श्लो० ४.] ४. 'सीतायास्तद्दर्शनेऽपि निर्भयप्रसन्नमुखतया अवस्थानदर्शनात् अयं कश्चित् एतत्परिचित एतद्वृत्तांतज्ञानार्थमेव प्रायेणागत इति संभाव्य अनया संवादकरणं च संभाव्य तत्प्रश्ननिर्वाहः' इति कतकः. (श्लो० ६.) ५. कालोचितव्यवहारकुशला. ६. योग्यः. ७. सर्ग ४२ श्लोक ९ पहा. ८. जानक्या सह. ९. यक्षाधिपस्य. १०. सीतायाः अन्वेषणविषये (परिमार्गणे) कांक्षा (आकांक्षा) तया. ११. प्रमदाया उचितं वनम् । अंतःपुरसेवनयोग्यं वनम्.

विष्टंभयित्वा[1] बाणौघैरक्षोभ्यं वरुणालयम्[2]. ॥ २६३

अदर्शन **ज** शोकेन **रा**घवः परिपूरितः ।
न शर्म[3] लभते **सी**ते! सिंहार्दित[4] इव द्विपः. ॥ २६४

यथा सुन **य** नं वक्रं पत्युर्द्रक्ष्यसि सत्वरम् ।
तथा शपे[5] **मं**दरेण **विं**ध्येन **म**लयेन च. ॥ २६५

नैव मांसं **रा** मभद्रो भुंक्ते मद्यं न सेवते ।
वन्यं विहित[6]मश्नाति भक्तं[7] काले स पंचमे[8]. ॥ २६६

न दंश[9]जं **म** शकजं स्पर्शं जानाति **रा**घवः ।
अहीन्[10]नापनयत्यंगात्त्वद्गतेनांतरात्मना. ॥ २६७

रामोऽनिद्रोऽज[11]स्रमेव सुप्तोऽपि च कदाचन ।
सीतेति मधुरां वाणीं व्याहरन्प्रतिबुध्यते.' ॥ २६८

तमुवाचा **य** ताक्षी सा, 'यावदेव न पूर्यते ।
अयं संवत्सरः कालस्तावद्धि मम जीवितम्. ॥ २६९

मासोऽयमं **ज** नासूनो! वर्तते दशमः खलु ।
रावणेन नृशंसेन ममैष समयः कृतः. ॥ २७०

बिभीषणो **य** त्नपरो मम प्रत्यर्पणं प्रति ।
तेना[12]नुनीतो **दि**क्तुंडो[13] न च तन्मन्यते खलः. ॥ २७१

न रोचते **रा** वणस्य मम प्रत्यर्पणं कपे! ।
अविंध्य[14]स्यापि सद्बुद्धेर्वचो न कुरुते हृदि. ॥ २७२

या कला ना **म** सुमतिर्**बि**भीषणसुता कपे! ।
तया ममैतदाख्यातं मात्रा प्रहितया स्वयम्[15].' ॥ २७३

---

१. स्तंस्तभ्य, सेतुबंधनं कृत्वा. २. समुद्रम्. ३. सुखम्. ४. सिंहपीडितः. हा श्लोक मूळांत आहे. (श्लो० ३७.) ५. आपल्या निवासस्थानाची मी शपथ करतों. ६. आरण्यकशास्त्रबोधितम्. ७. ओदनम्. ८. 'प्रातःसंगवमध्याह्नापराह्णात् पंचमं सायाह्नं प्राप्येत्यर्थः. यद्वा प्रातः सायं प्रातः सायमिति कालचतुष्टयं त्यक्त्वा पंचमे प्रातःकाले इत्यर्थः. दिनद्वयमतीत्य भुंक्ते इत्यर्थः' इति तिलके. [स० ३६ श्लो० ४१.] ९. डास, चिलटें चावलीं तरी रामाला कांहीं समजत नाहीं, कारण तो त्वद्गतांतरात्मा आहे; शरीर मात्र तेथें आहे आणि प्राण येथें. १०. अहीन् (सर्पांला) न अपनयति (अंगावरून दूर करीत नाहीं). ११. सर्वदा. १२. प्रार्थितः १३. दशाननः। बिभीषणाचा वगैरे उपदेश रावणानें ऐकला नाहीं. ही बातमी बिभीषणाच्या बायकोनें आपल्या कला नामक ज्येष्ठ मुलीच्या द्वारें सीतेला कळविली. १४. अविंध्य हा रावणाचा एक मंत्री. १५. सर्ग ३७ श्लोक ११ पहा.

[1]द्वित्राः [2]क्षत **ज** दिग्धांगा [3]हतशेषा निशाचराः ।
निहतान्किंकरान्सर्वान्**रा**वणाय न्यवेदयन्. ॥ ३२२

[4]प्रहस्तका **य** जं राजा प्राहिणो**ज्जं**बुमालिनम् ।
अत्रांतरे कपिर्भंक्त्वा [5]चैत्यप्रासादमद्भुतम्. ॥ ३२३

चैत्यस्तंभं **रा** मदूतो [6]गृहीत्वा हंतुमागतान् ।
[7]चैत्यपालाञ्शतं तेन जघान रजनीचरान्. ॥ ३२४

[8]विश्राव्य ना **म** कार्यं च **जं**बुमालिनमागतम् ।
प्रगृह्य परिघं घोरं तं जघा**ना**[9]निलात्मजः. ॥ ३२५

तदाकर्ण्य **श्री** दबंधुः सप्तान्यान्मंत्रिनंदनान् ।
प्रेषयामास सबलान्स तानपि [10]यमंक्षयम्. ॥ ३२६

सेनापतीन् **रा** क्षसेंद्रो [11]दुर्धर्षप्रमुखांस्ततः ।
[12]पंचे प्रहितवान्क्रुद्धः समरे [13]दृष्टविक्रमान्. ॥ ३२७

जघान स **म** रे! तानप्यतितेजा **म**रुत्सुतः ।
[14]कुमारमक्षं च ततश्चोदयामास **रा**वणः. ॥ ३२८

अक्षमप्यं ज नापुत्रो धृत्वा चरणयोर्बलात् ।
आविध्य व्योम्नि चिक्षेप व्यसुं [15]तार्क्ष्य इवोरगम्. ॥ ३२९

ज्येष्ठं तन **य** मिंद्रस्य [16]जेतारं **रा**वणस्ततः ।
मारुतेः प्रेषयामास निग्रहा[17]र्यास्त्रविद्वरम्. ॥ ३३०

स तेजस्वी **रा** क्षसेंद्रं नत्वा कृत्वा प्रदक्षिणम् ।
[18]व्यालैश्चतुर्भिर्युक्तं स्वं रथमारुह्य निर्ययौ. ॥ ३३१

---

१. द्वौ वा त्रयो वा द्वित्राः । 'बहुव्रीहौ संख्येये डच्' ५।४।७३. २. क्षतज+दिग्ध+अङ्ग+प्र०=रक्ताक्तदेहाः । रक्तबंबाळ ज्यांचीं अंगें झालीं आहेत असे. ३. हताः शेषो येषां ते । शिल्लक राहिलेले. ४. प्रहस्त हा रावणाचा सेनापति होता. त्याच्या जंबुमालि नांवाच्या पुत्राला. ५. विश्रामासाठीं बांधलेला महाल. रक्षःकुलदेवताप्रासाद. ६. उत्पाटयित्वा. ७. विश्रामस्थानरक्षकान्. ८. कळवून. ९. सर्ग ४४ श्लोक १६ पहा. १०. यमालयम्. ११. दुर्धर्षः प्रमुखो येषां ते तान्. १२. विरूपाक्ष, यूपाक्ष, दुर्धर्ष, प्रघस, भासकर्ण—असे पांच सेनाग्रनायक. [स० ४६ श्लो० २.] १३. दृष्टा विक्रमा येषां ते तान्. १४. रावणानें आपला अक्ष नांवाचा मुलगा पाठविला. [स० ४७ श्लो० १.] १५. गरुड. १६. सर्ग ४८ पहा. १७. अस्त्राणि विदंति इति अस्त्रविदस्तेषु वरस्तम्. १८. सर्पैः.

इंद्रजित्सं[1] **म** रश्लाघी **मा**रुतिश्च महाबलः ।
यक्षसिद्धर्षयो द्रष्टुं तयोर्युद्धं समागताः. ॥ ३३२

समेतावं[2] **ज** नामंदोदरीपुत्रौ महाबलौ ।
सुरासुरेंद्राविव[3] तौ बद्धवैरौ विशारदौ. ॥ ३३३

अवध्यं सं **य** ति ज्ञात्वा[4] ब्रह्मास्त्रेणेंद्रजित्कपिम् ।
बबंधाथ स निश्चेष्टोऽभवद्भुव्यपतत्[5]तदा. ॥ ३३४

मारुतिः कं[6] **ज** जास्त्रं तद्बुद्ध्वात्मनि कृतास्पदम्[7] ।
मुहूर्तमात्रान्मुक्तिं च ज्ञात्वासीन्मिषविह्वलः[8]. ॥ ३३५

'नैवास्ति भ **य** मस्त्रान्मे बद्धस्येषदपि स्फुटम् ।
पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च[9]. ॥ ३३६

ग्रहणेऽथो **रा** क्षसैश्च महन्मे गुणदर्शनम् ।
राक्षसेंद्रेण संवादस्तस्माद्गृह्णंतु मां परे. ॥ ३३७

निश्चितार्थं **म** नस्येवं बबंधुः शणरज्जुभिः[10] ।
स मुक्तोऽस्त्रेण, सहते नास्त्रबंधोऽन्यबंधनम्[11]. ॥ ३३८

ना[12] सा जय **श्री** रिति तं दृष्ट्वा बद्धं निशाचरैः ।
मेने मनस्यगाच्चिंतामस्त्रतत्त्वविदिंद्रजित्. ॥ ३३९

---

१. समरे श्लाघते यः सः । युद्धाचे प्रसंगीं फुशारकी मारतो. २. अंजनापुत्र व मंदोदरीपुत्र हे दोघे. ३. सुरेंद्र व असुरेंद्र यांप्रमाणें. ४. समाधिबलात् हनुमान् अवध्य आहे असें इंद्रजिताला कळल्यावरून मारुतीच्या निग्रहास्तव उपाय योजूं लागला, तेव्हां त्यानें ब्रह्मास्त्राचा प्रयोग केला । पितामहाच्या अस्त्राचा अपमान होऊं नये यासाठीं मारुतीनें आपण अस्त्रप्रभावबद्ध झालों असें ढोंग केलें, इतक्यांत इंद्रजिताच्या परिचारकांनीं शणरज्जूंनीं मारुतीला बांधला, त्यामुळें अस्त्रप्रभावामुळें झालेल्या बंधांतून मारुति मोकळा झाला, ही गोष्ट इंद्रजिताच्या लक्ष्यांत येऊन त्याची पांचावर धारण बसली, परंतु मारुतीच्या मनांतील कावा निराळाच असल्यामुळें रावणाला भेटून चार शब्द त्याच्याशीं बोलावे अशी मारुतीची फार इच्छा होती म्हणून तो तसाच रज्जुबद्ध होऊन राहिला. ५. भुवि अपतत्. ६. कंजज+अस्त्र=विष्णूच्या नाभिकमलापासून झालेला ब्रह्मदेव+अस्त्र. ७. कृतं आस्पदं येन तत् । ज्याचा प्रभाव आपणावर झाला आहे असें. ८. ढोंगानें विव्हल झाला. ९. सर्ग ४८ श्लो० ४३-४४ पहा. १०. सन किंवा बोरूचा ताग. ११. 'मंत्रबंधो इतरबंधेन सह न तिष्ठति । तस्मिन् सति मंत्रबंधो नश्यतीत्यर्थः ।' [सर्ग ४८ श्लोक ४८ टीका.] १२. ना=न । मंत्रबंध नाहींसा होण्याबरोबर इंद्रजिताला मोठी चुरचुर लागली, कारण 'अस्त्रे ब्राह्मे विहते पुनरन्यदस्त्रं तदस्त्रप्रयोगानंतरं न प्रवर्तते'.

स राक्षसै **रा** वणस्य समीपं हृष्टमानसैः ।
क्षिपद्भिस्ताडयद्भिश्च प्राकृष्यत कुबुद्धिभिः. ॥ ३४०

इंद्रजित्तं **म** हावीर्यमस्त्रमुक्तं प्लवंगमम् ।
रज्जुबद्धं रावणाय सगणाय व्यदर्शयत्. ॥ ३४१

दृष्ट्वा तं रा[१] **ज** राजस्य भ्रातरं कपिपंडितः ।
मनसा चिंतयामास तेजसा तस्य मोहितः. ॥ ३४२

'अस्मिन्नेको **य** द्यधर्मो न स्याद्राक्षसनायके ।
स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता.' ॥ ३४३

प्रहस्तस्तं **रा** वणस्य निदेशादिदमब्रवीत्, ।
'समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे! ॥ ३४४

प्रेषितोऽसि **म** हेंद्रेण **कुबेरेण यमेन** वा ।
वरुणेनालयं राज्ञो दूतस्त्वं **विष्णु**नाथवा. ॥ ३४५

नैव त्वं ते **ज** सा भासि रूपमात्रेण वानरः ।
मोक्षः सत्यादसत्यात्तु दुर्लभं तव जीवितम्. ॥ ३४६

रावणाल **य** एतस्मिन्प्रवेशोऽद्य त्वया कपे! ।
किंनिमित्तः कुतो ब्रूहि तत्वतो, मोक्ष्यसे ततः.' ॥ ३४७

अब्रवीद्[२] **ज** नापुत्रस्तदा रक्षोगणेश्वरम् ।
तेजसा भगवान्नंदी[३] बाणो[४] वेति विशंकितम्[५]. ॥ ३४८

१.कुबेरस्य. राज्ञां (यक्षाणां) राजा राजराजः=कुबेरः. ['राजराजो धनाधिपः' इत्यमरः । 'राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः.] २. सर्ग ५० श्लो० ७:११ पहा. ३. पुष्पक विमानाचा गतिनिरोध शिवपार्वती क्रीडावनांतून जात असतां झाला, तेव्हां नंदीनें पुढें येऊन रावणाला सांगितलें कीं, 'एथें शिवपार्वती क्रीडा करित आहेत, तूं विमान दुसरीकडे वळीव.' त्यावेळीं नंदीची रावणानें थट्टा केली व त्यामुळें नंदीचा शाप झाला होता कीं, 'वानर तुझा नाश करतील.' ती आठवण आतां रावणाला झाली. नंदी हा कामधेनूचा पुत्र आणि शिवगणांतील एक. याची आकृति मनुष्यासारखी असून मुख मात्र वानरासारखें होतें. [मोरोपंत–मंत्ररामायण–उत्तरकांड–गीति ६६.७१ पृष्ठ १७३.] ४. बाण हा बलिराजाचा पुत्र, याला महेश्वरभक्त असल्यामुळें नंदीनें पाठविला कीं काय अशी शंका आली. ५. विशेषण शंकितः (शंका संजाता अस्येति) तम् । रावणमित्यर्थः । मानी रावण स्वतः मारुतीशीं बोलला नाहीं, पण त्यानें आपला मंत्रिश्रेष्ठ जो प्रहस्त त्याला सर्व विचारायाला सांगितलें. मारुतीनें प्रहस्ताच्या प्रश्नाचें उत्तर रावणाला दिलें.

इंद्रजित्सं[1] **म**रश्लाघी **मा**रुतिश्च महाबलः ।
यक्षसिद्धर्षयो द्रष्टुं तयोर्युद्धं समागताः. ॥ ३३२
समेतावं[2] **ज**नामंदोदरीपुत्रौ महाबलौ ।
सुरासुरेंद्राविव[3] तौ बद्धवैरौ विशारदौ. ॥ ३३३
अवध्यं सं **य**ति ज्ञात्वा[4] ब्रह्मास्त्रेणेंद्रजित्कपिम् ।
बबंधाथ स निश्चेष्टोऽ[5]भवद्भुव्यपतत्तदा. ॥ ३३४
मारुतिः [6]कं **ज**जास्त्रं तद्बद्धात्मनि [7]कृतास्पदम् ।
मुहूर्तमात्रान्मुक्तिं च ज्ञात्वासी[8]न्मिषविह्वलः. ॥ ३३५
'नैवास्ति भ **य**मस्त्रान्मे बद्धस्येषदपि स्फुटम् ।
पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च[9]. ॥ ३३६
ग्रहणेऽथो **रा**क्षसैश्च महन्मे गुणदर्शनम् ।
राक्षसेंद्रेण संवादस्तस्माद्गृह्णंतु मां परे. ॥ ३३७
निश्चितार्थं **म**नस्येवं बबंधुः [10]शणरज्जुभिः ।
स मुक्तोऽस्त्रेण, सहते ना[11]स्त्रबंधोऽन्यबंधनम्. ॥ ३३८
ना[12] सा जय **श्री**रिति तं दृष्ट्वा बद्धं निशाचरैः ।
मेने मनस्यगाच्चिंतामस्त्रतत्त्ववि**द्रिं**द्रजित्. ॥ ३३९

---

१. समरे श्लाघते यः सः । युद्धाचे प्रसंगीं फुशारकी मारतो. २. अंजनापुत्र व मंदोदरीपुत्र हे दोघे. ३. सुरेंद्र व असुरेंद्र यांप्रमाणें. ४. समाधिवलात् हनुमान् अवध्य आहे असें इंद्रजिताला कळल्यावरून मारुतीच्या निग्रहास्तव उपाय योजूं लागला, तेव्हां त्यानें ब्रह्मास्त्राचा प्रयोग केला । पितामहाच्या अस्त्राचा अपमान होऊं नये यासाठीं मारुतीनें आपण अस्त्रप्रभावबद्ध झालों असें ढोंग केलें, इतक्यांत इंद्रजिताच्या परिचारकांनीं शणरज्जूंनीं मारुतीला बांधला, त्यामुळें अस्त्रप्रभावामुळें झालेल्या बंधांतून मारुति मोकळा झाला, ही गोष्ट इंद्रजिताच्या लक्ष्यांत येऊन त्याची पांचावर धारण बसली, परंतु मारुतीच्या मनांतील कावा निराळाच असल्यामुळें रावणाला भेटून चार शब्द त्याच्याशीं बोलावे अशी मारुतीची फार इच्छा होती म्हणून तो तसाच रज्जुबद्ध होऊन राहिला. ५. भुवि अपतत्. ६. कंजज+अस्त्र=विष्णूच्या नाभिकमलापासून झालेला ब्रह्मदेव+अस्त्र. ७. कृतं आस्पदं येन तत् । ज्याचा प्रभाव आपणावर झाला आहे असें. ८. ढोंगानें विव्हल झाला. ९. सर्ग ४८ श्लो० ४३-४४ पहा. १०. सन किंवा बोरूचा ताग. ११. 'मंत्रबंधो इतरबंधेन सह न तिष्ठति । तस्मिन् सति मंत्रबंधो नश्यतीत्यर्थः ।' [सर्ग ४८ श्लोक ४८ टीका.] १२. ना=न । मंत्रबंध नाहींसा होण्याबरोबर इंद्रजिताला मोठी चुरचुर लागली, कारण 'अस्त्रे ब्राह्मे विहते पुनरन्यदस्त्रं तदस्त्रप्रयोगानंतरं न प्रवर्तते'.

स राक्षसै **रा** वणस्य समीपं हृष्टमानसैः ।
क्षिपद्भिस्ताडयद्भिश्च प्राकृष्यत कुबुद्धिभिः. ॥ ३४०
इंद्रजित्तं **म** हावीर्यमस्त्रमुक्तं प्लवंगमम् ।
रज्जुबद्धं **रावणाय** सगणाय व्यदर्शयत्. ॥ ३४१
दृष्ट्वा तं **रा[१] ज** राजस्य भ्रातरं कपिपंडितः ।
मनसा चिंतयामास तेजसा तस्य मोहितः. ॥ ३४२
'अस्मिन्नेको **य** द्यधर्मो न स्याद्राक्षसनायके ।
स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता.' ॥ ३४३
प्रहस्तस्तं **रा** वणस्य निदेशादिदमब्रवीत्, ।
'समाश्वसिहि भद्रं ते न भीः कार्या त्वया कपे! ॥ ३४४
प्रेषितोऽसि **म** हेंद्रेण **कुबेरेण यमेन** वा ।
वरुणेनालयं राज्ञो दूतस्त्वं **विष्णु**नाथवा. ॥ ३४५
नैव त्वं ते **ज** सा भासि रूपमात्रेण वानरः ।
मोक्षः सत्यादसत्यात्तु दुर्लभं तव जीवितम्. ॥ ३४६
रावणाल **य** एतस्मिन्प्रवेशोऽद्य त्वया कपे! ।
किंनिमित्तः कृतो ब्रूहि तत्वतो, मोक्ष्यसे ततः.' ॥ ३४७
अब्रवीदं **ज** नापुत्रस्तदा रक्षोगणेश्वरम् ।
तेजसा भग[३]वान्नंदी **बा[४]णो** वेति विशंकित[५]म्. ॥ ३४८

१.कुबेरस्य. राज्ञां (यक्षाणां) राजा राजराजः=कुबेरः. ['राजराजो धनाधिपः' इत्यमरः । 'राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः.] २. सर्ग ५० श्लो० ७:११ पहा. ३. पुष्पक विमानाचा गतिनिरोध शिवपार्वती क्रीडावनांतून जात असतां झाला, तेव्हां नंदीनें पुढें येऊन रावणाला सांगितलें कीं, 'एथें शिवपार्वती क्रीडा करित आहेत, तूं विमान दुसरीकडे वळीव.' त्यावेळीं नंदीची रावणानें थट्टा केली व त्यामुळें नंदीचा शाप झाला होता कीं, 'वानर तुझा नाश करतील.' ती आठवण आतां रावणाला झाली. नंदी हा कामधेनूचा पुत्र आणि शिवगणांतील एक. याची आकृति मनुष्यासारखी असून मुख मात्र वानरासारखें होतें. [मोरोपंत–मंत्ररामायण–उत्तरकांड–गीति ६६.७१ पृष्ठ १७२.] ४. बाण हा बलिराजाचा पुत्र, याला महेश्वरभक्त असल्यामुळें नंदीनें पाठविला कीं काय अशी शंका आली. ५. विशेषण शंकितः (शंका संजाता अस्येति) तम् । रावणमित्यर्थः । मानी रावण स्वतः मारुतीशीं बोलला नाहीं, पण त्यानें आपला मंत्रिश्रेष्ठ जो प्रहस्त त्याला सर्व विचारायाला सांगितलें. मारुतीनें प्रहस्ताच्या प्रश्नाचें उत्तर रावणाला दिलें.

'न शक्रस्य **य**मस्याहं **श्री**दस्य **व**रुणस्य वा ।
जात्यैव कश्चित्प्लवगो **वि**ष्णुना नास्मि चोदितः. ॥ ३४९

अत्रागतो **रा**[1]वणस्य दर्शनार्थमहं कपिः ।
तदिदं दुर्लभं, ते[2]नें नाशितं प्रमदावनम्. ॥ ३५०

रक्षोभिस्तु **म**या युद्धं रक्षार्थं कृ[3]तमात्मनः ।
त्वामेव द्रष्टुकामेन [4]ब्रम्हास्त्रमनुवर्तितम्. ॥ ३५१

तवांतिकं **श्री रा**मस्य कार्येणाहमिहागतः ।
प्रेषितोऽस्मि हरींद्रेण सुग्रीवेण महात्मना. ॥ ३५२

स त्वां [5]भ्राता **रा**क्षसेंद्र ! स्वयं कुशलमब्रवीत् ।
भ्रातुःशृणु [6]समादेशमिह चामुत्र च [7]क्षेमम्. ॥ ३५३

[8]हरेः सखा **म**हातेजा राजा दशरथः श्रुतः ।
तस्य ज्येष्ठः सुतो रामः प्रभुः सत्यपराक्रमः. ॥ ३५४

तस्य प्रिया **ज**नकजा लक्ष्मणस्तत्समोऽनुजः ।
स ताभ्यां दंडकारण्यमागतः पितुराज्ञया. ॥ ३५५

तद्भार्या प्रे **य**ता नष्टा जनस्थाने पतिव्रता ।
स सानुजो मार्गयंस्तामृष्यमूकाद्रिमागतः. ॥ ३५६

सलक्ष्मणो **रा**म भद्रः सुग्रीवेणाथ संगतः ।
तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणम्. ॥ ३५७

सुग्रीवस्य **म**नुष्याणामिंद्रेणापि महात्मना ।
राघवेण प्रतिज्ञातं [10]हरिराज्यं [11]निवेदितुम्. ॥ ३५८

प्रभुणा रा **ज**पुत्रेण हत्वा वालिनमाहवे ।
सुग्रीवः स्थापितो राज्ये हर्यक्षाणां गणेश्वरः. ॥ ३५९

प्रभुणा सं **य**ति हतः शरेणैकेन रावण ! ।

---

१. लोकांना रडविणारा जो रावणनामा राक्षस त्याच्या. २. त्याकारणास्तव. ३. सर्ग ५० श्लोक १४-१८ पहा. ४. ब्रह्मास्त्राला अनुसरून आचरण केलें आहे. ५. काखेंत दाबून सप्तसमुद्रांचें स्नान घडविणाऱ्या वालीची व सुग्रीवाची ही मैत्री कसीतरी रावणानें संपादन केली होती, त्यामुळें आतां मारुति 'भ्राता' हें पद योजतो हें स्पष्ट आहे. अशा प्रकारानें 'भ्राता' ह्मणणें हें स्नेहप्रदर्शक लौकिक प्रचाराचें सूचक होय. ६. संदेशवचनम्. ७. सुखसंपादकम्. ८. इंद्रस्य. ९. पवित्रा. १०. कपिराज्यम्. ११. अर्पण करण्याकरितां.

त्वया विज्ञातपूर्वः[1] स **वा**ली वानरपुंगवः[2]. ॥ ३६०
तामन्वेष्टुं **ज** नकजां कोटिशः सत्यसंगरः[3] ।
हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः. ॥ ३६१
अहं तु प **य** सां राशिं शतयोजनमायतम् ।
लंघयित्वा प्रभोर्भार्यां तां दिदृक्षुरिहागतः. ॥ ३६२
भ्रमता सा **रा** ज कन्या दृष्टा तव गृहे मया ।
परदारान्महाप्राज्ञ ! नोपरोद्धुं त्वमर्हसि. ॥ ३६३
सतामसं **म** ते घोरे सर्वधर्मार्थनाशके ।
न हि कर्मणि सज्जंते बुद्धिमंतो भवद्विधाः[4]. ॥ ३६४
राघवस्य **श्री** मतः को **ल**क्ष्मणस्य च धीमतः ।
शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि. ॥ ३६५
यो व्यलीकं[5] **रा** घवस्य कृत्वा सुखमवाप्नुयात् ।
राजंस्त्रिष्वपि लोकेषु विद्यते न स कश्चन. ॥ ३६६
त**द्रा**वण ! **म** या प्रोक्तं त्रिकालहितमर्थवत्[6] ।
धर्म्यं मन्यस्व वचनं **जा**नकी प्रतिदीयताम्. ॥ ३६७
नेयं शक्या **जँ**[7] रयितुं सासुरैरमरैरपि ।
विषसंपृक्तमत्यर्थं[8] भुक्तमन्नमिवौजसा[9]. ॥ ३६८
अवध्यत्वं **य** दप्यस्ति धर्मस्तत्र हि कारणम् ।
तस्मात्त्वया धर्महानिर्न कार्या राक्षसाधिप[10]! ॥ ३६९
जनस्थाने **रा** क्षसानां विनाशं **वा**लिनस्तथा ।
राम**सु**ग्रीवसख्यं च बुद्ध्वा त्वं स्वहितं कुरु. ॥ ३७०
एकः काम **म** हं **लं**कां शक्तो नाशयितुं खलु ।
प्रभोराज्ञां विना नैतन्मया कार्यं **द**शानन ! ॥ ३७१
प्रतिज्ञात **ज** नेंद्रेण हर्यक्षगणसंनिधौ ।
उत्सादनममित्राणां **जा**नकी यैः प्रधर्षिता. ॥ ३७२

---

१. ही रावणाला झोंबणारी मर्मोक्ति आहे. तुला पूर्वींच चांगला माहीत असलेला । पूर्वं विज्ञातो यः सः । पूर्व शब्दाचा एथें परनिपात झाला. २. वानरश्रेष्ठ. ३. सत्यः संगरः (प्रतिज्ञा) यस्य सः । ४. सर्ग ५१ श्लोक ७-१८ पहा. ५. अपराध. (सर्ग ५१ श्लोक २० टीका.) ६. शास्त्रानुगतम्. ७. जिरविण्याला, पचविण्याला. ८. विषाचा संपर्क ज्याला झाला आहे असें. ९. आहारशक्तिबलेन. (हा श्लोक मूळांत आहे. स० ५१ श्लो० २४.) १०. राक्षसांचा स्वामी.

त्वद्गृहे ये[1] **य** मानीता रुद्रा तिष्ठति **रा**वण! ।
कालरात्रीति तां विद्धि सर्वे[2]लंकाविनाशिनी. ॥ ३७३

अ[3]पकुर्वन् **ज** गद्भर्तुः साक्षादपि पु[4]रंदरः ।
न सुखं प्राप्नुयादन्यः किं पुनस्त्वद्विधो जनः ॥ ३७४

जगतां त्र **य** मप्येतद्राजन्! संहृत्य लीलया ।
पुनरेव तथा स्रष्टुं शक्तो **रा**मो महाबलः. ॥ ३७५

सलक्ष्मणं **रा** घवं यः प्रतियुध्येत **रा**वण! ।
सर्वथा सर्वभूतेषु सर्वकालेषु नास्ति सः ॥ ३७६

विष्णुना स **म** शीलस्य कृत्वा विप्रियमीदृशम् ।
रामस्य राजसिंहस्य दुर्लभं तव जीवितम्[5].' ॥ ३७७

वातसूनोः **श्री** मतस्तच्छ्रुत्वा वचनमु[6]द्धतः ।
आज्ञापयद्वधं तस्य **रा**वणः क्रोधमूर्छितः ॥ ३७८

बिभीषणो **रा** क्षसेंद्रं वारयामास सू[7]क्तिभिः, ।
'दूतोऽवध्यो महाराज क्षमस्वे'ति पुनः पुनः. ॥ ३७९

'प्रेषितोऽय **म** तिक्रूरो यैर्दूतो राक्षसेश्वर! ।
तेष्वेव पात्यतां दंडो न कोऽप्यस्य वधे गु[8]णः. ॥ ३८०

यु[9]द्धायोद्यो **ज** येदेव तावयं **रा**म**ल**क्ष्मणौ ।
युद्धप्रिय! महाराज! '[10]जीवत्यस्मिन्महान्गु[11]णः.' ॥ ३८१

तन्मनः प्रि **य** माकर्ण्य भ्रातुर्वाक्यमथाब्रवीत् ।
'कपीनां किल [12]लांगूलमिष्टं भवति [13]दारुणम्. ॥ ३८२

तदस्य वी **रा** स्य कपेर्दीप्यतां दुर्मतेर्द्रुतम् ।
स्वस्वामिनिकटं पापस्तेन दग्धेन गच्छतु. ॥ ३८३

[14]सचत्वरं **म** म पुरं रक्षोभिः परिणीयताम्.' ।
इत्याज्ञापयदत्युग्रः पुत्रघातातितप्तधीः. ॥ ३८४

---

१. या इयम्. २. कल्पांतरात्रिः। सर्वभूतापहारिणी यमभगिनी 'कालरात्री' इति, 'इति'-योगात् प्रथमा, 'वदन्त्यपर्णेति च तां पुराविदः' इतिवत्. ३. अपकार, अपराध करणारा. ४. इंद्र. ५. ही पंक्ति मूळांत आहे. (स० ५१ श्लो० ४२.) ६. गर्वितः. ७. सु (चांगल्या) उक्तिभिः (शब्दांनीं). ८. सर्ग ५२, श्लोक १८ पहा. ९. उद्युक्त करील. १० हा जिवंत राहिला असतां. ११. फल. १२. शेंपूट, पुच्छ. १३. मूळांत 'भूषण' असें पद आहे व तेंच अर्थाला अनुरूप होय. (स० ५३ श्लो० ३.) १४. चत्वरैः (चौक) सहितम्.

तच्छ्रुत्वा रा **ज** वचनं राक्षसाः कोपकर्कशाः ।
आवेष्टयंत लांगूलं जीर्णैः कार्पासिकैः[1] पटैः. ॥ ३८५

स आंजने **य** स्तु तदा व्यवर्धत कुतूहली[2] ।
शुष्कमिंधनमासाद्य वनेष्विव हुताशनः. ॥ ३८६

परिषिच्यां **ज** नासूनोः पुच्छं तैलेन भूयसा ।
वर्धमाने तत्र शीघ्रं ज्वलनं समयोजयन्. ॥ ३८७

इतोऽन्यतो **य** थादेशं नेतून्दैवहतान्कपिः ।
लांगूलेन प्रदीप्तेन राक्षसांस्तानताडयत्. ॥ ३८८

तं मारुतिं **रा** क्षसास्ते लंकायां सर्वतस्तदा ।
परिगृह्य ययुर्हृष्टा घोषयंतोऽस्य कर्म तत्. ॥ ३८९

शंखभेरी **म** हानादैश्चारयंति स्म तां पुरीम् ।
तच्छ्रुत्वा राक्षसीप्रोक्तं सीताग्निं शरणं ययौ[3]. ॥ ३९०

सख्युः[4] सूनोः **श्री** मदग्निः प्रार्थितः प्रभुकांतया ।
संप्रदीप्तोऽपि लांगूललोमैकमपि[5] नादहत्. ॥ ३९१

प्रदीप्तेऽग्नौ **रा** मदूतश्चिंतयामास सन्मतिः ।
संप्रदीप्तोऽप्ययं कस्मान्न मां दहति पावकः ? ॥ ३९२

दृश्यते च **म** हाज्वालः करोति च न मे रुजम्[6] ।
हिमस्य पिंड इव मे लांगूलाग्रे प्रतिष्ठितः. ॥ ३९३

अथवायं **ज** नकजाभर्तुः शीतः प्रभावतः
सागरस्यादरस्ताद्दक्किमग्निर्न[7] करिष्यति ? ॥ ३९४

सीताया द **य** या नूनं तेजसा राघवस्य च ।
पितुश्च मम सख्येन न मां दहति पावकः[8]. ॥ ३९५

भूयः स वी **रा** धिपतिश्चिंतयामास चेतसि ।
कथमस्मद्विधस्यैवमधमैर्बंधनं कृतम्. ॥ ३९६

---

१. कापसाच्या केलेल्या वस्त्रांनीं. २. गमतीखातर ज्यानें आपला देह वाढविला आहे असा. ३. सर्ग ५३ श्लोक २५ पहा. ४. अर्थात वायोः, कारण अग्नीला 'मरुत्सख' असें नांवच आहे. ५. लांगूल+लोमन्+एक+द्वि०=प्र०=पुच्छाच्या एका केंसाला देखील. ६. पीडाम्. ७. सागरानें मैनाकाला वर वाढून मला विश्रांतिस्थल देण्याला सांगितलें होतें. ही कथा या कांडाच्या आरंभींच आली आहे. ८. हे श्लोक रामायणांत आहेत. (स० ५३ श्लो० २६-४०.)

प्रतिक्रिया **म**या योग्या कार्या बुद्धिमतेति सः ।
छित्त्वा पाशानुत्पपात ददाह विनदन्पुरीम्. ॥ ३९७

स कीशकुं**ज**रो भूयः परिघं तोरणाश्रितम् ।
गृहीत्वा रक्षिणः सर्वान्[1]सूदयामास राक्षसान्. ॥ ३९८

पितुः सखा **य**[2]मनलं समृद्धैर्रक्षसां गृहैः ।
[3]कृतज्ञस्तर्पयामास [4]साधुप्रत्युपकारवित्. ॥ ३९९

ततो [5]धनं**ज**यस्यायं कुर्वंस्तर्पणमीप्सितम् ।
[6]राजादिभवनाग्रेषु विचचार महाकपिः. ॥ ४००

लंकां [7]निर्भ**य**चेताः स भवनाद्भवनं व्रजन् ।
ददाह रुद्रप्रहितः शरो [8]दैत्यपुरीमिव. ॥ ४०१

[9]तृणैधसां **रा**शिशतैर्यथा वन्हिर्न तृप्यति ।
तथैषदपि नोतृप्तः कृते रक्षोवधे कपिः. ॥ ४०२

लंकां सर्वां **म**हातेजा दग्ध्वा लांगूलपावकम् ।
[10]निर्वापयामास तदा समुद्रे हरिपुंगवः. ॥ ४०३

लंकां दग्ध्वा **श्री**हनूमान्पश्चात्[11]तप्तोऽभवत्तदा ।
आत्मानं गर्हयन्नेवं चिंतयामास दुःखितः. ॥ ४०४

'धिगस्तु मां, **रा**घवस्य प्रियां विस्मृत्य पावकः ।
[12]उद्दीपितोऽत्र लंकायां दग्धा नूनं [13]तपस्विनी. ॥ ४०५

कार्यनाशो **म**हानद्य क्रुद्धेनायं मया कृतः ।
धन्या विवेकिनः संतो हंत[14] ! सत्यमहं [15]कपिः. ॥ ४०६

---

१. मारता झाला. २. ज्याची कधींच तृप्ति होत नाहीं असा अग्निनारायण त्याला. ३. यावेळीं अग्नीनें केलेले उपकार स्मरणारा मारुति. ४. उपकार कसे फेडावे हें ज्याला चांगलें माहीत आहे असा. ५. अनलस्य. ६. स० ५४ श्लो० ६ पहा. ७. निर्भयं चेतः यस्य सः। वीतभीः. ८. त्रिपुरवधाची कथा शिवलीलामृतांत आहे. तिचा उल्लेख या श्लोकांत केला आहे. हाच उल्लेख मूळांत आहे. [सर्ग ५४ श्लोक ३०.] ९. तृणानि च एधांसि च तेषां । एधस् हा हलन्त नपुंसकलिंगी काष्ठवाची शब्द आहे. 'तृप्त्यर्थानां विभाषाकरणे' इति नियमात् विकल्पेन षष्ठी, 'तृणैधोभिर्न तृप्यति' असाही प्रयोग होईल. 'नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः। नांतकः सर्वभूतानाम्.' १०. शांत करता झाला. (स० ५४ श्लो० ४९.) ११. त्याला पश्चात्ताप झाला, त्याला खेद वाटला. १२. आग लावली, अग्नि पेटविला. १३. गरीब बिचारी. १४. अरेरे! अहह!. १५. अनर्थाला मूळ असें क्रियाचापल करणारा प्राणी, मर्कट.

नूनं देवी **ज** नकजा सा दग्धा [1]**लं**कया सह ।
हा ! मया दहता **लं**कां न **सी**ता परिरक्षिता. ॥ ४०७
यदर्थम **य** मारंभस्तत्कार्य[2]मवसादितम् ।
लंकायाः कश्चि[3]दुद्देशो न ह्यदग्धः प्रदृश्यते. ॥ ४०८
धिग्धिग्[4]भावं [5]**रा** जसं मे [6]कार्यसर्वस्वघातिना ।
कथं शक्यो मया द्रष्टुं **राम**ः स च [7]हरीश्वरः.' ॥ ४०९
निमि[8]त्तानि **म** हा बुद्धिर्दृष्ट्वा शुभफलानि सः ।
किंचित्स्वस्थो वातसूनुस्ततः पुनरचिंतयत्. ॥ ४१०
'अथवा ते [9]**जं** सा स्वेन रक्षिता **ज**नकात्मजा ।
न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते. ॥ ४११
धर्मात्मा प्र **य** तो **रा**मः प्रियां तस्यातितेजसः ।
[10]स्वंचरित्राभिगुप्ता न स्प्रष्टुमर्हति पावकः. ॥ ४१२
नूनं धनं **ज** यो **रा**मप्रभावेनाद्य मां कपिम् ।
सुकृतेन च **सी**ताया नादहत्[11]किमु तां सतीम् ? ॥ ४१३
एवं चिंत **य** ता तेन [12]चारणानां महात्मनाम् ।
आत्मानं स्तुवतां वाक्यं श्रुतमं[13]बरचारिणाम्. ॥ ४१४
'अहो ! **समी रा** त्मजेन [14]साट्टप्राकारतोरणा !
लंका दग्धा न **सी**तेति विस्मयोऽद्भुत [15]एवं नः.' ॥ ४१५
त[16]त्सुधोप **म** माकर्ण्य वाक्यं स **प**वनात्मजः ।
जगाम यत्र सा देवी नत्वा तामब्रवीन्मुदा. ॥ ४१६
'दि[17]ष्ट्याक्ष[18]तां **श्री** मति ! त्वां पश्यामि जनकात्मजे ! ।

---

१. सर्ग ५५ पहा. २. नासलें. ३. प्रदेश. ४. स्वभावम्- ५. रागीटपणाला जेथें प्राधान्य आहे. रजोगुणबहुलम्. ६. कार्यमेव सर्वस्वं घातयति यस्तेन, कार्यरूप धन नाहींसें करणारानें. ७. सुग्रीवः कपीश्वरः- ८. शुभशकुन. ९. पातिव्रत्याच्या तेजानें. पातिव्रत्याला येथें अग्नीची उपमा दिली आहे, ह्मणून अग्नि अग्नीला कांहीं उपद्रव करूं शकत नाहीं. १०. पातिव्रत्यरक्षिता. ११. रामप्रभावामुळें अग्नि मला माकडाला देखील जाळूं शकला नाहीं, तर मग सतीला जाळण्याची गोष्ट दूरच. ह्यालाच कैमुतिकन्याय ह्मणतात. १२. चारयंति कीर्तिं ये तेषाम् । कीर्तिघोष करणारे देवांचे भाट. १३. आकाशांतून गमन करणारांचें. १४. माड्या, तटाच्या भिंती व कमानी यांसह. १५. सर्ग ५५ श्लोक ३२ पहा. १६. सुधेप्रमाणें सृतिहर वाक्य. सुधा (अमृतं) उपमा (उपमानं) यस्य तत् , सुधातुल्यम. १७. सुदैवानें, भाग्यानें. १८. कुशलिनीम्.

अयमागत[१] एवाहं **रामसुग्रीवलक्ष्मणैः**.' ॥ ४१७

इति **सीतां रा**जसुतां समाश्वास्य **म**रुत्सुतः ।
नत्वा पृष्ट्वा पुनः क्षिप्रं निर्जगाम मनोगतिः[२]. ॥ ४१८

गतो गिरिं **म**[३]रिष्टाख्यमारुह्योत्प्लुत्य खं[४] गतः ।
तद्भारपीडितो भूमौ निमग्नः स महानगः. ॥ ४१९

तं **मैनाकं ज**लनिधौ स्पृष्ट्वा तार्क्ष्यगतिः[६] कपिः ।
आगच्छन्दूरतो दृष्ट्वा महेंद्रमकरोद्ध्वनिम्. ॥ ४२०

श्रुत्**वांजने य**निनदं **जांबवानब्रवीत्कपीन्**, ।
'सर्वथा कृतकार्योऽयमस्य नादो हि तादृशः.' ॥ ४२१

ते कीशवी**रा** वृक्षाग्राद्वृक्षाग्राणि तमागतम् ।
शिखरा च्छिखराग्राणि दृष्ट्वा जग्मुर्दिदृक्षवः. ॥ ४२२

गिरेस्ततो **म**हेंद्रस्य शिखरे पादपाकुले ।
पपात नभसश्छिन्नपक्षोऽद्रिरिव मारुतिः. ॥ ४२३

प्लवंगकुं **ज**राः सर्वे परिवार्योपतस्थिरे ।
वृद्धान्**त्वांगदं** चाथ 'दृष्टा **सीते**'ति सोऽब्रवीत्. ॥ ४२४

आदायोपां **य**नान्यार्या मूलानि च फलानि च ।
पूजां चक्रु**र्म**रुत्सूनो**र्जां**बवत्प्रमुखा मुदा. ॥ ४२५

सविस्तरं **ज**[११]गत्प्राणतनयो वृत्तमादितः ।
कथयामास स श्रीमान्धीमान्ह्रीमान्[१२]पराक्रमी. ॥ ४२६

---

१. रामादिकांसह हा मी आलोंच पहा. थोड्याच काळानें कांहीं गोष्ट निश्चयात्मक घडणार असेल तर असा 'भूत' प्रयोग होतो. रामादिभिः सह अचिरेणैव अहमागमिष्यामि असा अर्थ आहे. 'आशंसायां भूतवच्च' (३।३।१३२.) २. मनसो गतिरिव गतिर्यस्य सः मनोवेगः. ३. अरिष्टनांवाच्या पर्वतावर. (स० ५६ श्लो० २६.) ४. आकाशम्. ५. मोठा पर्वत. 'महान् अगः' किंवा 'महानगः' (महान् नगः) याचा अर्थ सारखाच होतो. ६. गरुडवेगः ७. सर्ग ५७. श्लोक२३ पहा. ८. वृक्षाकुले. ९. छिन्नौ पक्षौ यस्य सः. पूर्वी पर्वतांला पक्ष होते त्यामुळें लोकांला फार त्रास होत असे, त्यासाठीं इंद्रानें आपल्या वज्रानें त्यांचे पक्ष तोडून टाकले. यास्तव इंद्राला 'गोत्रभित्' ह्मणतात. मारुतीचा त्यावेळचा पर्वतप्रमाण देह होता हें लक्ष्यांत ठेवलें ह्मणजे छिन्नपक्ष अद्रीची कल्पना मनांत येणें साहजिक आहे. १०. नजराणे, उपहार, पारितोषिकें. ११. अनिलतनयः वायुपुत्रः. १२. विनयवान्.

[1]अंगदाद **य** उत्कृष्टप्रतापं **वा**तनंदनम् ।
तुष्टुवुर्हृष्टरोमाणः[2] 'साधु साध्वि'ति तेऽब्रुवन्. ॥ ४२७

ततोऽगदो **रा** जपुत्रोऽब्रवी'द्धत्वा **द**शाननम् ।
अस्माभिरर्पणीया सा **रा**माय **ज**नकात्मजा.' ॥ ४२८

तमुवाच **म** हाबुद्धिर्जांबवा 'न्प्रभुणा स्वयम् ।
विचेतुं वयमाज्ञप्ता नानेतुं **वा**लिनंदन! ॥ ४२९

अस्माभिस्तु **श्री** मदाज्ञा यथा[3] कार्यं तथा खलु ।
प्रवृत्तिरेव[4] **सी**ताया निवेद्याशु[5] महाभुज! ॥ ४३०

कथंचित्तां **रा** जकन्यामस्माभिर्निर्जितां प्रभुः ।
चेन्नाभिरोचयेद्रामस्तत्सर्वं विफलं भवेत्.' ॥ ४३१

तेन सूक्त[6] **म** गृह्णंस्त[7]'त्साधु साध्वि'ति चाब्रवन् ।
महेंद्राग्रात्समुत्प्लुत्याप्लवंत[8] प्लवगर्षभाः. ॥ ४३२

ते प्रवृत्तिं **ज** गद्भर्त्रे समाख्यातुं प्रहर्षिताः ।
आगच्छंतो **म**धुवनं समासेदुः[9] प्लवंगमाः. ॥ ४३३

सुग्रीवस्य **य** दत्यर्थं प्रियं [10]नंदनसंनिभम् ।
[11]मातुलः कपिराजस्य नाम्ना **द**धिमुखः कपिः. ॥ ४३४

[12]कीशैरहो **रा** त्रमेव यस्य [13]त्राणपरायणः ।
तत्प्राप्य ते **म**धुवनं सर्वभूतमनोहरम्. ॥ ४३५

कुमारं तं **म**[14] धून्यत्तुमभ्ययाचंत लोलुपाः ।
फलानि च सुगंधीनि मूलानि च कृतश्रमाः ॥ ४३६

युवराजोऽ **ज** नापुत्रप्रतापेन प्रहर्षितः ।
तेषामाज्ञां ददौ तत्र यथेष्टमधुभक्षणे. ॥ ४३७

सर्वे पीत्वा **य** थेष्टं ते मधूनि मधुलोलुपाः ।
अभक्षयन्सुगंधीनि मूलानि च फलानि च. ॥ ४३८

---

१. अंगदः आदिः येषां ते. २. रोमांचिताः. ३. यथा श्रीमदाज्ञा, तथा अस्माभिस्तु कार्यम्. ४. शोध लागल्याचा संदेश. ५. निवेद्या=निवेदनीया. ६. चांगला उपदेश. ७. ग्रहण केला. ८. अप्लवन्त=उडाले. ९. सुग्रीवाच्या मधुवन नामक उपवनाजवळ आले. १०. नंदनेन तुल्यम् नंदनसंनिभम् । 'नंदन' हें इंद्राच्या उद्यानाचें नांव. ११. मातुर्भ्राता मातुलः. १२. कीशैः सह. १३. रक्षणतत्परः. १४. मधूनि अत्तुं=मधु इत्यादि भक्षणाची आज्ञा द्या अशी प्रार्थना केली.

ते प्रहर्षे **ज** ग्मुरथ [1]प्राज्यपानमदोत्कटाः ।
केचि[2]न्नृत्यंति गायंति प्रहसंति रुदंति च. ॥ ४३९
[3]द्रुमाग्रात्प्र **य** संपाताद्द्रुमाग्रं जग्मुरुत्कटाः ।
न तत्र मत्तो नो कश्चिन्नात्र दृप्तो न [4]कश्चन. ॥ ४४०
विध्वंसिते **रा**[5] जवने कोपाद्दधिमुखः कपिः ।
निवारयामास हरींस्ते तं धिक्चक्रुरुन्मदाः. ॥ ४४१
लब्ध्वा तेऽनु **म** तिं सर्वे **मा**रुतेरंगदादपि ।
क्रुद्धं **द**धिमुखं वीरास्ताडयामासुरुद्धताः. ॥ ४४२
सुग्रीवाय **श्री** मते स क्रुद्धो **द**धिमुखः स्वयम् ।
गत्वा निवेदयामास य[6]**दं**गदमुखैः कृतम्. ॥ ४४३
पप्रच्छ वी **रा** धिपतिः सुग्रीवं लक्ष्मणस्तदा, ।
'किमयं दुःखितो राजन्! वानरो वक्ति त[7]द्वद.' ॥ ४४४
स प्लवंग **म** राजस्तं लक्ष्मणं प्राह, '**रा**घव! ।
भुक्तं **म**धुवनं कीशैरंगदप्रमुखैर्बलात्. ॥ ४४५
दृष्टा देवी **ज** नकजा ध्रुवं रघुकुलोत्तम! ।
नैषामकृतकार्याणामीदृशः स्याद्व्य[8]तिक्रमः. ॥ ४४६
ताडिता भ **य** मुत्सृज्य [9]वनपालाः प्लवंगमैः ।
कृतं निर्वि[10]षयं सर्वं वनं [11]दत्तवरं मम.' ॥ ४४७
एवं श्रुत्वा **रा** जवाक्यं युक्तिमद्रामलक्ष्मणौ ।
प्रहर्षमतुलं प्राप्तौ [12]सीतादर्शनलालसौ. ॥ ४४८
मातुलं [13]सा **म** कुशलः सुग्रीवः प्राह, 'तद्वनम् ।

---

१. पुष्कळ पिऊन मदमत्त झालेले. २. 'नृत्यति गायति विहसति विलपत्युच्चैरुपैति संमोहम् । भजते विविधविकारान्संसारादर्शमंडलक्षीवः' यावरील पद्यांत कवीनें किती तरी आपल्या प्रतिभेची आकलनशक्ति दाखविली. ३. ज्यावरून उडी मारणें प्रिय होतें त्या द्रुमावरून. उत्तरार्धांत 'एकावली' अलंकार आहे. ४. सर्ग ६१ पहा. ५. कपिराज सुग्रीव याचें वन अथवा वनानां (उपवनानां उद्यानानां) राजा वनश्रेष्ठम् उद्यानवरम् असा अर्थ करावा. राजदन्तवत् समास करावा. ६. अंगदादिभिः अंगदो मुखे येषां तैः. ७. सर्ग ६३ श्लोक १३-१४ पहा. ८. अत्याचार, अमर्यादा, विपर्यय. ९. वनरक्षकाः. १०. फलमूलादि भोज्य पदार्थ ज्यांतील नाहींसे केले आहेत. ११. 'वरत्वेन देवैरस्माकं दत्तम्.' १२. सीतादर्शनोत्सुक. १३. सामनि कुशलः=सांत्वन करण्यांत मोठा कुशल सुग्रीव.

पालय त्वं यथापूर्वं प्रेषयाशु कपींश्च तान्[1].' ॥ ४४९
स गत्वा स **ज** वस्तत्र स्थितान्**द**धिमुखः कपीन् ।
अंगदं युवराजं च दृष्ट्वोवाच कृतांजलिः. ॥ ४५०
'युवराज! **य** दज्ञानादपराद्धं क्षमस्व तत् ।
द्रष्टुमिच्छति राजा त्वां सहैभिर्हरियूथपैः. ॥ ४५१
प्लवंगरा **ज** स्त्वामाशु प्लवगैः सह पश्यतु ।
प्रहृष्टो न तु रुष्टोऽसौ वनं श्रुत्वा प्रधर्षितम्.' ॥ ४५२
अंगदो न **य** वित्तूर्णं श्रुत्वा **द**धिमुखेरितम् ।
जगाम **ह**नुमन्मुख्यैः सह **सु**ग्रीवसंनिधिम्. ॥ ४५३
कृत्वाग्रतो **रा** जसुतं **ह**नुमंतं च वानराः ।
जग्मुरुत्पत्य गगनं [2]यंत्रोत्क्षिप्ता इवोपलाः[3]. ॥ ४५४
श्रुत्वा तेषां **म** हानादान्**सु**ग्रीवः प्राह **रा**घवम्, ।
'समाश्वसिहि भद्रं ते दृष्टा देवी न [4]संशयः. ॥ ४५५
हनूमता **श्री** मती सा दृष्टा नान्येन **रा**घव! ।
[5]नास्त्यस्य कर्मणो हेतुः साधने तद्विधोऽपरः.' ॥ ४५६
पेतुः प्रवी **रा** गर्जंतः प्रदेशेषु समेषु [6]खात् ।
रामलक्ष्मण**सु**ग्रीवचरणेष्वपि ते ततः ॥ ४५७
हनूमांश्च **म** हाबाहुः प्रणम्य शिरसा ततः ।
नि[7]यतामक्षतां[8] देवीं **रा**घवाय न्यवेदयत्. ॥ ४५८
हनूमतो **ज** नकजा संदृष्टेत्यमृतोपमम् ।
आकर्ण्य वचनं **रा**मो हर्षमाप स**ल**क्ष्मणः. ॥ ४५९
[9]निश्चितार्थौ **य** शोराशौ **सु**ग्रीवं **प**वनात्मजे ।
लक्ष्मणः प्रीतिमान्प्रीतं बहुमानादवैक्षत. ॥ ४६०
'क्व वर्तते **रा** जकन्या कथं चापि [10]मयी'ति तान् ।
रामे पृच्छति ते कीशाः प्रेरयंति स्म **मा**रुतिम्. ॥ ४६१

---

१. सर्ग ६३ श्लोक ३१ पहा. २. यंत्राच्या योगानें (गोफणीच्या योगानें?) फेंकलेले. ३. दगड. ४. सर्ग ६४ श्लोक २७ पहा. ५. न (कोऽपि) तद्विधः (हनुमद्विधः) अपरः अस्ति (यः) अस्य कर्मणः साधने हेतुः (कारणम्, समर्थ इत्यर्थः) [भवेत्]. ६. आकाशांतून. ७. शुद्धाचरणशीलां नियमवतीं च. ८. कुशलिनीम्. (स० ६४ श्लो० ४२.) ९. निर्णीत कार्यतत्वम्. १०. कथं मयि वर्तते=माझ्या संबंधानें तिचें वर्तन कसें आहे.

प्रणम्य स **म** रुत्पुत्रः **सी**तायै [1]तद्दिशे च तम् ।
मणिं दत्त्वा **रा**घवाय सर्वं वृत्तं न्यवेदयत्. ॥ ४६२

'लंघयित्वा **ज** लनिधिं शतयोजनमायतम् ।
सीतामपश्यं लंकायां **रा**वणस्य पुरि प्रभो! ॥ ४६३

कृशांगी नि **य** ता दृष्टा राक्षसीभिः [2]सुतर्जिता ।
[3]**रा**वणाद्विनिवृत्तार्था [4]मर्तव्यकृतनिश्चया. ॥ ४६४

मनोरथं **ज** नकजा त्वयि [5]संन्यस्य दुःखिता ।
[6]एकवेणीधरा दीना नित्यं चिंतापरायणा. ॥ ४६५

दत्त्वांगुली **य** कं वंशं कीर्तयित्वा गुणांश्च ते ।
सा मया नरशार्दूल! शनैर्विश्वासिता सती. ॥ ४६६

दत्त्वा मणिं **रा** जपुत्री [7]काकवृत्तं च साब्रवीत् ।
त्वां **लक्ष्मणं** च कुशलं **सु**ग्रीवं [8]चावदत्सती.' ॥ ४६७

इत्येवं स **म** रुत्पुत्रः प्रोवाच प्रांजलिर्नतः ।
रामो भक्त**मय**ूराणां [9]मुदिरो मुदितस्ततः. ॥ ४६८

---

१. ज्या दिशेकडे सीता होती त्या दिशेकडे प्रणाम करून. २. फार फार जिला भीति घातली आहे अशी. ३. रावणाचे संबंधाची गोष्ट जीच्या मनांत नाहीं अशी. ४. मरण्याबद्दल जिनें निश्चय केला आहे अशी. ५. सर्व मनोरथांचें अवलंबन तुम्हाला करून. ६. 'हरणदिनकृतैकसंस्कारवद्वेणीधरा' यद्वा 'पुरोभागीयवेणीद्वयरहितवेणीधरा' असा अर्थ एके ठिकाणीं टीकेंत दिला आहे. लहान मुलांचे केंस अजून देखील तीन वेण्यांनीं बांधितात. पुढील दोन वेण्यांनाच चूडामणि हा अलंकार अडकविलेला असतो. उत्तरहिंदुस्थानांत ह्याचा आकार गुलाबाच्या कळीसारखा असतो. आपल्या इकडे 'बोर' म्हणून अलंकार असतो तो सरासरी तशाच आकाराचा असतो. 'मूदे'चा आकार चूडामणीच्या सारखाच असतो परंतु 'मूद' हा अलंकार मागें घालण्याचा प्रघात केव्हांपासून पडला हें ठीक सांगतां येत नाहीं. बाळकृष्ण आत्माराम गुप्तेकृत 'देशीहुन्नर' पृ० ४५ त 'चूडामंडन' असें शिरोभूषण दिलें आहे परंतु आकार भिन्न दिला आहे. ७. ऐंद्रकाकाची कथा. [स० ६७ यांत ही कथा सविस्तर आहे.] ८. मोरोपंत–रामायणें–भाग १ काव्यसंग्रहग्रंथमाला–मंत्ररामायण–सुंदरकांड–गीति १५०-१५६ पृष्ठ ८७-८८ पहा. ९. मेघ. जे मोद देतात ते मुदिर.

युद्धकांडम्.

हनूमदुक्तं **श्री** रामः श्रुत्वातीव [1]प्रहर्षितः ।
उवाच वाक्यं यद्योग्यं [2]सुप्रियश्रवणोत्तरम्. ॥ १

'कृतं [3]कार्यं [4]पै **रा** शक्यं बलिना[5]निलसूनुना ।
न ह्यन्यं परिपश्यामि यस्तरेत्तं महोदधिम्. ॥ २

लंकां हि को ना **म** विशेन्निष्क्रमेत्संप्रविश्य च ? ।
[6]भृत्यकार्यं हनुमता सुग्रीवस्य महत्कृतम्. ॥ ३

श्रेष्ठं यशोऽस्य **ज** गति नियो[7]गादधिकं कृतम् ।
न चात्मा [8]लघुतां नीतः सुग्रीवश्चापि तोषितः. ॥ ४

अहं [9]रघ्वन्व **य** श्चायं लक्ष्मणश्च महाबलः ।
वैदेह्या दर्शनेनाद्य [10]धर्मतोऽनेन रक्षिताः. ॥ ५

[11]प्रियाख्यातुर्व **रा** हस्य वायुसूनोर्महात्मनः ।
मनः खिन्नं [12]ममाकर्तुः कर्मणः सदृशं प्रियम्. ॥ ६

मया त्विदानीं **म** नसा विचार्यैव पुनःपुनः ।
[13]सर्वस्वभूतोऽयं दत्तः परिष्वंगोऽस्य मारुतेः.' ॥ ७

इत्युक्त्वा प्रीति **ज** नितप्रभूत[14]पुलकः प्रभुः ।
कृतकार्यं हनूमंतं तं रामः परिष्वस्वजे. ॥ ८

पप्रच्छ तं प्रि **य** तमाप्रात्युपायं प्रभूत्तमः, ।
'वीर! सा कीदृशी लंका दुर्जया या सुरासुरैः. ॥ ९

---

१. प्रहर्षः संजातोऽस्येति. २. सुप्रियश्रवणोत्तरकालोचितम्. अतिप्रिय (सीतेचा शोध) गोष्ट कानीं पडल्यावर जें उचित. ३. सीतान्वेषणकार्यम्. ४. परैः अशक्यम्. ५. जगत्प्राणसुतेन. ६. सुग्रीवभृत्योचितं सीतादर्शनवनभंगादिकं कार्यम्. ७. यावरून मारुति उत्तम भृत्य होता हें स्पष्ट आहे. वा० रा० युद्ध० स० १ श्लो० ७-९. ८. राक्षसांपासून पराभव पावून आपणाला लघुता आणली नाहीं. ९. रघोरन्वयः भरतादयः. १०. भृत्यधर्म पाळून. ११. मनाला प्रिय बातमी सांगणाऱ्याच्या. १२. न करणाऱ्याचें (रामाचें मन). १३. मारुतीनें जें एवढें अचाट काम केलें त्याबद्दल कांहीं देऊन अंशतः तरी उत्तीर्ण होण्यासाठीं आज मजजवळ सर्वधन कायतें आलिंगन आहे. "Thanks, the exchequer of the poor" असें एका इंग्रजी नाटकांत आहे तशाच प्रकारची वरील कल्पना आहे. 'भगवद्देहस्य शुद्धानंदस्वरूपत्वात् स्वालिङ्गनस्य सर्वस्वभूतत्वं बोध्यम् । आनंद एव हि भगवतः सर्वस्वम् आनंद एव हि मायया रामादिदेहत्वेन भासते इति गीताभाष्यविष्णुसहस्रनामभाष्ययोः भगवत्पादैः स्पष्टमेवोक्तम् ब्रह्मांडपुराणादिषु चैवं परिष्वंगद्वारा ब्रह्मानंदार्पणमेव हनुमते कृतमिति बोधितम्' इति तिलके. [स० १ श्लो० १३ टीका पहा.] १४. रोमांच.

सुदुष्पारस्य **ज** लधेः कथं नाम महामते ! ।
हरयो दाक्षिणं पारं गमिष्यं**त्यं**जनात्मज !' ॥ १०
इत्युक्त्वा तामा **य** ताक्षीं **सी**तां मत्वातिदुर्लभाम् ।
शोक[१]संभ्रांतहृदयः पुन[२]र्ध्यानमुपागतम्. ॥ ११
उवाच वान **रा** धीशस्तं **रा**मं शोकविव्हलम्, ।
'किं त्वया तप्यते वीर ! यथान्यः प्राकृतस्तथा ? ॥ १२
मैवं भूः पर **म** ज्ञाता त्वं हि **रा**म ! महाबलः ।
त्यज संतापमखिलं कृतघ्न इव सौहृ[३]दम्. ॥ १३
लब्ध्वा प्रवृत्तिः **श्री** मत्या ज्ञातश्च निर्लयो[४] रिपोः[५] ।
संतापस्याद्य ते स्थानं नैव पश्यामि **रा**घव ! ॥ १४
लंघयित्वा न **रा** धीश ! पयो[६]धिं लीलया[७] वयम् ।
आरोक्ष्यामः[८] पुरीं **लं**कां हनिष्यामश्च[९] ते रिपुम्. ॥ १५
इमे शूराः स **म** र्थाश्च सर्वथा हरियूथपाः ।
त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम्. ॥ १६
सेतुं निबध्य **ज** लधौ **लं**कां हरिबलं गतम् ।
रावणो निहतः प्राप्ता **जा**नकीत्युपधारय. ॥ १७
इमे हि हर **य** स्तत्र **लं**कायां कामरूपिणः ।
तानरीन्विहनिष्यंति शिला[१०]पादप[११]वृष्टिभिः.' ॥ १८
इत्येवं कपि **रा** जस्य श्रुत्वा वचन[१२]मर्थवत् ।
प्रतिजग्राह **का**कुत्स्थो **ह**नूमंतमथाब्रवीत्, ॥ १९
'सर्वथापि स **म** र्थोऽस्मि सागरस्यास्य लंघने ।
तपसा सेतुनास्त्रेण पयसः शोषणेन वा. ॥ २०

---

१. शोकविकलहृदयः. २. चिंताम् अथवा ध्येयवस्तुविषयचिंतनम्. [स० १ श्लो० १९.] ३. प्राकृतो यथा तप्यति तथा त्वया किं तप्यत इत्यन्वयः । एवं संतप्तः यथा सौहृदं त्यजति तथा त्वं संतापं त्यज. [स० २ श्लो० २ टीका.] ४. निलीयतेऽत्रेति निलयः, शरणम् गृहम् या ठिकाणीं निलय शब्दाचा अर्थ त्या चोराचें 'लपून राहण्याचें ठिकाण' असा आहे. ५. रपति अनिष्टमिति रिपुः तस्य. ६. अब्धिम्. ७. सहजगत्या, कांहीं आयास न पडतां. ८. आ+रुह्+लट् स्यामः. ९. हन्+लट् स्यामः 'ऋद्धनोः स्ये' (७।२।७०) या नियमानें इडागम झाला. १०. शिला व पादप (झाडें) यांची वृष्टि करून. ११. सर्ग २ श्लोक २२ पहा. १२. सारगर्भ.

कति दुर्गाण्यां **ज** नेय! द्वाराणि द्विषतः[१] पुरः ।
लंकाया गुप्तिकर्मापि[२] ब्रूहि संख्यां बलस्य च.' ॥ २१
तं **वायुतन य** स्तज्ज्ञः[३] कथयामास **राघवम्**, ।
'दृढानि **राम**! चत्वारि द्वाराण्यस्या महाबल! ॥ २२
परिखाः[४] सह **ज** ग्राह मीनैर्व्याप्ता भयंकराः ।
द्वारेषु तासां चत्वारः संक्रमाः[५] परमायताः[६]. ॥ २३
प्राकारः स्वच्छ **यँ**[७] शसां राशे! तस्याः पुरो[८] महान् ।
सौवर्णो[९] रत्नखचितो यंत्रैर्गुरुभिराचितः[१०]. ॥ २४
पूर्वद्वारि दु[११] **रा** धर्षा अयुतं[१२] भीमराक्षसाः ।
नियुतं[१३] दक्षिणद्वारि चतुरंगबलान्विताः. ॥ २५
दश लक्षाणि[१४] **म** नुजश्रेष्ठ! **राम**! निशाचराः ।
पश्चिमद्वारमाश्रित्य तिष्ठंति प्रियसाहसाः[१५]. ॥ २६
तथैव **राम**! **श्री** मंस्ते न्यर्बुदं[१६] सुमदोद्धताः ।
रात्रिंचरा महाकाया उत्तरद्वारमाश्रिताः, ॥ २७
महोत्साहाः पँ[१७] **रा** नीकध्वंसदक्षा महाबलाः ।
स्वामिकार्यपरा नित्यं संनद्धा[१८] युद्धलालसाः[१९]. ॥ २८
लंकायां मध्य[२०] **म** स्कंधे चतुरंगबलान्विताः ।
सपादकोटिः प्रबलास्तिष्ठंति रजनीचराः. ॥ २९
ते संक्रमा[२१] रा[२२] **ज** सिंह! ध्वस्ता दग्धा च सा पुरी ।

---

१. शत्रूच्या नगरीचीं. २. रक्षणकर्म. ३. तत् जानातीति तज्ज्ञः ४. प्राकारासभोंवती असलेले फार खोल खंदक. ते खोल असल्यामुळें अगाधज़लसंचारी ग्राहादि जलचर त्या खंदकांला निसर्गतः आपलें जन्मस्थान कल्पून त्यांत राहत असत. सहजाः (तत्र उत्पन्नाः) ये ग्राहाः (नक्राः) मीनाश्च तैः व्याप्ताः. ५. दुर्गप्रवेशासाठीं केलेले खंदकावरील पूल. इंग्रजींत ह्या पुलांना Drawbridge म्हणतात. कोंकणांत ह्यांना 'सांकव' म्हणतात. ६. अतिविस्तृतमार्गाः. ७. हे विमलयशोराशे. ८. नगर्याः. ९. सुवर्णस्यायम् । सुवर्णमयः. १०. मोठमोठ्या उपलयंत्रादिकांनीं युक्त असलेला. ११. ज्यांच्याशीं झोंबी घेणें मोठें कठिण आहे असें. १२. दहाहजार. १३. लक्ष. १४. प्रयुत. १५. प्रियं साहसं (दुष्टं कर्म) येषां ते. १६. दशकोटि. १७. शत्रुसैन्यनाशसमर्थाः. १८. शस्त्रास्त्रकवचांसहित तयार. १९. युद्धप्रियाः युद्धे लालसा येषां ते. २०. पुरमध्यसेनानिवेशस्थाने. २१. परिखामार्गाः. २२. राजा सिंह इव । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' (२।१।५६) राजश्रेष्ठ इत्यर्थः. 'सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः.'

प्राकारश्च मया भग्नः परि[1]खाश्चावपूरिताः. ॥ ३०
कपीनाज्ञाप **य** क्षिप्रमंगदादीन्महाबलान् ।
बलैकदेशः क्षपि[2]तो मयैव **र**घुनंदन! ॥ ३१
सर्वसैन्येन **रा** जेंद्र! त्वं चेद्गंतु[3]मना असि ।
मुहूर्तेन तु युक्तेन प्रस्थानमे[4]ऽभिरोचय.' ॥ ३२
श्रुत्वा वचन **म** र्थाढ्यं मरुत्सूनो **र**घूत्तमः ।
सुग्रीवमब्रवी'द्राजन्! मुहूर्ते विजये[5] शुभे. ॥ ३३
हत्वा **द**शास्यं **ज** नकक्षितिपालसुतां सतीम् ।
कर्तुं प्रहृष्टां मां चाद्य प्रयाणमभिरोचय. ॥ ३४
ता[6]राबलं ज **य** करं ममाप्त प्लवगेश्वर! ।
श्रुत्वाऽभियानं[7] मे **सी**ता स्पृहामेष्यति[8] जीविते.' ॥ ३५
एवमाकर्ण्य **ज** गतां भर्तुर्वाक्यं यशस्करम् ।
हरीनाज्ञापयामास प्र[9]स्थानाय हरीश्वरः. ॥ ३६
सेनापतिर्न **य** पटुः कृतो **नी**लः पुरः[10]सरः ।
ऋषभो दक्षिणे पार्श्वे स्ववामे **गं**धमादनः. ॥ ३७
सेनायाः प्रचु **रा** याश्च पश्चाद्भागेऽथ **जां**बवान् ।
अधिरुह्य **ह**नूमंतं **श्री**रा**मो** **ल**क्ष्मणोऽगदम् ॥ ३८
सेनार्णवस्य **म** ध्ये तु **सु**ग्रीवो वानरेश्वरः ।
राघवाभ्यां सह श्रीमान्बभौ सूर्य इवोदितः. ॥ ३९
ततः प्रयाते **श्री** **रा**मे हरिः शतबलिः स्वयम् ।

---

१. प्राकाराच्या शिला व इष्टका यांनीं खंदक भरून टाकले. २. नाहींसा केला. ३. गंतुकामः. ४. सर्ग ३ श्लोक १८-३३ पहा. ५. मध्यान्हीं दिवाकार आला म्हणजे अभिजिन्नामक मुहूर्त असतो. त्या मुहूर्तावर प्रस्थान केलें तर जय निश्चितच आहे. विजये=विजयप्रदे. ६. उत्तराफाल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते (चंद्रः), यावरील तिलक टीका:—पुनर्वसुजातस्य हस्तो वधतारा उत्तरा च सीताया जन्मतारा बद्धस्य जन्मतारायां तन्मोचनार्थं यात्रायामवश्यं तन्मुक्तिरिति भावः. ७. अभिगमनं श्रुत्वा सिद्धादिमुखतः. ८. जिवंत राहण्याबद्दल इच्छा होईल. इ+लृट् स्यति.९. प्रस्थानं कर्तुम्. 'क्रियार्थोपपदस्य' इत्यादि (२।३।१४.) १०. 'बिनी'च्या सैन्याचा नायक नील याला केला. [स० ४ श्लो० ९.] मुख्य सेनापति अर्थात् सुग्रीव होता. तो सर्व सेनेच्या मध्यभागीं होता. 'सेनापतिः सर्वसैन्यमधिष्ठाय मध्ये तिष्ठति' इति प्रपानाढ्यां गीताटीकायाम्.

[1]अमन्ररक्ष दशभिः कोटिभिर्हरिवाहिनीम्. ॥ ४०
असंख्यं वान **रा** नीकं गर्जमाणं रणोत्सुकम् ।
विलंघ्य [2]**स**ह्यं संप्राप्तं तीरं लवणवारिधेः ॥ ४१
सेनां प्लवंग **म** पतिस्तत्र [3]वेलावनेषु ताम्. ।
आज्ञया **रा**मचंद्रस्य स्थापयामास निर्भयाम्. ॥ ४२
दुस्तरं तं तु **ज** लधिं विलोक्य **र**घुनंदनः ।
सीतां स्मृत्वा वियोगार्तो विलापमकरोद्भृशम्. ॥ ४३
'अनाथेव प्रि **य** तमा सनाथाप्यद्य **ल**क्ष्मण! ।
[4]स्वभावतन्वी सा नूनं [5]शोकेनानशनेन च. ॥ ४४
भूयस्तनुत **रा** **सी**ता देशकालविपर्ययात् ।
रक्षो हत्वा हरिष्यामि कदा तस्या मनोव्यथाम्? ॥ ४५
दुःखं [6]दूरेति **म** म नो वत्स! दुःखं हृतेति न ।
एतदेवानुशोचामि [7]वयोऽस्या ह्यतिवर्तते. ॥ ४६
[8]कदा नु सा रा **ज** सुता देवकन्योपमा मम ।
[9]सोत्कंठा कंठमालंब्य [10]मोक्ष्यत्यानंदजं [11]जलम्?' ॥ ४७
एवं भृशं प्रि **य** तमां स्मृत्वा शोचंतमग्रजम् ।
आश्वासयामास धीरः **सौ**मित्रिर्विविधोक्तिभिः ॥ ४८
'[12]रावणो [13]वात **ज** निना दृष्ट्वा कर्म तथा कृतम् ।
पप्रच्छ राक्षसान्[14]कार्यं [15]ह्रियो किंचि[16]दवाङ्मुखः. ॥ ४९

---

१. या सागराप्रमाणें अपार सेनेचें परिरक्षण शतवलि नांवाचा वानरवीर करीत होता. (स० ४श्लो० ३२.) २. सह्याद्रिम्. ३. समुद्रतीराजवळील वनांत. ४. अगोदरच कृशांगी आणि तशांत शोक व तीव्र उपवास झाले त्यांच्या योगानें अधिकच कृश झाली असेल. ५. सर्ग ५ श्लोक ५-२१ पहा. ६. दूरा=दूरे स्थिता. ७. 'प्राणावस्थितिकालोऽतिवर्तते मासद्वयमात्रं जीवनमित्युक्तेः' रामाच्या ह्मणण्याचा आशय हा कीं कदाचित् हा अपार समुद्र तरण्याकरितांच दोन महिने लागतील. ८. कधीं बरें. ९. उत्कंठया सहिता. १०. मुच+लृट्+स्यति. ११. आनंदाश्रूणि. १२. श्लो० ४९-१२४ यांत मारुतीनें लंकादाह केल्यामुळें लज्जावनतमुख झालेला रावण आपल्या मंत्रिवर्गाला 'कसें करूं, काय करूं' ह्या मंत्रोद्धाराचा विचार पुसूं लागला असतां बिभीषणाशीं वाद झाला व त्यावेळीं इंद्रजित् व रावण त्याला फार टाकून बोलले, त्यामुळें बिभीषण आपल्या चार मंत्र्यांसह रामाकडे आला इतका कथाभाग वर्णिला आहे. १३. वातात् (वायोः) जनिः (उत्पत्तिः) यस्य तेन वायुसूनुना. १४. करणीयम्. १५. लज्जया. १६. ज्यानें तोंड किंचित् खालीं घातलें आहे असा.

आ[1]गमिष्यति **य**तेन राम! उल्लंध्य सागरम् ।

एकेन तत्कृतं कर्म बहवः कपयः किमु ? ॥ ५०

हता रक्षोव **रा** दग्धा दुर्धर्षा नगरी मम ।

तेन वानरमात्रेण दृष्टा **सी**तानुभाषिता. ॥ ५१

उच्यतां नः स **म**र्थं यत्कृतं च सुकृतं भवेत् ।

किं क[2]रिष्यामि भद्रं वः किं वो युक्तमनंतरम्. ॥ ५२

तेऽज्ञा[3]स्तमुचुः '**श्री**मंस्त्वं न चिंता कर्तुमर्हसि ।

महाराज! जितः **श्री**दः पु[4]ष्पकं च त्वया हृतम्. ॥ ५३

मृ[5]त्युस्त्वया ष**रा**भूतो वा[6]सुकिस्तक्षकोऽपि सः ।

त्वद्भयादिच्छता सख्यं कन्या दत्ता म[7]येन ते. ॥ ५४

दा[8]नवाश्च स**म**र्थास्ते भग्ना लब्धवराः पुरा ।

मा[9]याश्चाधिगता बह्व्यो [10]कुंभीनस्याः पतिर्जितः. ॥ ५५

रामाधिकाश्च **जं**[11]मतीपतयो निर्जिता रणे ।

मेघनादेन विजितः श[12]क्रो मुक्तो **वि**धेर्गिरा. ॥ ५६

---

१. आ+गम्+लृट् स्यति, 'गमेरिट् परस्मैपदेषु' ७।२।५८,२४०१ या सूत्रानें इडागम झाला. २. कृ+लृट् स्यामि 'ऋद्धनोः स्ये' ७।२।७०,२३६६. [सर्ग ६ श्लोक ४.] ३. कार्योपदेश करण्याकरितां असमर्थ, मूर्ख. ४. कुबेर हा रावणाचा वैमात्रेय भ्राता, त्याला रावणानें आपल्या मातामहाच्या सांगण्यावरून हुसकावून लावला व आपण लंका बळकाविली. पुष्पक विमान हरण केल्याचा कथाभाग मोरोपंतकृत संस्कृत मंत्ररामायण, उत्तरकांड, श्लो० १७१-१९४ त पहा. ५. यमाचा पराजय, मोरो० सं० मंत्ररा० उत्तर० श्लो० २६५-२८४ त दिला आहे. ६. वरुणलोकाला जेव्हां रावण गेला तेव्हां वरुणपुत्रांचा (नागांचा) पराभव केला. [स० ७ श्लो० ९.] ७. मय हा असुरशिल्पी आपल्या मंदोदरी नामक कन्येसह वर पाहण्याकरितां फिरत असतां त्याला रावण भेटला. रावणानें त्या कन्येसंबंधानें प्रश्न करतांच मयासुरानें सर्व वृत्तांत सांगितला व आपली मुलगी रावणाला कांहीं एक पंचाईत न करतां दिली व एक मोठी शक्ति आंदण दिली. वा० रा० उत्तर० स० १२. श्लो० ३-२१. [सर्ग ७ श्लोक ७.] ८. निवातकवच नांवाचे दैत्य यांच्याशीं लढून अखेर रावणानें सख्य संपादन केलें कालकेय नांवाच्या दैत्यांचा नाश केला. ९. निवातकवचांपासून कापट्यविद्या रावण शिकला. १०. माल्यवान् हा रावणाचा मातामह, त्याची अनला नांवाची कन्या तिच्याठायीं झालेली ही कुंभीनसी. अनला ही कैकसीची बहीण, ह्मणून कुंभीनसी ही रावणाची माऊस बहीण (मातृष्वसेयी), तिला मधु-दैत्यानें चोरून नेली होती, परंतु पुढें कुंभीनसीच्याच विनंतीवरून त्याला क्षमा केली. वा० रा० उत्तर० स० २५ श्लो० २१-५०. [स० ७ श्लो० ८.] ११. मरुत्त, अनरण्य, इत्यादि नृपति वा० रा० उत्तर० स० १८-१९. १२. वा० रा० उत्तर० स० २७-३०.

[1]राजन्नपात्त्वि **य** मद्य प्राकृतादागता जनात् ।
हृदि [2]कार्या त्वया नैवं त्वं वधिष्यसि **रा**घवम्.' ॥ ५७

अथ **प्र**हस्तो **रा** जानं [3]तत्सेनानीस्त[4]दाब्रवीत्, ।
'वयं [5]प्रमत्ता वि[6]श्वस्ताः कपिना तेन वंचिताः. ॥ ५८

करिष्यामि वि[7] **म** र्त्यां [8]इमां कृत्स्नामकपिमोजसा, ।
भक्षयिष्यामि तं **रा**ममाज्ञापयतु मां भवान्.' ॥ ५९

तं [10]**दुं**र्मुखोऽपि **ज** गतः पीडकं **द**शकंधरम् ।
तथैवोवाच दुर्बुद्धिर्व**ज्र**दंष्ट्रोऽपि राक्षसः ॥ ६०

सर्व एवान **य** ज्ञास्ते तस्य रक्षःपतेस्तदा ।
सचिवा भ्रातरः पुत्राश्चक्रुः प्रोत्साहनं भृशम्. ॥ ६१

सौमित्रेः साग्र **ज** स्याथ **सु**ग्रीवस्य **ह**नूमतः ।
हननायोत्थितान्सर्वान्वारयित्वा **बि**भीषणः. ॥ ६२

प्रांजलिर्विन **य** ज्ञस्तं प्रोवाचाग्रजमीश्वरम्, ।
'तव किं राक्षसेंद्रस्य **रा**मेणापकृतं पुरा? ॥ ६३

हतः **ख**रोऽप **रा** धीति **रा**मेण समरागतः ।
वैरं समुद्दीपयता त्वया तस्य प्रिया हृता. ॥ ६४

अनिष्टमिद **म** त्यंतं हरणं परयोषितः ।
महाराज! त्वया त्याज्या **सी**ता भीता मतिर्मम. ॥ ६५

प्रसादये त्वां **श्री** मंतं, [11]तथ्यं [12]पथ्यं वचो मम ।
गृहाण त्वं, महाराज! दीयतामस्य **मै**थिली[13]. ॥ ६६

सौभाग्यवत्यो **रा** क्षस्यः संतु संतुष्टमानसाः ।
त्वं तु [14]मंतुमिमं कर्तुं नाथ! नार्हसि दारुणम्.' ॥ ६७

इत्थं वदति [15]**मं** र्यादामार्गभाजि **बि**भीषणे ।
विसर्जयित्वा तान्राजा प्रविवेश स्वकं गृहम्. ॥ ६८

---

१. राजन् आपत् तु इयम् अद्य. २. हृदि चिंता नैव कार्या. [स० ७ श्लो० २५.] ३. तस्य सेनानीः (सेनापतिः) सेनां नयति इति. ४. सर्ग ८ श्लोक १-८ पहा. ५. सुखोपभोगादिपरवशाः. ६. शत्रुधर्षणासंभवबुध्या निःशंकतया स्थिताः. ७. निर्मनुष्याम्. ८. क्षमाम्, पृथ्वीम्. ९. न संति कपयः यस्यां सा ताम्. १०. सर्ग ८ श्लो० ६ पहा. ११. सत्य. १२. हितकर. १३. सर्ग ९. श्लोक २० हा जशाचा तसाच येथें घेतला आहे. १४. अपराधम्. १५. धर्मनियमरूपा जी मर्यादा तिच्या मार्गानें चालणारा बिभीषण बोलला असतां, न्यायमार्गावलंबिनि.

भ्रातुर्गृहं र **ज** न्यंते गत्वा तं पुनरेव सः ।
अब्रवी**द्रा**मराजाय **सी**तायाः प्रतिपादनम्. ॥ ६९
'[1]यदा प्रभृति **य** [2]त्नेन त्वयानीता नृपात्मजा ।
तदा प्रभृति दृश्यंते निमित्तान्य[3]शुभानि नः. ॥ ७०
रोचये वीर! **रा** माय **वै**देही प्रतिदीयताम् ।
[4]भीतास्ते मंत्रिणो वाच्यमवश्यं तु मया हितम्.' ॥ ७१
मंत्रिणामिति **म** ध्ये तं भ्राता भ्रातरमब्रवीत् ।
सीताभिलाषी दुष्टस्तमुवाच **द**शकंधरः, ॥ ७२
'न पश्याम्यत्र **ज** गति कुतश्चिद्भयमण्वपि ।
न जातु प्राप्स्यति पुनः **सी**तां **रा**मो **बि**भीषण! ॥ ७३
स्वयं सहायो **य** स्य त्रिदशेंद्रो[5] भविष्यति ।
ममाग्रतः कथं स्थास्यत्यबलो **ल**क्ष्मणाग्रजः?' ॥ ७४
इत्युक्त्वा सोऽनु **ज** मथ स्यंदनं **द**शकंधरः ।
समारुह्य ययौ भव्यां सभां मण्युज्ज्वलप्रभाम्. ॥ ७५
शुभं समास्था **य** रथं स्वाग्रजस्य[6] **बि**भीषणः ।
तां संसदं ययौ, सर्वे मिलिता यत्र राक्षसाः. ॥ ७६
निषसाद सँ **रा** जानं नत्वा रत्नासने शुभे ।
अथाब्रवी**द्द**शमुखः सर्वास्तान्रजनीचरान्. ॥ ७७
कुंभकर्णस्ये **म** मर्थं स्वप्नान्[8]नाहमचोदयम्[9] ।
अयं हि सुप्तः षण्मासानधुनैव संमुत्थितः[10]. ॥ ७८
इयं हि **सी**ता **श्री** तुल्या मयानीता निजां पुरीम्, ।
सा तु संवत्सरं कालं मामयाचत **जा**नकी. ॥ ७९

---

१. ज्या दिवसापासून. २. दीर्घोद्योग करून । मारीच्याकडून कनकमृगाचें रूप घेवविलें । स्वतः यतिवेष धारण केला । सीतेला नेत असतां जटायूनें चांगली कणीक मऊ केली । इत्यादि गोष्टी ध्वनित केल्या आहेत. ३. सर्ग १० श्लो० १४-२१ पहा. यांत अनेक अशुभ चिन्हांचें वर्णन आहे. ४. तुझे मंत्री तुला भिऊन खरोखर हितकर मंत्र (कर्तव्योपदेश, सलाह) सांगत नाहींत, परंतु मी जो समानसुखभागी तुझा भाऊ त्या मला, तुला जें हितकर, तें, अवश्य कळविलें पाहिजे. ५. देवेंद्रः. ६. 'स्वाग्रजस्य' या पदाचा संबंध 'संसदं' याच्याशीं आहे. ७. बिभीषणः. ८. स्वप्नात्=स्वापात् हेतोः । निजल्यामुळें. ९. ही गोष्ट कुंभकर्णाला कळविली नाहीं. १०. सर्ग १२ श्लो० १०-११ पहा.

तन्मयार्थ्[1]यभि **रा** मायाः प्रतिज्ञातं वचः शुभम् ।
श्[2]रांतोऽहं सततं कामाद्यातो हय इवाध्वनि. ॥ ८०

दूतेनाद्य म **म** प्रोक्तं **सु**ग्रीवप्रमुखान्हरीन् ।
पुरस्कृत्य समुद्रस्य तीरे प्राप्तौ नृपात्मजौ. ॥ ८१

न दातव्या कं **ज** नेत्रा हंतव्यौ **रा**मलक्ष्मणौ ।
कां[3]मो ममायं तद्यूयं यतध्वं कार्यसिद्धये.' ॥ ८२

कुंभकर्णो नं[4] **य** द्भ्रातुः प्रियं तत्सदसि स्वयम् ।
उवाच प्र[5]थमं धर्मन्यायोपेतं सतां मतम्. ॥ ८३

'त्वया परस्त्री **रा** जेंद्र! न समीक्ष्य स्वयं हृता ।
महाननर्थः संप्राप्तः किं मंत्रेणाधुना प्रभो!? ॥ ८४

गते तोये स **म** ग्रे किं सेतुना राक्षसेश्वर! ।
संदीप्ते सदने देव! कूपस्य खननेन किम्? ॥ ८५

प्रियार्थमग्र **ज** स्[6]याथ सोऽब्रवी**द्रा**मलक्ष्मणौ ।
हनिष्यामि स**सु**ग्रीवान्भक्षयिष्यामि वानरान्. ॥ ८६

मा चिंतां कुरु **य** द्राजन्! प्रियं तद्व्रज निर्भयः ।
वा[7]नरा वा नरा देवाः के वान्येऽपि ममाग्रतः.' ॥ ८७

महापार्श्वः प्रां **ज** लिस्तं क्रुद्धं **रा**[8]वणमब्रवीत्, ।
'ईश्वरस्येश्वरः कोऽस्ति तव शत्रुनिबर्हण!? ॥ ८८

आक्रम्याक्रम्य **य** त्नेन सुंदरीं राक्षसेश्वर! ।
ब[9]लात्कुक्कुटवृत्तेन **सी**तां भुङ्क्ष्व रमस्व च.' ॥ ८९

कुंभकर्णः [10]पं **रा** नाजाविंद्रजिच्च महाबलः ।

---

१. रमणीयतनोः सीतायाः. २. हें अर्ध वा० रामायणांत आहे. [स० १२ श्लो० २०]। थकलेला घोडा जसा वाट चालतो त्याप्रमाणें एका वर्षाचे दिवस कसे तरी लोटीत होता, कारण त्याला वाटत होतें कीं राम वर्षाच्या मुदतींत लंकेंत येणार नाहीं व अर्थातच सीता आपणाला वश होईल. ३. इच्छा. ४. 'कुंभकर्णो नयद्भ्रातुः प्रियं तत्' इत्यादि पाठ कल्पावा. मुळांतील 'कुंभकर्णोऽनयद्भ्रातुः' इत्यादि पाठ अशुद्ध आहे. जें भावाला प्रिय नाहीं परंतु धर्मन्याययुक्त असें वचन. ५. पहिल्यानें. ६. त्यानंतर. ७. येथें लाटानुप्रास आहे. ८. सर्ग १३ पहा. ९. कोंबड्याच्या रीतीप्रमाणें बलानें आक्रमण कर. 'कुकुटीनां कामिकुक्कुटसंयोगे क्रोधो जातिधर्मः' इति वात्स्यायनः [स० १३ श्लो० ४ टीका पहा.] १०. कुंभकर्णः इंद्रजित् च अस्माभिः सहितौ वज्रिणमपि आजौ हंतुं समर्थौ तदा परान् इति किमु वक्तव्यम्। वज्री जो इंद्र त्याला देखील संग्रामांत कुंभकर्ण व इंद्रजित् ठार करतील, तेव्हां

अस्माभिः सहितौ हंतुं समर्थावपि वज्रिणम्.' ॥ ९०
महापार्श्वं त **म**[१]त्याप्तं प्रोवाच दशकंधरः, ।
'मया पूर्वं बलाद्भुक्ता सुंदरी [२]पुंजिकस्थला. ॥ ९१
एवं पुनरस्त्वं **श्री** मत्तो बलादन्यां गमिष्यसि ।
[३]फलिष्यत्येव ते मूर्धा मां ब्रह्मेत्यशपद्रुषा. ॥ ९२
शापभीतो व **रा** रोहां **वै**देहीं शयने शुभे ।
नारोहयेऽ[४]हमबलां बलाद्बलवतां वरः. ॥ ९३
आसादयति **म**[५]र्त्यो मामज्ञात्वा मत्पराक्रमम् ।
सागरस्येव मे वेगो मारुतस्येव मे गतिः. ॥ ९४
म[६]होल्काभिः कुं **ज** रेंद्रं यथा राममहं तथा ।

इतरांची कथा कशाला पाहिजे ? इतरांना तर ते क्षणांत यमपुरीची वाट दाखवितील हें सांगायालाच नको, वर दिल्याप्रमाणें 'इति किमु वक्तव्यम्' असें शेषपूरण केल्याशिवाय अर्थ नीटसा जुळतच नाहीं. किंवा कदाचित् खरा पाठ थोडा भिन्न असेल.

१. रावणाच्या मनासारखी गोष्ट सांगितली ह्मणून तो 'अति आप्त' झाला हें ठीकच आहे. आप्तः=यथार्थोपदेष्टा. २. पुंजिकस्थला नांवाची अप्सरा ब्रह्मदेवाकडे जात असतां तिला रावणानें अडवून भोगिली ह्मणून ब्रह्मदेवानें 'तूं जन्य बलात्कारानें परस्त्री उपभोगिशील तर, तुझें मस्तक शंभर प्रकारें विशीर्ण होईल' असा शाप दिला । रंभेच्या संबंधानें देखील नलकूबरानें अशाच प्रकारचा शाप दिला होता. वा० रा० उत्तर० स० २६९ श्लो० २१–५९. खरें कोणतें याचा निर्णय लावण्याकरितां तिलकटीकाकाराला मोठी पंचाइतच पडली असें दिसतें:—क्वचिदेवमेव कुबेरपुत्रनलकूबरशापोऽपि रंभानिबंधनः श्रूयते तत्रोपपत्तिश्चिन्त्या । अस्य प्रथमत्वे तस्यां बलात्कारासंभवात्, तस्य प्रथमत्वेऽस्यां बलात्कारासंभवात् इति केचित् । नलकूबरशापस्य तपोबलेनाकिंचित्करत्वादयमेव शापो ब्रह्मास्त्रवदप्रतिक्रियः पाश्चात्य इत्यन्ये. [स० १३ श्लो० १४ टीका.] ३. फुटेल. ४. अशा प्रकारच्या वाक्यालाच 'प्रमिताक्षरापि विपुलार्थवती भारती' ह्मणतात. 'मितं च सारं च वचो हि वाग्मिता.' ५. अमरांचा विजेता मी रावण त्या मजवर मर्त्य (मरणधर्मा प्राणी) चालून येत आहे, कारण त्याला माझा पराक्रम ठाऊक नाहीं; आप् व वायु या महाभूतांसारखी माझी शक्ति प्रचंड आहे. ६. या ठिकाणीं आदिकवीची व आधुनिककवीची कल्पना सारखीच विशाळ आहे असें ह्मटलें पाहिजे. कारण 'उल्का तेजःपुंजः' असा अर्थ अमरांत दिला आहे, इंग्रजींत त्याचा अर्थ a shooting star (तुटणारा तारा.) meteor असा आढळतो, तेव्हां कुंजरेंद्राला जाळण्याशीं उल्कांचा संबंध कसा हें आमच्या ध्यानांत नीटसें येत नाहीं, बरें उल्का=उल्मूक (a firebrand कोलीत, जळतें लांकूड)असा जरी अर्थ घेतला तरी उल्मुकांनी हस्तीला जाळण्याचा कविसृष्टींतील नवीनच चमत्कार आहे असें म्हटल्याखेरीज गत्यंतर नाहीं. आम्हांला तर असें वाटतें कीं उल्मूकांचा

आजावादीपयिष्यामि ससहाहं महेषुभिः.' ॥ ९५
इति धर्मन्या **य** हीनं श्लाघमानं **द**शाननम् ।
बिभीषणो महाबुद्धिरनुजोऽग्रजमब्रवीत्. ॥ ९६
'[1]**सी**ताव्याली पै[2] **रा** नर्थहेतुर्मास्यां मनः कुरु ।
परस्त्रियानया किं ते? **रा**मायैषा प्रदीयताम्. ॥ ९७
यावन्न **लं**का **म** त्युग्राः कीशा दंष्ट्रानखायुधाः ।
आगतास्तावदेवेयं **सी**ता **रा**माय [3]दीयताम्. ॥ ९८
[4]हरेर्यथा ग **ज** स्तद्वद्**रा**घवस्याग्रतः क्षमः ।
स्थातुं न **कुं**भकर्णोऽयं **नें**द्रजित्कोऽपि नापरः. ॥ ९९
कदाचित्कोऽपि **यँ**[5] मतो विमुक्तो भविता जनः ।
रामस्य सन्निधिं प्राप्य त्वं तु जीवन्न मुच्यसे.' ॥ १००
ततः **प्र**हस्तो '**ज** गति देवादिभ्यो न नो भयम्.' ।
इत्यब्रवीद्भृशं मत्तो, **बि**भीषण [6]उवाच तम्. ॥ १०१
'कर्तुं पराज **य** स्तस्य **रा**मस्य न मया त्वया ।
कुंभकर्णेन वा शक्यो राज्ञा वापि च सर्वथा. ॥ १०२
राममुक्ताः श **रा** घोरा न प्रविष्टास्तनौ तव ।
तेन **प्र**हस्त ! पुरतो **रा**वणस्य विकत्थसे. ॥ १०३
अयं राजा तु **म** हता व्यसनेन[7]ांतहेतुना ।
[8]अन्वास्यते प[9]राभूतो भवद्भिरहितैर्जडैः. ॥ १०४
रक्ष्यः सुहृद्भिः **श्री** मांस्तु निगृह्यापि [10]कचग्रहात् ।

उपयोग हत्तीला भिवविण्याकरितां कोणी करीत असतील व असाच अर्थ एथें इष्ट दिसतो. वन्यगज अशाच रीतीनें कोंडतात हें ज्यांनीं ऐकलें किंवा वाचलें असेल त्यांला वर सुचविलेला अर्थ विलक्षण वाटणार नाहीं. वर सुचविलेल्या अर्थाहून बरासा अर्थ एखाद्या विचक्षण वाचकाच्या मनांत झळकल्यास त्याचा फायदा इतरांसही करून द्यावा अशी सविनय प्रार्थना आहे.

१. सीतारूप सर्पिणी. २. मोठ्या अनर्थाला कारण होणारी. ३. सर्ग १४ श्लो० ४-९ पहा. ४. सिंहस्य. ५. यमापासून. बिभीषणानें एथें रामाचें सर्वातिशायि बल वर्णन केलें आहे. ६. सर्ग १४ श्लो० १०-२२ पहा. ७. देहांताला कारण होणाऱ्या (व्यसनानें). व्यसनम्=परस्त्रीविषयकः कामाभिलाषः. ८. सेव्यते. ९. अभिभूतः, नष्टविवेकः. १०. जसें एखाद्याला मोठ्या भूतानें पछाडलें ह्मणजे त्याचे आप्त, त्या पिशाचाविष्टानें कांहीं अनर्थ करूं नये ह्मणून, त्याची शेंडी वगैरे धरून निग्रह करितात तसें तुह्मीं केलें पाहिजे व अशा रीतीनें रावणाला नाशापासून वांचविलें पाहिजे. रावणाला कामपिशाचिकेनें झपटलें होतें.

यथा भीमबलैर्भूतैर्गृहीतो हितकारिभिः' ॥ १०५
इंद्रजित्तं पै **रा** नर्थशांतिकामं[1] पितु[2]र्हितम् ।
गर्हयामास दुर्वृत्तः सद्वृत्तं सदसि स्फुटम्. ॥ १०६
'त्वमत्र वंशे **म**[3] हिते भीरुरल्पबलो बु[4]धः ।
भीरो ! [5]भीषयसे किं नः पिता मे र[6]त्नभुक्प्रभुः. ॥ १०७
जितो ज[7]यंत **ज** नको मया वज्रधरो रणे ।
क्व वयं विश्वजेतारः क्व प्लवंगसखो नरः ?' ॥ १०८
तमाबभाषे **र्य**[8] क्षेंद्रशीलः साधु **बि**भीषणः ।
[9]मंत्रे बालस्त्वमानीतो येन वध्यः स दुर्मतिः. ॥ १०९
इंद्रजित्त्वं न **रा** ज्ञोऽस्य हितः[10] पुत्रोऽस्यरिर्ध्रुवम् ।
निवारयसि न प्राप्तं **रा**मान्नाशं सुदुर्मते ! ॥ ११०
अविवेकी त्व **म** ल्पर्श्[11]स्तीक्ष्णो वध्योऽसि बा[12]लिशः ।
रामलक्ष्मणयोर्बाल ! वज्रकोव्यधिकाः श[13]राः.' ॥ १११
उक्तवंतं नि **ज** हितं शु[14]द्धभावं **बि**भीषणम् ।
अब्रवीत्परुषं वाक्यं **राव**णः का[15]लचोदितः ॥ ११२

---

१. मोठ्या अनर्थाचा उपशम व्हावा अशी ज्याची इच्छा आहे अशाला. २. बापाचें (रावणाचें) हित करणाऱ्याला. ३. पूजिते. ४. पंडित किंवा ज्ञाता असूनही भीरु असा तूंच, किंवा 'अल्पबलोऽबुधः' असा पाठ कल्पावा. ५. 'भीषयसे' हें 'भी' धातूचें ण्यन्तरूप 'भियो हेतुभये षुक्' ७।३।४०,२५९५. ६. सर्व प्रकारांच्या उत्तम वस्तूंचा उपभोग घेणारा. 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते'. ७. जयंतपिता इंद्र. या श्लोकांतील सर्व विशिष्टपदें हेतुगर्भ आहेत. हें इंद्रजिताचें वाक्य ऐकून खालीं दिलेल्या वाक्यांची आठवण सहजच होते. 'बुद्धिः कर्मानुसारिणी', 'भवत्यपाये खलु मोहिनी मतिः'. ८. यक्षपति जो कुबेर त्याच्यासारखा ज्याचा स्वभाव आहे असा. ९. ज्यानें तुझ्या सारखा पोरगा मसलतीमंडळीमध्यें घेतला तो खरोखर वधार्ह, कारण ज्या गोष्टी दूरवर दृष्टी ठेवून केल्या पाहिजेत त्या गोष्टींत अप्रासंगिक पोरबुद्धि दाखवितोस. १०. 'पापान्निवारयति योजयते हिताय' त्यालाच हितचिंतक, मित्र ह्मणतात, परंतु 'नरकीं नेत्या सविग्रहा पापा' तुला हितपुत्र कसें ह्मणतां येईल? तूं खरोखर रिपूच आहेस. ११. साहसिकः, पुरुषवादी. १२. लाडकें पोर, लडका, छोकरा. १३. सर्ग १५ श्लोक ९-१४ पहा. १४. शुद्धाशयम्. १५. कालनोदितः, कालानें तसें परुष भाषण करण्याला प्रवृत्त केलेला, कारण समजून उमजून कोणी आपलें अनिष्ट इच्छित नाहीं.

‘[1]ज्ञातीनां ज्ञात **य** स्तुष्टा भवंति व्यसने सदा ।
वसेत्सहाहिना, नैव ज्ञातिना शत्रुसेविना. ॥ ११३
दले सरसि **ज** स्यांबुबिंदुः [2]श्लेषं न गच्छति ।
तथेषदप्यनार्ये हि सौहृदं सर्वथा जने. ॥ ११४
मम भाग्योद **य** स्ते न प्रियो [3]ज्ञातिरसि स्फुटम् ।
विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम्.’ ॥ ११५
एवं वक्ता [4]पै **रा** सुः स मुहूर्ते[5]ऽस्मिन्भवेत्परः ।
कृतघ्न! त्यक्तमर्याद! त्वां तु धिक् [6]कुलपांसन!.’॥ ११६
एवमुक्तः स **म** तिमान्परुषं वाक्यमुच्चकैः ।
न्यायवादी गदापाणि[7]रुत्पपा[8]तासनाद्द्रुतम्. ॥ ११७
सार्धं [9]चतुर्भिः **श्री** मान्स्वैः सचिवैर्नभसि स्थितः ।
अब्रवी**द्रा**वणं क्रुद्धः सभायामवमानितः. ॥ ११८
‘यथेष्टं ब्रूहि **रा** जन्मां ज्येष्ठः पितृसमोऽसि मे ।
परुषं न क्षमेऽहं ते न त्वं धर्मपथे स्थितः. ॥ ११९
हितकामेन **म** हितं वाक्यमुक्तं **द**शानन! ।
न गृह्णंत्यकृता[10]त्मानः कालस्य वशमागताः. ॥ १२०
सुलभास्ते [11]ह्य **ज** स्रं ये पुरुषाः प्रियवादिनः ।
[12]अप्रियस्य य पथ्यस्य वक्ता श्रोता च दुर्लभः. ॥ १२१

---

१. एकगोत्रोत्पन्न ते ‘ज्ञाति’, त्यांचे. २. कमलपत्राला जसा पाण्याचा बिंदु चिकटून राहत नाहीं तद्वत्. ३. गोड गोड बोलून माझें मन आपल्याकडे ओढून घेणारा ‘दायाद’ आहेस. ४. गतप्राण. ५. त्वदितरः. ६. हे कुलदूषक, कुलकलंक. ७. सर्ग १६ श्लो० १७ पहा. ८. सभा सोडून आसनावरून उठून जाण्याचें कारण असें:—‘उत्पथप्रतिपन्नस्य कार्याकार्यमजानतः । गुरोरप्यवलिप्तस्य परित्यागो विधीयते ॥’ [सर्ग १६ श्लो० १७ टीका.] ९. सुमालि नांवाच्या राक्षसाचे वसुदेपासून झालेले अनल, अनिल, हर व संपाति या नांवाचे चार पुत्र बिभीषणाचे सचिव झाले होते. मो० सं० रा० उत्तर० श्लो० ४८. १०. अशुद्धांतःकरणाः । ‘परान्तकाले हि गतायुषो नरा हितं न गृह्णंति सुहृद्भिरीरितम्.’ ११. हि अजस्रं (नित्यम्). १२. ‘सुलभाः पुरुषा राजन्! सततं प्रियवादिनः । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥’ [वा० रा० युद्धकांड—सर्ग १६ श्लो० २१.] हा श्लोक पंचतंत्रादि ग्रंथांतही आढळतो, तथापि त्याचें प्राचीनत्व बरेंच दूरचें असावें असें वाचकांस दिसून येईल.

तन्मर्षयतु **य** च्चोक्तं ग[1]ुरुत्वाद्धितमिच्छता ।
आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम्. ॥ १२२
स्वस्ति तेऽस्तु सु[2] **रा** राते! सुखी भव म[3]या विना ।
त्वामा[4]पृच्छ्य गमिष्यामि धर्मन्यायौ मतौ म[5]म.' ॥ १२३
तमेवमुक्त्वा **म** तिमान्यत्र **राम**: सलक्ष्मण: ।
तं देशमागतो व्योम्नि चतुर्भिः सचिवैः सह. ॥ १२४
दृष्ट्वा तं व्योम्नि ज[6] गतीधराभं **रा**वणानुजम् ।
सुग्रीवस्याज्ञया हंतुमुत्पेतुः कपयो रुषा. ॥ १२५
स महात्मा वि[7] **य** द्वर्ती **सु**ग्रीवं तांश्च वानरान् ।
उवाच, 'राक्षसपतेरनुजोऽहं **बि**भीषण:. ॥ १२६
ज[8]नस्थानाद्रा **ज** कन्या **जान**की मायया हृता ।
दशकंठेन सा रुद्धा शुद्धाचारा प्रभुप्रिया. ॥ १२७
स मया स[9]म **य** ज्ञेन प्रार्थितस्तद्धितार्थिना ।
साधु नि[10]र्यात्यतां **सी**ता **रा**मायेति पुनः पुनः. ॥ १२८
हितं वचो न **रा** ज्ञा मे गृहीतं परुषं बहु ।
प्रोक्तं ततस्तं त्यक्त्वाहं **राम**ं शरणमागत: ॥ १२९
शरण्याय स **म** र्थाय **रा**घवाय महात्मने ।
निवेदयत मां क्षिप्रं **बि**भीषणमुपस्थितम्.' ॥ १३०

---

१. तूं ज्येष्ठभ्राता असल्यामुळें मला पितृसम आहेस, त्यामुळें योग्यवेळीं मीं हितोपदेश केला. 'जरि समयीं न वदावी तरि मग केव्हां सदुक्ति बोलावी?' २. 'सुराराते' असें संबोधन केलें, याचें कारण उघडच आहे कीं मनुष्यापासून रावणाला भीति होती तेव्हां सुज्ञ बिभीषणानें 'स्वस्त्यस्तु मनुजाराते!' असें कसें म्हणावें. ३. ही व्यंग्योक्ति आहे. बिभीषण पक्कें जाणत आहे कीं स्वतः-शिवाय रावणाचें बरें कधीं व्हावयाचें नाहीं. ४. 'उत्पथप्रतिपन्नस्य कार्याकार्यमजानतः । गुरोरप्यवलिप्तस्य परित्यागो विधीयते ॥' अन्यच्च 'पतितैः सह संव्यवहारो न विद्यते' या वरील वाक्यान्वयें केलेला ज्येष्ठाचा परित्याग अधर्म्य नाहीं. ५. सर्ग १६ श्लो० १९-२५ पहा. ६. श्लो० १२५ पासून पुनः रामाकडील समुद्रतीराचा वृत्तांत सुरू झाला. जगतीधरस्य भूधरस्य इव आभा यस्य तम्. ७. वियति वर्तते इति गगनस्थः. ८. शुक्रसुता अरजा हिचें धर्षण केल्यामुळें दंडराजाचा व भूमीचा पांसुवर्षानें नाश झाला तेव्हां ऋषि वगैरे तें स्थळ (दंडकारण्य) सोडून दुसऱ्या वनांत गेले. त्या वनाला जनस्थान असें नांव पुढें पडलें. ९. कालज्ञेन, कालोचितज्ञेन. १०. परत पाठवावी, समर्पण करावी.

स्वयं कपींद्रः **श्री रा**ममुवाच, '**र**घुनंदन! ।
रावणस्यानुजः साक्षादागतोऽत्र **बि**भीषणः. ॥ १३१

निवेदयत **रा** माय क्षिप्रं मां शरणागतम् ।
इति वक्ति महाराज! चतुर्भिः सचिवैः सह. ॥ १३२

अहं तु वध्यं **म** न्ये तं, शत्रुपक्षे न विश्वसेत्.' ।
पप्रच्छ **राम**ः सर्वांस्ता'न्कथं कार्यमि'ति प्रभुः. ॥ १३३

तत्र **ता**रात्म **ज** स्तद्वदृषभो **जां**बवानपि ।
अन्ये च शंक्य इत्याहुः परीक्ष्यश्च विशेषतः. ॥ १३४

अंजनातन **य** स्तज्ज्ञः प्रोवाच प्रांजलिस्तदा, ।
'दौरात्म्यं[1] **रा**वणे दृष्ट्वा विक्रमं च तथा त्वयि. ॥ १३५

शरणं त्वां ध **रा** धीश! शरण्यं भक्तवत्सलम् ।
बिभीषणोऽयं संप्राप्त इति मन्ये **र**घूत्तम! ॥ १३६

न लक्ष्यतेऽस्य **म** तिमन्! ब्रुवतो दुष्टभावता ।
प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः. ॥ १३७

निःशंकोऽयं रा **ज** वर्य! न शठः[2] परिसर्पति ।
न चास्य दुष्टा वागस्ति तस्मान्मे नास्ति संशयः. ॥ १३८

उद्योगं[3] ते न **य** ज्ञस्य दृष्ट्वा दुष्टं च **रा**वणम् ।
वालिनं च हतं श्रुत्वा **सु**ग्रीवं चाभिषेचितम्. ॥ १३९

राज्यकामस्त्रि **ज** गतां नाथायं **रा**वणानुजः ।
बुद्धिपूर्वमिह[4] प्राप्तः कार्यस्ते तस्य संग्रहः. ॥ १४०

यथाशक्त्याश[5] **य** स्तस्य ज्ञात्वोक्तोऽयं मया प्रभो! ।
प्रमाणं त्वं हि शेषस्य श्रुत्वा बुद्धिमतां[6] वर!' ॥ १४१

प्रसन्नात्माथ **रा** जेंद्रस्तच्छ्रुत्वा **मा**रुतेर्वचः ।
प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि[7] स्थितम्[8]. ॥ १४२

---

१. दुरात्मनो भावः तत् । दुरात्मतां, दुष्टताम्. २. गूढविप्रियकारी सन्. ३. रावणवधविषयम्. ४. शरणागतवत्सल राम वालीप्रमाणें रावणाला मारील आणि सुग्रीवाप्रमाणें मला राज्य देईल अशा बुद्धीनें. ५. हृद्गतभावः. मारुतीनें झटकन् विभीषणाचा शुद्धभाव जाणला. 'झटिति पराशयवेदिनो हि विज्ञाः.' ६. सर्ग १७ पहा. ७. सकलशास्त्रश्रवणवान्. ८. स्वचित्ते स्थितम्.

‘विवक्षितं[1] म **म** श्राव्यं भवद्भिः श्रेयसि स्थितैः ।
मित्रभावेन[2] संप्राप्तं न त्यजेयं कथंचन. ॥ १४३
मामागतो यः **श्री** मान्स सत्कार्यो बंधुवन्मया ।
दोषो यद्यपि तस्य स्यात्सतामेतदगर्हितम्[3].’ ॥ १४४
सुग्रीवः पुन[4] **रा** हा‘र्य! व्यसनं प्राप्तमग्रजम्[5] ।
यस्त्यक्तवान्कृतघ्नोऽयं कमन्यं न परित्यजेत्.’ ॥ १४५
तमुवाचासी[6] **म** सत्वः प्रभुः कारुण्यसागरः ।
व्यसनेषु प्रहर्तारो ज्ञातयोऽन्ये च शत्रवः. ॥ १४६
सुप्रसिद्धं रा **ज** वृत्तमिदं लक्ष्मण! लौकिकम्[7] ।
पापाद्राज्ञो भयं प्राप्तस्तस्मादयमिहागतः[8]. ॥ १४७
मम त्वस्माद्भ **य** प्राप्तिर्नास्ति ज्ञातेर्हि साध्वसम्[9] ।
राज्यकामः स्वोपजीव्यविरोधं[10] न करिष्यति. ॥ १४८
संत्येव च[11]तु **रा** लोके सर्वत्र प्लवगेश्वर! ।
तस्माद्विभीषणो ग्राह्यः प्राप्तो भ्रातुर्महद्भयम्. ॥ १४९
न भ्रातरः[12] स **म** स्तास्तु भवंति भरतोपमाः ।

---

१. माझ्या कल्याणाकरितां झटणारे जे तुम्ही त्यांला मलाही थोडें बोलावयाचें आहे तें कृपा करून ऐकावें. इयमुक्तिः ‘सर्वमंतप्रतिक्षेपकस्वमतश्रवणेन सुग्रीवादीनां व्याकुलचित्तता मा भूदिति तेषामुपलालनाय’ इति तिलके. मम श्रेयसि स्थितैर्भवद्भिर्मद्विवक्षितं श्राव्यम्. २. मित्रत्वेन। ‘वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति’ इति शास्त्रात् । ‘अन्यैर्दोषोक्तिपूर्वकमग्राह्यत्वमुक्तम् । हनूमता निर्दोषत्वोक्तिपूर्वं ग्राह्यत्वमुक्तम् । भगवांस्तु प्रौढ्या सुग्रीवाद्युक्तं रंध्रप्रहारित्वमंगीकृत्यापि परिग्राह्यत्वं स्थापयति.’ [सर्ग १८ श्लो० ३ टीका.] ३. शरणागतदुष्टपरिग्रहणं सतामगर्हितम् (पूजितमित्यर्थः). ४. पुनः आह आर्य. ५. विपत्तींत पडलेल्याला. ६. न सीमा विद्यते अस्य इति असीमम् । असीमं सत्वं (चित्तौन्नत्यं) यस्य सः. ७. सर्वलोकप्रसिद्धम्. ८. नानाप्रकारस्वपीडाप्रवृत्तज्ञातिभयात् स्वत्राणार्थमिहागतः. ९. कारण ज्ञातिपासून भय असतें व आम्ही तर त्याचे बंधु नाहींत किंवा प्रातिदेश्यही नाहींत. १०. उलट त्यालाच तर आमच्या साहाय्यानें लंकेचें राज्य प्राप्त करून घ्यावयाचें आहे, तेव्हां अर्थात् आपल्या आश्रयदात्यांशींच कसा विरोध करील. स्व+उपजीव्य+विरोध+द्वि० प्र०. ११. तें सर्व खरें, पण तमःप्रधान राक्षसांना एवढा विचार कोठचा असें म्हणाल तर चतुर (पंडिताः=पर्यालोचनपूर्वमनुष्ठेयनिश्चयसमर्थाः) पुरुष सर्वत्र आढळतात. [सर्ग १८ श्लो० १३.] १२. भरताच्या मनांत ही भ्रातृत्यागबुद्धि कां उद्भवली नाहीं अशी शंका काढाल, तर माझें एवढेंच म्हणणें आहे कीं हातीं आलेल्या किंवा अवश्य येणाऱ्या राज्यलक्ष्मीला टाकणारा भरतासारखा भाऊ विरळाच.

पुत्रा वा [1]मद्विधास्तात! सुहृदो वा [2]भवद्विधाः.' ॥ १९०

[3]सलक्ष्मणः प्रां **ज** लिस्तं सुग्रीवः पुनरब्रवीत्, ।
'प्रहर्तुं त्वयि [4]विश्वस्ते मयि वा लक्ष्मणेऽपि वा. ॥ १९१

दशाननेना **य** मिह प्रभो! संदिष्ट आगतः ।
[5]जिह्मधी राक्षसो वध्यः सचिवैः सह सर्वथा.' ॥ १९२

तमुवाचार्त[6] **ज** नहृत्तोषदो रघुनंदनः, ।
'दुष्टोऽदुष्टोऽपि वास्त्वेष न मे कर्तुं क्षमोऽहितम्. ॥ १९३

पिशाचासुर **य** क्षा ये पृथिव्यां ये च राक्षसाः ।
[7]अंगुल्यग्रेण तान्हन्यामि[8]च्छन्हरिगणेश्वर! ॥ १९४

श्रूयते हि पु **रा** व्याधः शत्रुः शरणमागतः ।
[9]कपोतेनार्चितस्तात! स्वैश्च मांसैर्निमंत्रितः. ॥ १९५

[10]कंडुंगीताः सु **म** हिता गाथाः शृणु कपीश्वर!' ।
इत्युक्त्वा ताः स्वयं **रा**मो जगौ सर्वसतां मताः. ॥ १९६

---

१. 'सुखलिप्सया पितृवाक्यलंघनरहिताः । अत्र भूतार्थकथनरूपत्वात् नात्मप्रशंसादोषो भगवतः । स्वगुणाविष्क्रिया दोषो नास्ति भूतार्थशंसने' इति दण्डयुक्तेः. [स० १८ श्लो० १५ टीका.] २. त्यक्त्वापि सर्वसौख्यं सर्वाकारेण मित्रकार्यसाधकः सुहृत् परमदुर्लभ इति भावः.' ३. 'सहलक्ष्मण इत्यनेनोभयोरैकमत्यं दर्शितम्.' ४. मयि विश्वस्ते त्वयि लक्ष्मणे वा प्रहर्तुं असा अन्वय करावा. 'मयि विश्वस्ते इत्युक्तिः स्वव्यसनादपि स्वाश्रितव्यसनमरुंतुदमिति मत्वेति बोध्यम्.' विवक्षावशात् कारकाणि इति नियमात् मयीति द्वितीयार्थे सप्तमी. ५. शठधीः, वक्रबुद्धिः. ६. आर्तजनांच्या हृदयाला आनंद देणारा. ७. अनेन संकल्पसिद्धिरैश्वर्यं चिह्नमुक्तम्. ८. 'स्वस्य निरतिशयमहिमानं तात्त्विकं ब्रह्मभावं प्रकटीकर्तुमिच्छन् यदि स्यां तदा तथैव कुर्याम्, संप्रति तु देवभावोपेतनिजविलासैरशेषैरवध्यत्वमस्य मयैव दत्तमिति तत्परिपालनाय स्वदिव्यभावं स्वशक्त्यैवान्तर्धाय मानुषमर्यादायां स्थित्वा तद्भावप्रकटनायैव सीतावियोगप्रयुक्तरोदनवत् भवादृशसहायमेलनम् । वस्तुतो न स्वातिरिक्तसहायान्तरापेक्षा मम, मनुष्याणां संसारमर्यादाज्ञापनं तद्व्यवहारफलमिति भावः'. ९. कोणी एका व्याधानें एका कपोताची भार्या मारिली होती. तोच व्याध त्या कपोताकडे येऊन स्वमांस देण्याविषयीं प्रार्थना करूं लागला, तेव्हां त्या व्याधाला त्या कपोतानें आपलें मांस देऊन संतुष्ट केलें. 'स तिर्यग्जन्तुरपि भार्याहन्तारं शरणागतं नोपेक्षितवान् । किं पुनर्मद्विधो जनः सकलधर्मरहस्यवेत्ता क्षत्रियो भूत्वा अकृतापकारं शरणागतं न प्रतिगृह्णीयात्.' [स० १८ श्लो० २५ टीका.] १०. कंडु हा कण्वऋषीचा पुत्र. याचीं वचनें अशीं आहेत:—'हे शत्रुसंहारका, जर एखादा अतिदुष्ट शत्रु, हात जोडून व दीन अंतःकरणपूर्वक आश्रयार्थ आला तर त्याला क्षमा करावी, मारूं

'प्राणैः सहैव **श्री** स्त्याज्या रक्षता सुकृतं यशः ।
न प्रांजलिः शत्रुरपि त्रस्तः शरणमागतः. ॥ १५७
महती हि प[1] **रा** भूतिस्त्यजतः शरणागतम् ।
तस्मादहं करिष्यामि **कं**डोर्वचनमुत्तमम्. ॥ १५८
रघोर्वंशेऽत्र **म** हति प्रभवो बहवोऽभवन् ।
ते सर्वे हि महात्मानः [2]शरणागतपालकाः. ॥ १५९
जगत्सु त्रिष्व **ज** सुतः ख्यातो **द**शरथः प्रभुः ।
तत्पुत्रोऽहं कथं त्यक्तुं शक्नुयां शरणागतम्? ॥ १६०
[3]सकृत्प्रपन्ना **य** सखे तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो [4]ददाम्येतद्व्रतं मम. ॥ १६१
आनयैनं त्व **रा** वान्सन्दत्तमस्मै मयाभयम् ।
बिभीषणो वा **सु**ग्रीव! यदि वा **रा**वणोऽ[5]स्वयम्.' १६२
स्तुत्वा प्लवंग **म** पतिः श्री**राम** जगतां पतिम् ।
समानयत्स गगनात्समाहूय **बि**भीषणम्. ॥ १६३
[6]जहारर्ध्नां यद्र **ज** स्तादृ**ग**हल्याया [7]महद्रजः ।

नये. महात्मे पुरुष जे आहेत त्यांनीं जर एखादा शत्रु भयानें आश्रय मागण्यास आला तर आपल्या जीवाची पर्वा न करतां त्याचें संरक्षण करावें. जो कोणी भयानें, अज्ञानामुळें अथवा खुषीनें आपल्या आश्रितांचें रक्षण करीत नाहीं तो फार अधर्म करतो, व सर्व जन त्यास दोष देतात. आश्रयार्थ आलेला जेव्हां आश्रय देणाऱ्याच्या समक्ष मारला जातो तेव्हां आश्रय देणाऱ्याचें सर्व पुण्य नष्ट होतें. आश्रयार्थ आलेल्यास आश्रय न देण्यांत पाप आहे. त्यामुळें मुक्ति मिळण्यास अडथळा येतो, संकटें प्राप्त होतात, आणि शक्ति नष्ट होते.' [स० १८ श्लो० २६-३१.]

१. फजीती. २. शरणमागतास्तेषां पालकाः. ३. एकया वृत्त्या प्रपन्नाह=आत्मनो रक्षणं याचितुकामाय. ४. अत्र वर्तमानप्रयोगेण नित्यसत्सहजधर्मत्वमभयदानस्य द्योत्यते. ५. सर्ग १८ श्लोक ३४ पहा. ६. ही पंक्ति व 'जहारर्ध्नां यद्रजः' हा पाठ चुकीचा दिसतो, पंक्तींत वर्णाधिक्य आहे व पाठाचा अर्थ होऊं शकत नाहीं, यास्तव 'जहाराद्धा [ययोः] रजस्तादृगहल्याया महद्रजः' असा कल्पावा. अहल्योत्पत्तिकथा वा०रा० उत्तर० स० ३० श्लो० १९-३२, 'यद्यत्प्रजानां प्रत्यंगं विशिष्टं तत्तदुद्धृतम्, ततो मया रूपगुणैरहल्या स्त्रीविनिर्मिता, हलं नामेह वैरूप्यं हल्यं [निंद्यत्वम्] तत्प्रभवम् [वैरूप्यप्रभवम्] भवेत्, यस्या न विद्यते हल्यं तेनाहल्येति विश्रुता, अहल्येत्येव च मया तस्या नाम प्रकीर्तितम्.' ययोः पादयोः रजः=ज्या पायांची धूळ. अद्धा=एका क्षणांत. ७. मोठें पाप, रजः=पांशुः=पाप, 'अपांशुलानां धुरि कीर्तनीया' इति कालिदासः.

निपपात तयोर्मूर्ध्ना पादयोः स **बि**भीषणः. ॥ १६४
उवाच 'सद[1] **य** श्रेष्ठ! **रा**वणेनावमानितः ।
तस्यानुजोऽहं त्वामद्य [2]शरण्यं शरणागतः. ॥ १६५
त्यक्ता **लं**का रा **ज** धानी मित्राणि च धनानि च ।
भवद्गतं हि मे राज्यं जीवितं च [3]सुखानि च.' ॥ १६६
राघवो विन **य** ज्ञं तं सांत्वयित्वाब्रवीत्स्वयम्, ।
'आख्याहि मम तत्वेन राक्षसानां बलाबलम्.' ॥ १६७
सोऽब्रवीदिति, '**रा** जेंद्र! वरदानात्**स्व**यंभुवः ।
अवध्यः सर्वभूतानां **रा**वणो लोक[4]रावणः. ॥ १६८
कुंभकर्णो म **म** ज्येष्ठः [5]शक्रप्रतिबलो युधि ।
मणि[6]भद्रस्य जेतास्य [7]प्रहस्तो वाहिनीपतिः. ॥ १६९
ज्येष्ठः सुतोऽस्य **श्री** मान्स **मे**[8]घनादाभिधः प्रभो! ।
जातो ना**म्नें**द्रजिज्जित्वा युधींद्रं सुमहाबलः. ॥ १७०
तथा **म**होद **रा** ख्यश्च [9]**म**हापार्श्वोऽ**प्य**कंपनः ।

---

१. हे दयावत्सु श्रेष्ठ, हे दयावीर. २. शरणं (रक्षकः) भवितुमर्हतीति, आद्यः (मुख्य) शरण्यः तम्, किंवा 'त्वामद्य शरण्यं' असा पाठ घ्यावा. ३. हें बिभीषणाचें भाषण प्राकृत '**मं**त्ररामायणां'तील भाषणाशीं ताडून पाहावें. प्राकृत **मं**त्ररामायणांत असें आहे:—वंदुनि बद्धांजलि तो बिभीषण क्षोणिजावरास वदे; । 'भक्तभ्रमरासि मला स्वपदाब्जयुगार्हणावरासव दे. ॥ सदयहृदय हो देवा! माझ्याठायीं धरूं नको शंका; । रंकास मला तूझे चरण अलंकार हेच ते लंका. ॥ शरणागतजगपाळा! पापहरा! दुःखनाशना! चतुरा! । धार्मिकसदययशस्विप्राज्ञकवींचा अनर्घ्य तूंच तुरा. ॥ केवल विषप रसिक तो दशमुख झाला अमार्गवाटसुर; । केले फार उपप्लुत धरणीसुरसंघ, यज्ञवाट, सुर. ॥ त्वद्रत्नतस्कराला केला मी बोध फार, आरडलों;। अंधभसितबधिरीं तें दीपहवनगीत, कीं वनीं रडलों. ॥ हित कथितां, मज त्यानें सभेंत अवमानिलें अपारहितें; । मग तवपदोडुपें हीं झालीं दुःखाब्धिपात्रपारहितें. ॥ इक्ष्वाकुकुलश्रीच्या, करुणेच्या पूतकीर्तिच्या सद्मा! । रक्षावें मज' ऐसें प्रार्थुनि, वंदी नृपालपदपद्मा. ॥ [मंत्ररामायण—युद्धकांड—गीति ८६-९२ पृ० ९५.] ४. दशाननाला रावण हें नांव पडण्याचा प्रसंग वा० रा० उत्तर० स० १६ श्लो० ३६-३७ यांत वर्णिला आहे. ५. इंद्राप्रमाणें ज्याचें बल आहे. प्रतिबलः=तुल्यबलः ६. धनदस्य, कुबेरस्य. ७. हा रावणाचा सेनापति होता. ८. मेघनाद इति अभिधा यस्य सः, मेघनाद हें इंद्रजिताचें जन्मनाम, जन्मकाळीं त्यानें मेघाप्रमाणें गंभीर ध्वनि केला होता. वा०रा० उत्तर०स० १२ श्लो० २८-३१. ९. महापार्श्व, अकंपन, प्रहस्त वगैरे सुमालि नांवाच्या राक्षसाचे मुलगे व रावणाचे मामे हे उपसेनापति होते. प्रहस्त सेनापति होता.

तस्योपसेनापतयो लोक[1]पालसमा युधि. ॥ १७१

सर्ववीरोत्त **म** ! स्वामिन् ! लंकायां कामरूपिणाम् ।

दशकोटिसहस्राणि रक्षसां संति मुख्यशः. ॥ १७२

ये लोकपाला **ज**[2] न्ये ते भग्नाः सर्वे सुरैः सह.' ।

बिभीषणवचः श्रुत्वा स्वयं **र**घुवरोऽब्रवीत्, ॥ १७३

'हत्वा रक्षोना **य** कं तं स[3]प्रहस्तानुजात्मजम् ।

राजानं त्वां करिष्यामि सत्यं प्र[4]तिश्रुणोमि ते.' ॥ १७४

अ[5]थाब्रवीत्स, '**रा** जेंद्र ! राक्षसानां वधे पु[6]रः ।

प्र[7]धर्षणेऽहं साहाय्यं करिष्यामि यथाबलम्.' ॥ १७५

इति ब्रुवाणं **म** धुरं परिष्वज्य **बि**भीषणम् ।

रामः प्रीतोऽनुजं प्राह, 'समुद्राज्जलमानय. ॥ १७६

तेन त्वमाशु **ज** लधेर्जलेनेमं **बि**भीषणम् ।

अभिषिंचाद्य राजानं रक्षसां वीर[8]मानद!' ॥ १७७

एवमुक्तः प्र[9] **य** तधीरभ्यषिंचद्बिभीषणम् ।

मध्ये वानरमुख्यानां राजानं राजशासनात्. ॥ १७८

स[10]द्यःप्रसादं **ज** गतां भर्तुर्दृष्ट्वा प्लवंगमाः ।

प्र[11]चुक्रुशुर्महात्मानं 'साधुसाध्वि'ति चाब्रुवन्. ॥ १७९

अथाब्रवी'त्तो **य** राशिं त[12]रा म कथमित्यमुम्' ।

बिभीषणं **वा**युसूनुः **सु**ग्रीवश्च महामतिम्. ॥ १८०

प्रत्युवाच, 'स **रा** जायं **रा**घवस्तेजसां निधिः ।

---

१. अष्ट दिक्पालांच्या बरोबरीचे, इंद्र, अग्नि, यम, निर्ऋति, वरुण, ईशान कुबेर व वायु हे प्राची, आग्नेयी इत्यादि दिशांचे अनुक्रमें लोकपाल आहेत. २. युद्धांत. ३. प्रहस्त, अनुज (कुंभकर्ण), आत्मज (इंद्रजित्) यांसहित असलेल्याला. ४. वचन देतों. ५. 'अथ बिभीषणो रामस्य स्वार्थसाधनप्रतिज्ञां श्रुत्वा स्वयमपि रामकार्यसाधनं प्रतिजानीते.' ६. लंकायाः. ७. हल्ल्याचे प्रसंगीं. ८. हे वीराचा संमान करणाऱ्या. ९. प्रयता (पवित्रा) धीर्यस्य सः. १०. तात्कालिक प्रसाद. ११. संतोषात् किलकिलामकुर्वन्. १२. तृ+लोट् आम, 'इच्छार्तेषु लिङ्लोटौ' ३।३।१५७ या नियमानें विधिलिङ्प्रमाणें लोट्लकाराचा एथें उपयोग केला आहे.

सागरं पूर्वज[1]कृतं शरणं गंतुमर्हति. ॥ १८१

सगरेणाय **म** ब्धिर्हि खानितः सागरस्ततः ।

कर्तुमर्हति **राम**स्य ज्ञाते[2]: कार्यं महोदधिः.' ॥ १८२

विभीषणोक्तं श्री भर्तुः सागरस्योपवेशनं[3] ।

प्रकृत्या धर्मशीलस्य त**द्रा**मस्याप्यरोचत. ॥ १८३

कुशास्तीर्णेऽम्बु **रा** शेः स श्री**रा**मो विमले तटे ।

संविवेश तदा साक्षाद्वेद्यामिव हुताशनः. ॥ १८४

ततो निविष्टां[4] **म** हतीं ध्वजिनीं[5] पतिपालिताम् ।

अभ्येत्य दृष्ट्वा शार्दूल[6]: प्रतिगम्य **द**शाननम्. ॥ १८५

कथयामास **'ज** लधेः प्रतीरे **रामलक्ष्म**णौ ।

सीतायाः पदं[7]भायातौ, तत्सैन्यं सागरोपमम्. ॥ १८६

दानं[8] वा साम **य** त्नेन भेदो वाऽत्र प्रयुज्यताम् ।

बलं निविष्टं खं व्याप्य सर्वतो दशयोजनम्.' ॥ १८७

शुकं[9] नाम त्व **रा** युक्तं ततः संदिश्य राक्षसम् ।

प्राहिणोत्सामभेदार्थं **सुग्रीवं** प्रति **राव**णः. ॥ १८८

शुको विहंग **मं**[10] तनुर्व्योम्नि स्थित्वा कपीश्वरम् ।

उवाच, 'त्वं मम भ्राता[11] महाराजकुलोद्भवः. ॥ १८९

रामस्य भार्यां **ज** यतां [12]वैरोऽहमहरं यदि ।

---

१. सगर राजानें नव्याण्णव यज्ञ केले व शंभरावा यज्ञ करण्याचे वेळीं इंद्राला भीति पडून त्यानें त्या राजाचा यज्ञीयाश्व चोरून पातालांत कपिलमुनीच्या आश्रमांत ठेवला. त्या अश्वाच्या शोधाकरितां सगरपुत्रांनीं पृथ्वी खणली, अशा रीतीची सागराची उत्पत्ति सांगितली आहे, सगर हा ब्रह्मदेवापासून विसावा पुरुष आहे, सगरापासून विसावा पुरुष राम (दाशरथिः) आहे, वा० रा० अयोध्या० स० ११०. २. ज्ञातेः रामस्य असा अन्वय करावा. ३. सागर-शरणगमनम्. ४. तळ देऊन राहिलेली. ५. सेनाम्. ६. वानरसेनेची टेहाळणी करण्यासाठीं आलेला रावणाचा चार किंवा हेर, त्याचें नांव शार्दूल होतें. ७. त्राणमुद्दिश्यागतौ, 'पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुषु' इत्यमर. ८. शत्रूला वश करण्याचे उपाय राजनीतींत चार सांगितले आहेत, ते असेः—साम, दान, भेद, व दण्ड. ९. शुक हा रावणानें श्रीरामाच्या सैन्यांत 'फूट' करण्याकरितां पाठविलेला राक्षस. [स०२०पहा.] १०. पक्षिरूपः. ११. 'मम-भ्राता' असें जवळचें नातें जोडलें तें वालीशीं सख्य असल्यामुळें; शिवाय, या वेळीं रावणाला आपला अर्थ साधावयाचा होता. १२. जय मिळविणारांमधें श्रेष्ठ जो मी, मागील श्लोकांत रावणानें सुचविलें कीं तिसऱ्याबद्दल भावांनीं आपसांत तंटा उपस्थित करूं नये, बरें या तं-

किं तत्र तव **सु**ग्रीव ! **कि**ष्किंधां प्रति गम्यताम्.॥ १९०
त्यजतो मां प्रि **य** सखं नास्त्यर्थस्तव कश्चन ।
अनर्थः[1] प्रत्युत, प्राप्तुं लंका[2]ऽशक्या[3] नृत्वानरैः.’॥ १९१
तं खमुत्प्लुत्य **ज** गृहुर्वानराः पीडितः **शु**कः ।
उवाच ‘दूतान्न घ्नंति **राम** ! तत्साधु वार्यताम्.[4]’॥ १९२
‘दूतः प्राणांत[5] **य** मयं नार्हतीति’ प्रभोर्वचः ।
श्रुत्वा तं मुमुचुः कीशाः श्रीशाज्ञावशवर्तिनः. १९३
गगनस्थः स **रा** जानं **शु**कः **सु**ग्रीवमब्रवीत् ।
‘किं मया लघु वक्तव्यो **रा**वणो लोक[6]रावणः.’ ॥ १९४
वानरेंद्रस्त **म** वद[7]’न्नानु[8]कंप्योऽसि मे सखा[9] ।
रामस्यारिस्त्वमस्माकं वध्यो **वा**लीव बालिशं[10] !॥ १९५
त्राता न स त्वां **श्री** [11]कंठो **रा**मात्पाप ! न मुंच्यसे[12] ।
एतत्प्रत्युत्तरं दत्तं निवेदय **द**शाननम्.’ ॥ १९६
तदांगदस्तं **रा** जानमब्रवी‘देष राक्षसः ।
[13]दूतश्चारोऽपि [14]तुलितं सर्वसैन्यमनेन नः. ॥ १९७
लंकां रक्षोध **म** स्यास्य गमनं मे न रोचते, ।
गृह्यतां पुनरत्रायं वध्यतां वानरेश्वर !’ ॥ १९८
[15]राजाज्ञया तं **ज** गृहुर्विलपंतमनाथवत् !
तत्प्रार्थितोऽब्रवी**द्रा**मो ‘मुच्यतां दूत आगतः[16].’ ॥ १९९

त्यांत औदासीन्य ठेवणार नाहींस तर मी तुला सांगून ठेवतों कीं सीताहरण ज्यां विश्वविजेत्या रावणानें केलें, लंकेत माकडांचा रिघाव होणें अशक्य आहे असें या श्लोकांत सांगितलें.

१. उलट अनर्थ (अनहित) मात्र होईल. २. न शक्या. ३. नृभिः (नरैः) वानरैश्च. ४. ‘वार्यताम्’ याला ‘वानरकृतं मत्पीडनम्’ अशा अर्थाचा अध्याहृतकर्ता घेतला पाहिजे, खरोखर, ‘वानरा वार्यन्ताम्’ असा प्रयोग पाहिजे होता. ५. प्राणनाशं. ६. लोकरावण इत्यनेन तत्संदेशं विनैव गमने ततो मे महद्भयमिति सूचितम्. ७. अवदत्. ८. न अनुकंप्यः=न दयापात्रम्. ९. न मे सखा. १०. मूर्ख; childish. ११. शिवः. १२. मोक्ष्यसे. रामापासून तुझी सुटका होणार नाहीं. [स० २० श्लो० २३-२५.] १३. दूतः=‘स्वामिसन्देशप्रापणकृत्यः सेवक एव केवलं न किन्तु गुप्ततया परबलपरीक्षाप्रवृत्तिश्चारोऽपि.’ १४. एवं प्रमाणमेवं व्यूहमिति सर्वं परिछिन्नमित्यर्थः. १५. सुग्रीवनिदेशात्. १६. सर्ग २० श्लो० ३४ पद्य.

कुशेषु रामो **य** त[1]त्राक् प्रतिशिश्ये पयोनिधेः ।
वरमिच्छन्[2]त्रिशास्तिस्र [3]उपाधाय भुजं प्रभुः. ॥ २००

न ददौ वारि **रा** शिः स यदा दर्शनमुद्धतः ।
प्रभुर्मुमोच विशिखान् विवि[4]शुस्तेऽम्बुधेर्जले. ॥ २०१

व्याकुलोऽभूत्स **म** हता तेजसा सागरः प्रभोः ।
[5]मामेत्युक्त्वा समुत्पत्य **सौ**मित्रिर्धृतवान्धनुः. ॥ २०२

उवाच **रामो** '**ज** लधेः शोषितस्येषुतेजसा ।
परं तीरं गमिष्यंति पद्भिरेव [6]प्लवंगमाः.' ॥ २०३

इत्युक्त्वा प्रल **य** [7]अभ्रप्रभः प्रभुवरः पुनः ।
ब्रह्मणोऽस्त्रेण संयोज्य [8]शरं धनुषि संदधे. ॥ २०४

चापे विकृष्टे **ज** लधिः क्षुभितः प्रलये यथा ।
[9]पर्वतप्रतिमोग्रोर्मिर्व्यतिचक्रा[10]मं योजनम्. ॥ २०५

सर्वः प्रातभ **य** स्तेन ब्रह्मास्त्रेणाभवद्भृशं ।
सकंपा गिरयः कृत्स्ना, निष्प्रभोऽभूद्दिवाकरः. ॥ २०६

सिंधुमध्याद्व **रा**[11] कारो नानारत्नैर्विभूषितः ।
उदयाद्रेरिव रविः **सा**गरः स्वयमुत्थितः ॥ २०७

स उपागम्य **म** धुरमुवाचामंत्र्य **रा**घवम् ।
'[12]स्वभावे तात तिष्ठंति भूतान्यहमपि प्रभो! ॥ २०८

राजेंद्र! **राम! श्री** मंस्त्वं कुरु सेतुं मयि प्रभो! ।

---

१. मौनी. २. तीन रात्रीपर्यंत. [सर्ग २१ श्लो० १०.] ३. बाहूला उसें करून. ४. सर्ग २१ श्लो० २६-२७ पहा. ५. मा मा=नका, नका. [स० २१ श्लो० ३३.] सागरांतील प्राण्यांचा नाश करूं नका असें लक्ष्मणानें रामास सांगून त्याच्या हातांतून धनुष्य घेतलें. ६. सर्ग २२ श्लो० ३ पहा. ७. प्रलय+अभ्र+प्रभा=प्रलयकालीन सूर्याप्रमाणें ज्याचें तेज आहे असा. [अभ्र=सूर्य. 'भास्कराहस्करअभ्रप्रभाकरविभाकराः' इत्यमरः.] ८. त्या बाणावर ब्रह्मास्त्राचा प्रयोग करून शरसंधान केलें. ९. पर्वतप्रतिमा=पर्वततुल्या । उग्रा=भयंकरा । ऊर्मिः=लाट. १०. एक योजनपर्यंत समुद्राच्या मर्यादेपलीकडे गेली. ११. वराकारः=शोभनाकारः. १२. 'एतावत्कालमनागमने स्वीयमगाधत्वमेव कारणमिति सूचयति, अशी जडधी जो जलधि त्याचे संबंधाची तिलककाराची व्याख्या आहे.

ग्राहा न प्रहरिष्यंति[1] जलस्तंभो[2] न मे मतः. ॥ २०९
मत्स्वभावो न **रा**धीश! यद्गाधो[3]ऽहमर्णवः[4] ।
गाधत्वं तु विकारो मे, क्षमस्व कुरु मद्वचः.' ॥ २१०
तमब्रवीद्रा **म**भद्रः, 'शृणु मे वरुणालय! ।
अमोघोऽयं महाबाणः कस्मिन्देशे निपात्यताम्[5].'॥ २११
प्रभुं प्रोवाच **ज**लधिः पापैर्दस्युभि[6]राकुलः ।
द्रुमकुल्याभिधो[7] देशः शरोऽयं तत्र पात्यताम्.'॥ २१२
तस्मिन्स्थाने सा **य**कं तं मुमोच रघुपुंगवः ।
तत्र व्रणो[8]ऽभवत्तोयमुत्पपात रसातलात्. ॥ २१३
व्रणः[9]कूपःश **रा**ज्जातो विश्रुतः सोऽक्षयोदकः ।
तत्स्थलं म[10]रुकांतारमिति नाम्नाऽभवद्भुवि. ॥ २१४
ददौ वरांश्च **मं**[11]रवे, सुक्षीरो विविधौषधिः ।
पशव्य[12]श्चाल्परोगश्च स देशः स्नेहवानभूत्. ॥ २१५
उवाच रामं **ज**लधि 'विश्वकर्मसुतो नलः[13] ।
करोतु मय्ययं सेतुं धारयिष्याम्यहं प्रभो!' ॥ २१६
एवमुक्त्वा तो **य**राशिस्तदैवांतर्हितोऽभवत् ।
[14]नगैरगैर्नलः सेतुं चकार शतयोजनम्. ॥ २१७

---

१. वानरांना त्रास देणार नाहींत. २. घट्ट वगैरे करून जलाची द्रवस्थिति नाहींशी करणें. उदाहरणार्थ, बर्फमय होऊन जाणें. ३. फार खोल. ४. तरून जाण्याकरितां अशक्य. ५. सर्ग २२ पहा. ६. महासाहसिकैः। घोर पातकें करणारांनीं. ७. द्रुमकुल्य इति अभिधा यस्य सः. द्रुमकुल्य हें नांव पडण्याचें कारण एवढेंच दिसतें कीं, त्या प्रांतांत झाडांच्या पोंखरलेल्या बुंध्यांचा पाटाप्रमाणें उपयोग करीत असत. ८. खांच. ९. 'सोऽक्षयोदकः शराज्जातः कूपो व्रण इत्येव अन्वय विश्रुतः' असा. १०. बाणशोषितजलवत्त्वात्ततः परं मरुकांतारमिति ख्यातम्। हा मारवाड देश अशी लोकांची समजूत आहे. ११. मरुकांताराला. १२. पशूंना हितकर. १३. नल सेतु करील असें सुचविण्याचें कारण इतकें कीं, त्याच्या हातच्या वस्तु पाण्यावर तरत. नल ऋषींच्या विष्णुमूर्ति (गंडकीशिला) पाण्यांत फेंकून देई, त्यामुळें ऋषींनीं शाप दिला होता कीं त्वां पाण्यांत टाकलेली वस्तु कधीं बुडणार नाहीं. नल हा विश्वकर्म्यांचा पुत्र. याला सर्ववस्तुनिर्माणसामर्थ्यरूप वर पित्यानें दिला होता. तसेंच विश्वकर्म्यानें आपल्या बायकोस असा वर दिला होता कीं तुला माझ्या सारखा पुत्र होईल. या वराच्या योगें सेतु बांधण्यास नल सर्वतोपरी योग्य होता. [सर्ग २२ श्लो० ४१-४७ पहा.] 'नळकपी बाळपणीं । शाळिग्राम टाकी जळीं नेऊनी । मग ऋषी म्हणती जीवनीं । पाषाण तरोत तव हस्तें ॥' [रामविजय–अध्याय २३ ओवी १२१ पहा.] १४. नगैः=झाडांनीं । अगैः=पर्वतांनीं.

दृष्टैः कीशैः कुं **ज** राभैस्तदाह्ना प्रथमेन सः ।
रचितः सागरे सेतुर्योजनानि चतुर्दश. ॥ २१८

प्लवंगमैरा **य** तः स द्वितीया[1]हेन सत्वरैः ।
कृतः पयोनिधौ सेतुर्योजनानि तु विंशतिः. ॥ २१९

तृतीयेन त्व **रा** वद्भिर्बद्धोऽह्ना सेतुरंबुधौ ।
योजनानि महाकायैरेकविंशतिरेव सः. ॥ २२०

चतुर्थेनाथ **म** हता तैरुत्साहेन वारिधौ ।
द्वाविंशतिर्योजनानि निर्मितः सेतुरद्भुतः ॥ २२१

[2]प्रतापतोऽथ [3]**श्री** जानेस्तस्याह्ना पंचमेन तैः ।
सत्रयोविंशतिः सेतुर्योजनानि विनिर्मितः. ॥ २२२

कीशैर्ध[4]राध **रा** कारैः [5]कृतः सेतुर्धराधरैः ।
दशयोजनवीस्तीर्णः शतयोजनमायतः. ॥ २२३

नलसेतुं त **म** मराः सिद्धगंधर्वदानवाः ।
[6]सीमंतमिव पाथोधौ ददृशुस्तेऽतिविस्मिताः. ॥ २२४

प्लवंगसेना **ज** लधिं सा तेन **न**लसेतुना ।
ती[7]र्णा त्रि[8]भिरहोरात्रैः पुरःसर**वि**[9]भीषणा. ॥ २२५

[10]मरुतस्तन **य** स्कंधं **राम** आरुह्य सागरम् ।
सौमित्रिरंगदस्कंधं तीर्णः[11] सेना[12]पुरःसरः. ॥ २२६

महर्षिभिः सु **रा** स्तत्र पुण्यैर्मंदा[13]किनीजलैः ।
समभ्यषिंचन् 'द्विषतस्त्वं जये'त्यब्रुवन् प्रभुम्. ॥ २२७

---

१. द्वितीयं अहः द्वितीयाहः तेन । 'न संख्यादेः' ५।४।८९ या नियमानें 'अहन्' याचें 'अह' असें रूप झालें. 'रात्राह्नाहाः पुमांसः' २।४।२९ या नियमानें पुंलिङ्गत्व झालें. 'अपवर्गे तृतीया' २।३।६ या नियमानें फलप्राप्तीच्या अर्थी तृतीया झाली. २. प्रतापतः अथ. ३. श्रीः जानिः (जाया) यस्य स तस्य । 'जायाया निङ' या सूत्रानें जाया शब्दाबद्दल 'जानि' असा आदेश झाला. ४. पर्वताकारैः. ५. 'कर्तृकरणयो स्तृतीया' २।३।१८. या नियमानें करणी तृतीया. ६. सीमन्तः=भांग. ७. परतीराला जाऊं लागली । तॄ+कर्तरिक्तः. ८. 'त्रिभिः अहोरात्रैः' यांचा अन्वय पुढील श्लोकांतील 'सागरं तीर्णः' यांच्याशीं करावा म्हणजे अपवर्गे तृतीया करून अर्थ ठीक दिसतो. ९. पुरःसरो विभीषणो यस्यां सा. १०. 'मरुत्तनयस्कंधम्' असें समस्त पद पाहिजे । सापेक्षत्वेऽपि गमकत्वात् समासः । किंवा 'मरुतः तनयस्य स्कंधम्' अशीं पृथक् पदें पाहिजेत. ११. परतीराला गेला । तॄ+कर्तरिक्तः. १२. सेनायां पुरःसरः. १३. 'मंदाकिनी' हें स्वर्गातील गंगेचें नांव । चित्रकूटाजवळ याच नांवाची नदी आहे परंतु ती निराळी । एथें स्वर्गंगाच घेतली पाहिजे.

उत्तीर्य सिंधु **म** थ तां **लं**कां पर्वतमूर्[1]धनि ।
दृष्ट्वा प्रभूक्तः **सु**ग्रीवो मोचयामास तं **शु**कम्. ॥२२८

दशाननं द्वि **जं**[2] तनुः **शु**कः क्षिप्रमुपागमत् ।
हसन्नुवाच तं राजा, 'लूनप[3]क्षः कुतो भवान्.?' ॥२२९

स **शु**कस्तत्र **य** त्प्राप्तं बंधनं [4]तर्जनं स्वयम् ।
[5]वाचिकं चाब्रवी**द्रा**मागमनं सेतुबंधनम्. ॥ २३०

'[6]ऋक्षवानर **ज** न्मानो महात्मानो महाबलाः ।
दुर्जयाः समरे राजन्नसंख्याताः समागताः. ॥ २३१

सीतां वाऽस्मै प्र **य**[7] च्छाशु युद्धं वा राक्षसेश्वर! ।
पुरीप्[8]राकारमायांति क्षिप्रमेक[9]तरं कुरु.' ॥ २३२

रावणस्तद्गि **रा** क्रुद्धस्तमुवाच, 'सुरासुराः ।
यदि मां प्रति युध्येरन्न प्रदास्यामि **मै**थिलीम्. ॥ २३३

स **रा**घवो म **म** बलं [10]नाज्ञासीदेव निस्[11]तुलम् ।
कपिसैन्यैः सहागत्य तेन मां योद्धुमिच्छति.' ॥ २३४

[12]दक्षावमात्यौ **श्री** मान्स प्राहिणो**च्छु**क**सा**रणौ ।
[13]हरिरूपधरौ वीरौ प्रविष्टौ कपिवाहिनीम्. ॥ २३५

बलं तद्वान **रा** णां तावच्चित्यं [14]लोमहर्षणम् ।
नाशक्नुवातां संख्यातुममात्यौ **शुकसा**रणौ. ॥ २३६

तौ [15]गृहीत्वा स **म** तिमान्प्रतिच्छन्नावपि स्वयम् ।
आचचक्षे **रा**घवाय दर्शयित्वा **बि**भीषणः. ॥ २३७

---

१. त्रिकूटाचलाच्या मध्यम शिखरावर. २. पक्षाच्या रूपानें असलेला. ३. पंख ज्याचे कापून टाकले आहेत असा. ४. भेडसावणें. ५. निरोप. ६. ऋक्षेभ्यो वानरेभ्यश्च जन्म येषां ते. ७. प्र+दाण् (इच्छ)+लोट.८. लंकापुरीच्या तटाजवळ थोड्याच वेळानें येतील वा. रामायणांत 'पुरा प्राकारमायान्ति' असा पाठ आहे । स्वल्पेनैव कालेन प्राकारसमीपमायास्यन्ति । पुरायोगे भविष्यति लट्. ९.दोहोंपैकीं एक. १०.'अज्ञासीत्' हें लुङ्लकाराचें 'ज्ञा' धातूचेंरूप.११.अतुल. १२. कार्य करण्यांत मोठे कुशल असे दोन शुकसारण नांवाचे अमात्य. पूर्वींचा चार जो शुक तो आतांच्या अमात्य शुकाहून भिन्न होय. १३. वानराचें रूप धारण करणारे. १४. ज्याचें संबंधानें बुद्धि कांहीं काम करूं शकत नाहीं व म्हणूनच रोमांचित करणारें (अर्थात् मोठें भयप्रद) सैन्य. १५. राक्षसी मायेनें आलेले शुक सारण आपलें कार्य साधून, कपटवेष समजूं न देतां, गेले असते । परंतु त्यांला बिभीषणानें पकडलें । बिभीषणाचा रामाला उपयोगीं पडण्याचा हा पहिला प्रसंग.

तौ दृष्ट्वा तं रा **ज** सिंहमूचतू '**रा**वणाज्ञया ।
आवां बलं परि[1]ज्ञातुमागताविति कातरौ[2]. ॥ २३८

प्रहसन्सद **र्थ**[3] स्वांतस्तावुवाच **र**घूत्तमः ।
'कृतं कार्यं यथोक्तं चे[4]च्छंदतः प्रतिगम्यताम्. ॥ २३९

न दृष्टं चेच्च **रां**[5] वेतत्**सु**ग्रीवस्य महद्बलम् ।
बिभीषणो वां[6] कार्त्स्न्येन[7] पुनः संदर्शयिष्यति. ॥ २४०

ग्रहणं प्राप्य **म** त्तो मा भेतव्यं खलु राक्षसौ ! ।
बिभीषण ! सखे ! मुंच, चारौ वध्यौ न सर्वथा. ॥ २४१

वित्तेशस्यानु **ज** स्तत्र वक्तव्यो वचनं मम ।
यद्बलं स्वं समाश्रित्य **सी**तां मे हृतवानसि. ॥ २४२

तद्रणे दर्श **य** स्व त्वं सप्राकारां सतोरणाम् ।
लंकां चमूं च पश्यारे! शरैर्विध्वंसितां मया.' ॥ २४३

इति श्रुत्वा तं '**ज** ये'ति प्रोक्त्वा[8] **लं**कां ततो गतौ ।
तौ **द**शाननमब्रूतामनुभूतं यदात्मना. ॥ २४४

'**कौ**सल्यातन **य** स्तस्य तत्तुल्यो[9] **ल**क्ष्मणोऽनुजः ।
बिभीषणश्च मतिमान्**सु**ग्रीवश्चेंद्रविक्रमः. ॥ २४५

चत्वारस्ते प **रां**[10] क्रांताः सप्राकारामिमां पुरीम् ।
उत्पाट्य संक्रामयितुं[11] सर्वे तिष्ठंतु वानराः[12]. ॥ २४६

लंकामेकः स **म** र्थोऽस्ति जेतुं तिष्ठंतु ते त्रयः ।
राजन्नलं विरोधेन[13] **सी**ता **रा**माय दीयताम्.' ॥ २४७

उवाच राजा **श्री** मांस्तं **सा**रणं, '**जा**नकीमहम् ।
न प्रदास्यामि **रा**माय त्वं त्रस्तस्तद्ग्रहादध्रुवम्. ॥ २४८

---

१. 'बलं परिज्ञातुमागतौ' असें स्पष्ट सांगण्याचें कारण हेंच कीं जीवाची निराशा त्यांना वाटली होती. २. कातर=भित्रा, भ्याड. ३. सदय अंतःकरणाचा राम. ४. आपल्या इच्छेप्रमाणें. ५. हे चारांनो (चर व चार हे समानार्थक शब्द आहेत.) ६. युवाम्. ७. पूर्णपणें. [सर्ग २५ पहा.] ८. 'प्रोक्त्वा' हा अशुद्ध प्रयोग आहे । तेथें 'प्रोच्य' असें पाहिजे. 'समासेऽनञ्पूर्वे क्त्वो ल्यप' ७।१।३७. या नियमानें 'प्र' हें अव्यय मागें असल्यामुळें क्त्वाच्या जागीं ल्यप व्हाययाला पाहिजे. ९. हा पाठ चुकीचा दिसतो । 'स तुल्यो' असें पाठांतर कल्पिलें तर अर्थ जुळतो. १०. समर्थ । परा+क्रम्+कर्तरिक्त;. ११. दुसऱ्या ठिकाणीं नेऊन ठेवण्याकरितां. १२. सर्व वानर तर राहूंच द्या. १३. विरोध पुरे आतां । विरोध करून कांहीं उपयोग नाहीं. [सर्ग २५ श्लो० २७-३३.]

को हि नाम प **रा** क्रम्य रणे मां जेतुमर्हति?'।
स इत्युक्त्वारुरोहोच्चप्रासादं तद्दिदृक्षया. ॥ २४९
दृष्ट्वा प्लवंग **म** बलं सर्वत्रार्णवसन्निभम्।
पप्रच्छ **सा**रणं तेषां नामसंख्यादि[1] **रा**वणः. ॥ २५०
'एष **नी**लो **ग ज**श्चैष सेतुहेतुर्[2]**न**लस्तथा।
एषों**ऽ**गदो **वा**लिपुत्रो **जां**बवानृक्षराडयम्. ॥ २५१
तन्नाम[3]रूपं **य** त्तेजः सैन्यं चापि प्रधानतः।
सारणः कथयामास तौ च श्री**राम**लक्ष्मणौ. ॥ २५२
सैन्यसंख्या गि **रा** वाच्या[4] **सु**ग्रीवसचिवा हि ये।
एषां कोटि[5]सहस्राणि नव पंच च सप्त च. ॥ २५३
प्रसंख्यातास्तेऽ **म** रार्णां[6] तेजोगुणसमन्विताः।
तथा शंकुसहस्राणि तथा वृंदशतानिच.' ॥ २५४
श्रुत्वोत्कर्षं रा **ज** राजभ्राता **रा**मस्य वर्णितम्।
भर्त्सयामास तौ वीरौ कथांते **शु**क**सा**रणौ. ॥ २५५
'हन्यां भवंतौ **य** न्मूढौ शत्रुपक्षप्रशंसिनौ।
यदि पूर्वोप[7]कारैर्मे न क्रोधो मृदुतां व्रजेत्.' ॥ २५६
गतावमात्यौ **ज** नितत्रासौ तावथ **रा**वणः।
शार्दूलं प्रेषयामास चरमन्यैश्चरैः सह. ॥ २५७
प्रविश्य सैन्यं **य** त्तेन स पश्यन् मायया वृतः।
बिभीषणेन **शा**र्दूलो ग्राहि[8]तः पापधीरिति. ॥ २५८
मोक्षि[9]तः सोऽपि **रा** मेण वध्यःमानः प्लवंगमैः।

---

१. नाम च संख्या च नामसंख्ये आदौ यस्य तत्। नांव, सेनेची संख्या, शूर कोण आहेत, महाबल कोण आहेत, इत्यादि सारणाराला विचारलें. २. 'सेतुहेतुः' 'ऋक्षराट्' व 'वालिपुत्रः' हीं पदें हेतुगर्भ आहेत. ३. तस्य (जांबवतः) यत् नाम च रूपं च तेजश्च सैन्यंच प्रधानतः (मुख्यत्वेंकरून) कथयामास। वा० रा० युद्ध० स० २७ श्लो० १०-१४ 'रूपं यशस्याभिरूप्ये वर्णे चैव निरूपणे.' ४. गिरा अवाच्या (वक्तुमशक्या). ५. शतं शतसहस्राणां कोटि माहुर्मनीषिणः। शतं कोटिसहस्राणां शंकुरित्यभिधीयते। शतं शंकुसहस्राणां महाशंकुरिति स्मृतः। महाशंकुसहस्राणां शतं वृन्दमिहोच्यते। सुग्रीवाच्या सचिवांची संख्या २१ हजार कोटि, २१ हजार शंकु, २१०० वृन्द इतकी दिली आहे. सर्व बलसंख्या वा० रा० युद्ध० स० २८च्या शेवटीं आहे. (श्लो.३३–३७)काव्यसंग्रहग्रन्थमाला–रामायणें भाग१–मंत्र–रामायण–युद्धकाण्ड–आर्या १८२–१८७–पृ. १०३ पहा. ६. अमरतेजोगुणसमन्विताः. ७. 'यस्तु पूर्वोपकारी स्यात् अपराधे गरीयसि (अपि) क्षन्तव्यः' अशी नीति आहे. ८. पकडविला. ९. मोचितः.

अन्येऽपि राक्षसाः कीशैर्निगृहीता दयालुना. ॥ २५९
स **शार्दूलः** स्व **म** थनं बलिभिर्वानरैः कृतम् ।
पृष्टो राक्षसराजेन कथयामास सांजलिः. ॥ २६०
'यथा समर्थः **श्री** **रा**मस्तथा राजन्! **बि**भीषणः ।
तेन सैन्ये प्रविष्टोऽहं गृहीतस्ताडितः परैः. ॥ २६१
परिणीतोस्मि[1] **रा** जंस्तैर्बलमध्येऽत्यमर्षणैः[2] ।
यथा हनूमान् लंकायां बध्वाऽस्माभिः पुरा प्रभो! २६२
परिणीय च **म** न्यूग्रै[3] रक्तार्द्रोऽहं प्लवंगमैः ।
रामसंसदि नीतोऽस्मि कृपया तेन मोचितः. ॥ २६३
कपिसैन्ये त्र **ज** न् वध्यश्चरस्तेषामसंशयम् ।
आयुःशेषात्प्रसादाच्च प्रभो! जीवन्निहागतः.' ॥ २६४
इत्युक्त्वा स भ **य** व्यग्रः[4] **शा**र्दूलः सुरशत्रुणा ।
पुनः पृष्टोऽब्रवीन्मुख्यान् **सु**ग्रीवादीन्सुरांशजान्.[5] ॥ २६५
विद्युज्जिह्वं[6] सु **रा** रातिर्महामायमथाब्रवीत्[7] ।
'शिरो **रा**मस्य सशरं धनुश्च कुरु माचिरम्.[8]' ॥ २६६
चक्रे तथैव **म** नसः **सी**ताया[9] मोहकृत्स तत् ।
दृष्ट्वा **द**शाननस्तस्मै भूषणं स्वं ददौ मुदा. ॥ २६७
ततः **श्री**दानु **ज** स्तन्वीमशोकवनिकागताम् ।
सीतां ददर्श दुष्टात्मा तामुवाच पतिव्रताम्. ॥ २६८
'**जानक्याश्रित्य** **य** स्य त्वं वीर्यं मामवमन्यसे ।
स हतो राक्षसै रात्रौ सुप्तोऽभ्युत्तररोधसि[10]. ॥ २६९
छिन्नं मूलं ते **जं**[11] डेऽद्य त्वद्दर्पो निहतो मया, ।

---

१. सर्व सैन्यभर मला फिरविलें. २. अतिक्रुद्धैः. ३. मन्युना क्रोधेन उग्रैः उद्धतैः. ४. भयाकुलः भयविक्लवः. ५. रावणाला जी माहिती शार्दूलाच्या द्वारें पाहिजे होती ती सर्व शार्दूलाला मोठ्या आनंदानें रामानें दिली वा० रा० युद्ध स० ३०. ६. हा विद्युज्जिन्ह शूर्पणखेच्या पतीहून वेगळा. शूर्पणखेचा पति रावणानें कालकेयांशीं युद्ध केलें त्यावेळीं मारला. 'तत्तत्संज्ञकानामनेकेषामपि सत्वान्न विरोधः' ७. कपटविद्येमध्यें मोठा निष्णात. ८. शीघ्रमेव 'मा+चिरम्' हें सुपूसमासाचें उदाहरण. ९. सीतेच्या मनाला खरें आहे असा मोह पाडणारें. १०. उत्तरतीरावर. ११. 'छिन्नं मूलं जडे तेऽद्य' असा पाठ छन्दःशास्त्रविरोधी नाहीं 'पञ्चमं लघु सर्वत्र' असा नियम आहे.

भव **मै**थिलि! भार्या मे, किं मृतेन करिष्यसि?॥२७०
बिभीषणो नि **य**[1] मितो, हतौ **सु**ग्रीव**मा**रुती ।
दिशं प्रव्राजितः शेषैर्लक्ष्मणः प्लवगैः सह. ॥ २७१
प्रहस्तेन प **रा** भूतो हतो भर्ता तवाबले! ।
क्षतजार्द्रं रजोध्वस्त[2]मिदं तस्याहृतं शिरः.' ॥ २७२
शृण्वत्यां पर **म** क्रूरां वार्तां तस्यां **द**शाननः ।
उवाच राक्षसीं[3] 'येन **रा**मस्य शिर आहृतम्. ॥ २७३
तमानयाशु, **श्री** हीनं पत्युः पश्यत्वियं शिरः' ।
इति श्रुत्वा तयाहूतो **वि**द्युज्जिह्वो निशाचरः ॥ २७४
तच्छिरो धनु **रा** दाय मायावी विनयान्वितः ।
प्रणामं शिरसा कृत्वा **रा**वणस्याग्रतः स्थितः. ॥ २७५
तमुवाच स **म** र्त्याशो, '**वि**द्युज्जिह्व! सकार्मुकम् ।
अग्रतः कुरु **सी**तायाः शीघ्रं **दा**[4]शरथेः शिरः.'॥२७६
धनुः शिरोंबु **ज** युतं **सी**तायाः पुरतस्तदा ।
निक्षिप्यादर्शनमगात्स मायावी क्षपाचरः. ॥ २७७
सीता दृष्ट्वा प्रि **य** स्यैव मत्वा तत्कार्मुकं शिरः ।
विजगर्हेऽत्र **कै**केयीं क्रोशंती कुररी[5] यथा. ॥ २७८
बाला गता ध[6] **रा** मार्ता सा छिन्ना कदली[7] यथा ।
तच्छिरः समुपाघ्राय विललापायतेक्षणा. ॥ २७९
'हा! हतास्म्यद्य **म** न्नाथ! पितृवाक्पालनव्रत! ।
त्वन्नाशात्पश्चिमा[8]वस्थां गतास्मि विधवा कृता.' ॥ २८०
विलप्य देवी **ज** गती[9]संभवा बहुशस्तदा ।
उवाच **रा**वणं दीना मर्तुकामा पतिव्रता. ॥ २८१
'साधु मां घात **य** क्षिप्रं **रा**मस्योपरि **रा**वण! ।
संमानय[10] पतिं पत्न्या कुरु कल्याणमुत्तमम्.' ॥ २८२
विलपंत्यां रा **ज** पुत्र्यामागत्य रजनीचरः ।

१.बांधून आणला आहे, निगृहीतः. २. धुळीनें रूषित झालेलें, भरलेलें. [सर्ग ३१ श्लो० १४-३६.] ३. सीतेजवळ ठेवलेल्या राक्षसींपैकीं एकीला. ४. सर्ग ३१ श्लो० ४१ पहा. ५. बकरी. ६. भुईवर पडली. ७. केळ. ['**कदली** वैजयंत्यां च रंभायां हरिणांतरे' इति] [सर्ग ३२ श्लो० ३-६.] ८. निकृष्टां दशाम् । 'भयानामपि सर्वेषां वैधव्यं व्यसनं महत्.' ९. भूमिजा. १०. योजय (स० ३२ श्लो० ३१.)

उवाच राक्षसं 'त्वाशु[1] **प्र**हस्तो द्रष्टुमिच्छति.' ॥ २८३

एतच्छ्रुत्वा स **य** क्षेशभ्राता क्षिप्रं विनिर्गतः ।
जगामादर्शनं[2] शीर्षं तच्चकार्मुकमुत्तमम्. ॥ २८४

राक्षसानां स **रा** जा तु मंत्रिभिः सह निश्चयम् ।
युद्धस्य कृत्वा स्वबलं सिद्धं चक्रे महाबलः. ॥ २८५

सीतां मोहनि **म** ग्नां तां **स**[3]रमा नाम राक्षसी ।
आश्वासयामास सखी **बि**भीषणमनःप्रिया. ॥ २८६

'बिभीहि मार्ये[4]! **श्री** मांस्ते कुशली सानुजः पतिः ।
रावणेन कृता माया माऽयासं[5] शोकतो व्रज. ॥ २८७

सिंधुमुत्तीर्य **रा** मस्ते सखि! साध्वसमागतः[6] ।
उपस्थितं त्वां कल्याणं, शीघ्रं पत्या समेष्यसि.॥ २८८

दशकंठस्य **म** रणं प्राप्तं नास्त्यत्र संशयः ।
मोक्ष्यते[7] ग्रथितां **रा**मो वेणीमेणीदृशस्तव[8]. ॥ २८९

त्वमाज्ञां कुरु **ज** न्माह कृतार्थं कर्तुमात्मनः ।
आगमिष्यामि रामे[9] ते निवेद्य कुशलं वचः[10].' ॥ २९०

सीतोवाचा'ऽऽश **य** स्तस्य **रा**वणस्य दुरात्मनः ।
त्वया निवेदनीयो मे वर एष वृतः सखि!.' ॥ २९१

सत्वरा सत्व **रां**[11] शिः सा **स**रमा परमादृता[12] ।
तथेत्युक्त्वा द्रुतं गुप्ता ययौ यत्र **द**शाननः. ॥ २९२

---

१. त्वाम् आशु. २. गुप्त झालें. ३. ही बिभीषणपत्नी शैलूषगंधर्वाची मुलगी [स० ३३ श्लो० २.] मानससरोवराचें पाणी वाढूं लागलें असतां तिच्या आईनें म्हटलें—'सरो मा वर्धते'त्युक्तं ततः सा सरमाभवत् । वा० रा० उत्तर० स० १२ श्लो० २४-२७. ४. आर्यें मा बिभीहि. ५. मा आयासं व्रज=आपल्या शरीराला कष्ट, परिश्रम देऊं न-कोस. ६. 'साध्वसमागतः' हा पाठ अशुद्ध दिसतो त्याबद्दल 'साध्वि समागतः' असें पाठांतर कल्पावें. सखि व साध्वि या पदांचा उपयोग कां केला हें मार्मिक वाचकांच्या लक्ष्यांत सहज येईल. ७. आपल्या प्रियपतीच्या वियोगामुळें साध्वी स्त्रीच्या मनाची प्रवृत्ति नट्टापट्टा कर-ण्याकडे साहजिकरीत्या होत नाहीं. 'प्रियालोकफलो हि वेषः' । 'वियोगे मलिना कृशा' । प्रियपति घरीं आल्यावर तो स्वतः वियोगावधिकालांत न सोडलेली वेणी पुन्हा गुंफतो असें दिसतें. अशाच अर्थाचा श्लोक (आद्ये बद्धा विरहदिवसे इत्यादि) मेघदूतांत आढळतो. ८. ह-रिणीप्रमाणें जिचे डोळे आहेत अशीची. ९. रामाय. 'त्वमाज्ञां कुरु' व 'वर एष वृतः' ही उक्तिप्रत्युक्ति मोठ्या मार्मिकतेची आहे. १०. सर्ग ३३ श्लो० १९ पहा. ११. धैर्यराशि. १२. परमादरवती, मोठी पूज्यबुद्धि (सीतेविषयीं) जिच्या मनांत आहे अशी.

बिभीषणस्य **म**हिषी बुद्ध्वा दशमुखाशयम्, ।
आगत्य पार्श्वे जानक्याः प्रीत्या दत्तासनाऽब्रवीत्. ॥२९३

'[1]शृणु सीतेऽस्य **ज**[2]ननी तथा मातामहश्च यः ।
ताभ्यां बोधः कृतो य[3]त्नात्त्वन्मोक्षार्थं पुनः पुनः. ॥ २९४

बोधितोऽप्यन **य**ज्ञोऽयं रावणः सखि! दारुणः ।
न त्वामुत्सहते मोक्तुमर्थमर्थपरो यथा. ॥ २९५

अ[4]मृतस्त्वां रा **ज** पुत्रि! क्रूरो मोक्तुं दशाननः ।
[5]जातु नोत्सहते स्पष्टो निश्चयोऽस्य समंत्रिणः. ॥ २९६

एनं पापाश **य**मरिं हत्वा रामः सलक्ष्मणः ।
सीतेऽयोध्यां प्रति क्षिप्रं त्वां नेष्यत्यसितेक्षणे!.' ॥२९७

मं[6]त्रकाले सु **रा**तैर्भेरीशंखरवाकु[7]लः ।
शब्दोऽभूत्कपिसैन्यानां कंपयन् धरणीं मुहुः. ॥ २९८

[9]माल्यवान्नाम **म**तिमान् राज्ञो मातामहः स्वयम् ।
धर्मन्यायविदां मुख्यो बोधयामास रावणम्. ॥ २९९

'न नाशनीया **श्री**रेषा त्वयाऽधर्मेण रावण! ।
रामाय दातुं योग्येयं सीता, प्राप्तं यतो भयम्.' ॥३००

उवाच रक्षो **रा**जस्तं, 'वनादानीय सुंदरीम् ।
किमर्थं प्रतिदास्यामि मनुष्यस्य भयादहम्? ॥ ३०१

द्विधा भज्येय **म**[11]प्येवं न नमेयं तु कस्यचित् ।
एष मे स[12]हजो दोषः स्वभावो दुरतिक्रमः. ॥ ३०२

[13]कृपणो मनु **ज**स्तं तु रणे शाखामृ[14]गाश्रयम् ।
[15]वधिष्यामि प्रतिज्ञेयं सत्या विश्वजितो मम.' ॥ ३०३

---

१. सर्ग ३४ श्लो० १९-२६ पहा. २. कैकसी ही सुमालि नांवाच्या राक्षसाची कन्या. ३. तव मोक्षार्थं=त्वन्मोक्षार्थम्. ४. मरणमप्राप्तः. ५. कदाचित्. ६. रावण आपल्या मंत्रिवर्गासह विचार करीत बसला असतां. ७. भेरी, शंख यांचा ध्वनि ज्यांत मिसळला आहे असा. ८. सर्ग ३४ श्लो० २७-२८ पहा. ९. सुकेश नांवाच्या राक्षसाचे माल्यवान्, सुमाली, व माली असे तीन मुलगे होते, हेच रावणाचे मातामह. १०. सर्ग ३६—श्लो० ८-१४ पहा. ११. एवमपि=रामस्य महत्वेऽपि । वेळूप्रमाणें माझें शरीर दुभांगलें तरी वेताप्रमाणें मी वांकावयाचा नाहीं. १२. नैसर्गिक. १३. क्षुद्र प्राणी. १४. शाखामृगांच्या (मांकडांच्या) साहाय्यावर अवलंबून राहणाऱ्याला. १५. हनिष्यामि.

व्रीडितः[1] स्वाल **य** मगात्क्रुद्धे रक्षसि **मा**ल्यवान् ।
लंकायास्तु तदा गुप्तिं कारयामास **रा**वणः. ॥ ३०४

पूर्वद्वारे प **रा** सह्यं **प्र**हस्तं वाहिनीपतिम् ।
लंकाया दक्षिणद्वारे **म**हापार्श्व**म**होदरौ ॥ ३०५

ज्येष्ठं च पश्चि **म** द्वारे स्थापयामास नंदनम् ।
व्यादिदेशोत्तरद्वारे **रा**वणः **शु**क**सा**रणौ. ॥ ३०६

राजराजानु **ज** स्तस्मिन्स्वयं[2] च कृतनिश्चयः ।
कथयामास[3] लंकाया गुप्तिं ज्ञात्वा **बि**भीषणः. ॥ ३०७

अमात्यास्तस्य **य** त्नेन लंकां गत्वा विरूपिणः[4] ।
पनसानलसंपातिप्र[5]मित्याख्याः समागताः. ॥ ३०८

तैः संविधानं[6] **ज** वनैर्लंकाया यन्निवेदितम्[7] ।
तत्सर्वं विनिवेद्याथ कुंभकर्णानुजो[9]ऽब्रवीत्[8]. ॥ ३०९

'अयुते[10] द्वे ह **य** स्थानां गजारोहास्तथाऽयुतम् ।
अयुतं च रथारूढा साग्रा[11] कोटिश्च रक्षसाम्. ॥ ३१०

---

१. लज्जितः. २. उत्तरद्वार. स्वतः रावण उत्तरद्वार रक्षणाकरितां तयार झाला । त्याच्या साहाय्याला शुकसारण तेथेंच होते. ३. ह्या वाक्याचा सुसंगत अर्थ काय करावा हें समजणें कठिन दिसतें, तरी पण कांहीं शब्द पदरचे घालून किंवा थोडा फेरफार करून अर्थसंगति होते । लंकाया गुप्तिं ज्ञात्वा [निवर्तध्वमिति स्वामात्येभ्यः] कथयामास किंवा लंकाया गुप्तिं ज्ञातुं स्वामात्येभ्यः कथयामास । लंकेच्या रक्षणाची तयारी कशी केली आहे हें पाहून या असें आपल्या अमात्यांला बिभीषण म्हणाला. ४. पक्ष्यांचीं रूपें घेऊन । विः पक्षी, तस्य रूपं विद्यते येषां ते. ५. ह्या श्लोकांत पनस, अनल, संपाति, व प्रमिति असे चार अमात्य बिभीषणाचे सांगितले आहेत । वा० रा० युद्ध स. ३७ श्लो. ७ पहा । परंतु वा. रा. उत्तर० स० ५ श्लो० ४३ त अनल अनिल, हर, व संपाति अशीं नांवें आहेत. "अमात्यास्तस्य" याबद्दल 'अमात्याः स्वस्य' असा पाठ घेऊन मागील श्लोकाच्या उत्तरार्धासुद्धां अन्वय केला तर अर्थ कांहींसा निराळा होतो हें सुज्ञ वाचकांच्या लक्षांत तेव्हांच येईल । लंका कशी हस्तगत करावी, रावणाला कसा जिंकावा याविषयीं कपिसैन्यांतील वीर विचार करीत बसले होते, तेव्हां बिभीषणानें सांगितलें कीं म्यां लंकेच्या रक्षणाची बातमी आपल्या अमात्यांकडून आणविली आहे । ती सर्व वीरांना त्यानें तेथें सांगितली । हा अर्थ वा० रामायणांतील कथासंदर्भाशीं जुळतो । वा० रा० युद्ध स० ३७ श्लो० १-२० ६. लंकेच्या रक्षणाकरितां केलेल्या गोष्टी. ७. बिभीषणाला अमात्यांनीं कळविल्या. ८. मसलत करण्याकरितां जमलेल्या वीरांना कळवून. ९. बिभीषण. १०. एक अयुत=दहा हजार. ११. एक कोटि व कांहीं लक्ष.

एकैकस्यात्र **रा** जेंद्र! युद्धार्थं रक्षसः प्रभो! ।
परीवारः सहस्राणां [1]सहस्रमुपतिष्ठति. ॥ ३११

कर्तव्यो नात्र **म** [2]न्युस्त्वां कोपयेऽहं न भीषये,।
समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे.' ॥ ३१२

ततोऽब्रवीत्स **श्री** **रा**मो, '**नी**लो [3]वानरपुंगवः ।
प्रहस्तं [4]प्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः. ॥ ३१३

अंगदः कपि **रा** जस्य पुत्र एष महाबलः ।
दक्षिणे बाधतां द्वारे **म**हापार्श्व**म**होदरौ. ॥ ३१४

हनूमान्पश्चि **म** द्वारे निष्पीड्येंद्रजितं स्वयम् ।
प्रविशत्वप्रमेया[5]त्मा कपिभिर्बहुभिर्वृतः. ॥ ३१५

यः सदाऽऽशावि [6]**ज** यकृत् प्रजापीडक उद्धतः ।
तस्याहं राक्षसेंद्रस्य स्वयमेव वधे [7]धृतः. ॥ ३१६

वानरेंद्रः स्व **य** मयं **जां**बवांश्च महायशाः ।
राक्षसेंद्रानुजश्चैव [8]गुल्मे भवति मध्यमे. ॥ ३१७

वयं सदा न [9]**रा** काराः [10]सप्त योत्स्यामहे परान् ।
न कार्यं मानुषं रूपमृक्षैः [11]कपिभिराहवे.' ॥ ३१८

एवमुक्त्वा स [12]**म** तिमान्स**सु**ग्रीव**बि**भीषणः ।
आरुरोह [13]**सु**वेलाद्रिं **ल**क्ष्मणेन सह प्रभुः. ॥ ३१९

ते **सु**वेलस्य **ज** [14]गतीधरस्य शिखरे स्थिताः ।

---

१. अनेक लक्ष. २. खेद [दैन्य] व रोष । वा. रामायणांत हा श्लोक आहे. [स० ३७श्लो० १८-२३.] ३. वानरश्रेष्ठः. ४. प्रहस्तस्य प्रतिभटः । हें अर्ध वा० रामायणांत आहे. [सर्ग ३७ श्लो० २६.] ५. अप्रमेयः आत्मा (बलं) यस्य सः । अपरिमेयबलः. ६. आशा (दिशा)+विजय+कृत्=दिग्विजयी विश्वविजेता. ७. कृतप्रतिज्ञः. ८. विरूपाक्ष नांवाच्या राक्षसाची रावणानें मध्यम गुल्मावर योजना केली होती, त्याचा प्रतियोद्धा रामानें जांबवान् नेमला. ९. वानर व राक्षस कामरूपी होते यास्तव रामचंद्रानें सांगितलें कीं आम्हा सातजणांशिवाय इतरांनीं मानुषरूप घेऊं नये, कारण तसें झालें असतां शत्रु कोण व मित्र कोण हें नीट ओळखतां येणार नाहीं. १०. राम, लक्ष्मण बिभीषण व त्याचे चार अमात्य. ११. सर्ग ३७ श्लो० २५-३५ पहा. १२. मतिरर्थनिर्धारणात्मिका बुद्धिरस्यास्तीति मतिमान्. १३. त्रिकूटपर्वताच्या एका शिखराला सुवेल हें नांव होतें असें दिसतें. पूर्णिमेचे सुमारास राम सुवेळाचळावर चढले. [सर्ग ३८ श्लोक ३-१३.] पौष शुक्ल चतुर्दशीस किंवा पूर्णिमेस सुवेळारोहण झालें असें टीकाकाराचें मत आहे. १४. पर्वतस्य.

ददृशुर्यूथपा व्योम्नि रचितामिव तां पुरीम्. ॥ ३२०

प्राकारवल **थ** स्थैस्तैर्नीलवर्णैर्निशाचरैः ।
ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम्. ॥ ३२१

तां दृष्ट्वा ते वि **ज** यिनो राक्षसान् युद्धकांक्षिणः ।
मुमुचुर्विविधान्नादान्वानरा **रा**मसन्निधौ. ॥ ३२२

वानरैः प्रल **थ**[1] प्रोद्यद्धनैरिव महारवैः ।
लंका प्रकंपिता सर्वा धीःश्रीश्चामरविद्विषाम्. ॥ ३२३

सततं भ्रम **रा** लुब्धाः सौगंधिके[2] इवांबुजे ।
अमराः समरापास्तस्वरिपोर्यशसि[3] प्रभोः. ॥ ३२४

ततोस्तमग **म** त्सूर्यः संध्यया प्रतिरंजितः[4] ।
पूर्णचंद्रप्रदीप्ता[5] च क्षपा[6] समभिवर्तत. ॥ ३२५

सौवर्णमेकं **श्री** मत्ते[7] **त्रि**कूटशिखरं वरम् ।
ददृशुस्तत्र तां **लं**कां निर्मितां **वि**श्वकर्मणा[8]. ॥ ३२६

विचित्रां भास्वं[9] **रा** कारां प्रासादैरुपशोभिताम् ।
दशयोजन[10]विस्तीर्णामद्भुतां द्विगुणायताम्, ॥ ३२७

वनैर्मनोर **म** गुणैः समंतादुपशोभिताम् ।
प्रातर्विलोक्य हरयो रम्याण्युपवनानि ते ॥ ३२८

विविशुर्वायु **ज** वनाः **सु**ग्रीवस्य निदेशतः ।
जग्मुर्दिशो भयात्तेषां नागाः[11] सिंहाः खगा मृगाः. ३२९

ततो **रा**मो वि **य** त्युच्चैः **सु**वेलस्य महागिरेः ।
आरुरोह स**सु**ग्रीवश्चित्रं शृंगं द्वियोजनम्. ॥ ३३०

तत्र स्थितः स **रा** जेंद्रो दिशः सर्वा विलोकयन् ।
ददर्श **लं**कां कनकप्राकारेण विराजिताम्. ॥ ३३१

---

१. प्रलयाचे वेळीं आकाशांत जमलेल्या मेघांनीं. २. सौगंधिक हें कमलाच्या उत्तम जातीचें नांव. सौगंधिकाचे ठायीं. ३. समरे अपास्तः स्वरिपुः येन सः तस्य. ४. प्रतिप्रापितरागः. ५. 'अत्र पूर्णचंद्रत्वोक्तिः पूर्णकल्पत्वात् । पौषशुक्ल चतुर्दश्यां पूर्णिमायां वा सुवेलारोहणमिति तिलके. ६. क्षपयति (तनूकरोति) व्यापारान् इति क्षपा, निशा. ७. श्रीमत्=श्रीयुक्तम्, शोभायुतं. श्रीमत् ते असा पदच्छेद करावा. ८. विश्वकर्मा नांवाच्या देवशिल्प्यानें. ९. सुवर्णाप्रमाणें जी दीप्तियुक्त दिसत होती. १०. 'इदं च लंकारूपमहादुर्गान्तर्वर्तिरावणवासस्थानभूतान्तर्दुर्गपरम् । 'शतयोजनविस्तीर्णात्रिंशद्योजनमायता' इत्यत्रैवान्यत्र स्थले उक्तेः । इति तिलके. ११. नाग=हत्ती.

दशकंठं चा **म** राभ्यां श्वेतच्छत्रेण शोभितम् ।
तस्या[1] गोपुरशृंगस्थं ददर्श सुदुरासदम्[2]. ॥ ३३२

तं कुबेरा[3]नु **ज** न्मानं दृष्ट्वाऽशु स कपीश्वरः ।
उत्थाय पुप्लुवे क्रोधात्प्रभो **रा**मस्य पश्यतः[4]. ३३३

सुग्रीवो निर्भ **य** स्वांतस्तृणीकृत्य[5] **द**शाननम् ।
पतितो गोपुरे स्थाने सोऽब्रवीत्परुषं वचः. ॥ ३३४

'भर्तू **रामस्य** **ज** गतां सखा[6] दासोऽस्मि राक्षस ! ।
न मया मोक्ष्यसेऽद्य त्वं पार्थिवेंद्रस्य तेजसा[7].' ॥ ३३५

इत्युक्त्वा सर[8] **य** **स्ता**र्क्ष्य इव[9] तस्योपरि द्विषः ।
पपाताकृष्य मुकुटं पातयामास भूतले[10]. ॥ ३३६

तमाह र क्षो **रा** जो, 'रे ! निर्मर्याद प्लवंगम ! ।
सुग्रीवस्त्वं[11] परोक्षे मे हीनग्रीवो भविष्यसि.' ॥ ३३७

ततः प्लवंग **म** पतिर्निशाचरपतिर्बली ।
नियुद्धं[12] चक्रतुर्घोरं विश्वविस्मय[13]कारकम्. ॥ ३३८

कृत्वा नियुद्धं **श्री** दस्य भ्राता तेन सहातुलम् ।
सुवेलस्य पुनः शृंगमाजगाम महायशाः. ॥ ३३९

तमुवाच न **रा** धीशः, 'सखे ! **सु**ग्रीव ! साहसम् ।
कर्तुं नार्हसि भूयस्त्वं मम प्राणो बहिश्चरः.' ॥ ३४०

---

१. लंकेच्या गोपुरशिखरावर असलेल्याला. २. दुराधर्षम्. ३. कुबेर=कुत्सितं बेरं शरीरं यस्य सः कुबेरः=कुष्टत्वानें ज्याचें शरीर दूषिलें आहे तो कुबेर. । 'कुत्सायां क्विति शब्दोऽयं शरीरं बेरमुच्यते । कुबेरः कुशरीरत्वान्नाम्ना तेनैव सोंऽकितः ।' इति वायुपुराणम्. कुबेर हा विश्रवस याचा मुलगा; म्हणून यास वैश्रवण असें म्हणतात. हा उत्तर दिशेचा स्वामी, याला तीन पाय आणि आठ दांत असल्यामुळें कुरूपाचें सूचक असें 'कुतनु' हें नांव याला आहे. हा शिवाचा मित्र म्हणून याला 'ईशसख' असेंही म्हणतात. ४. 'षष्ठी चानादरे' २।३।३८ या नियमानें षष्ठी । ही Genitive Absolute. [भामिनीविलास—प्रास्ताविकविलास—श्लो० ३६ यांतही हीच रचना आहे.] ५. कसपटाप्रमाणें मानून. ६. रामाभिप्रायेण सखा स्वाभिप्रायेण दास इति बोध्यम्. ७. तेजसा अनुगृहीतेन मया. ८. सवेगः. ९. गरुडाप्रमाणें. १०. भूमीवर. [रावण गोपुरावस्थित आहे असें पाहून सुग्रीव सहसा उड्डाण करून त्याच्याजवळ येऊन व त्याची विटंबना करून, त्याचा मुकुट घेऊन, त्याचीं शिरें धरून, त्याला खालीं पाडून, चालता झाला—अशी कथा आहे. सर्ग ४० पहा.] ११. मे परोक्षमेव त्वं सुग्रीवः । इदानीं मदृष्टयग्रे हीनग्रीवो भविष्यसि । हें अर्ध वा. रामायणांत आहे. [स०४० श्लो० १२.] १२. बाहुयुद्धम्. १३. त्रैलोक्यांत विस्मय उत्पन्न करणारें.

अथावरुह्य **म** हतः सुवेलाग्राद्रघूत्तमः ।
रुरोध तानि लंकाया द्वाराणि प्रबलैर्बलैः. ॥ ३४१

अनुस्मरन्[1] **ज** धर्ममाहूयांगदमब्रवीत्, ।
'[2]गत्वा सौम्य! दशग्रीवं ब्रूहि मद्वचनादिदम्. ॥ ३४२

[3]ऋषिदेवाहि **य** क्षाणाम[4]वलिप्तेन यत्त्वया ।
त्यक्त्वा ह्रियं दयां नानाप्रकारं पीडनं कृतम्. ॥ ३४३

त[5]द्गोविप्रसु **रा** राते! [6]दाराहरणकर्शितः ।
आगतोऽहंससुग्रीवो लंकाद्वारे व्यवस्थितः. ॥ ३४४

गमिष्यसि त्वं [7]**मं** हर्षिराजर्षिपदवीमरे! ।
मद्बाणैर्निहतो युद्धे भविष्यसि यदि [8]स्थिरः. ॥ ३४५

बलेन येन **ज** नकतनयां माययाधम! ।
माम[9]तिक्राम्य नीच! त्वं हृतवांस्तन्निदर्शय. ॥ ३४६

सीतां त्वमादा **य** यदि त्वभ्येषि शरणं न माम् ।
अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः. ॥ ३४७

[10]धर्मात्मा तेऽनु **ज** न्मायं श्रेष्ठो मां शरणं गतः ।
लंकैश्वर्यमिदं श्रीमद्ध्रुवं प्राप्नोत्य[11]कंटकम्. ॥ ३४८

[12]न राज्यमन **य** ज्ञेन भोक्तुं क्षणमपि त्वया ।
शक्यं मूर्खसहायेन पापेना[13]विदितात्मना. ॥ ३४९

[14]कृत्वा धृतिं प **रा** मद्य त्वं युध्यस्व मया सह, ।
मृतो रणे मद्विशिखैः पाप! पूतो भविष्यसि. ॥ ३५०

[15]चक्षुःपथं म **म** प्राप्य न जीवन्प्रतियास्यसि ।

---

१. 'सामादित्र्युपायसाध्येऽर्थे दंडो न मोक्तव्यः प्रजानाशहेतुरित्येवंरूपं राजधर्ममनुचिंतयन्.' [स० ४१ श्लो० ५९ टीका.] २. सर्ग ४१ श्लो० ६०-७१ पहा. ३. ऋषयश्च, देवाश्च, अहयश्च (सर्पाश्च), यक्षाश्च तेषाम्. ४. गर्वितेन. ५. गो+विप्र+सुर+अराति+संबोधन प्र०. ६. दारहरणपीडितः. ७. महर्षीणां राजर्षीणां च पदवीम् । 'राजभिर्धृतदंडास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायांति संतः सुकृतिनो यथा ॥' इत्युक्तेः. ८. धैर्य धरून जर लढशील. ९. वा० रामायणांत 'अतिक्रमयित्वा' (?) (स० ४१ श्लो० ६६) असा पाठ दिला आहे. मला दूर घालवून किंवा माझा अपमान (आश्रमांत येऊन वीरपत्नीचें हरण करण्यानें झालेला) करून. १०. नित्यं धर्मचित्तः. ११. त्वद्रूपकंटकरहितम्. १२. हा श्लोक वा० रामायणांत आहे. [स० ४१ श्लो० ६८.] १३. ज्यानें आपलें खरें स्वरूप ओळखिलें नाहीं अशानें. १४. धैर्यमवलंब्य; वधनिश्चयं कृत्वा. १५. चक्षुषोः पंथाः चक्षुःपथः तम् । 'ऋक्पूरब्धूःपथाम्' ५।४।७४ या नियमानें 'पथ' असा आदेश झाला.

यद्याविशसि लोकांस्त्रीन्खगीभूतो[1] निशाचर! ॥ ३५१
जघन्यजं[2] त्वां **श्री** दस्य हितं वाक्यं ब्रवीम्यहम् ।
सुदृष्टा[3] क्रियतां **लं**का क्रियतां चौर्ध्वदैहिकम्[4]'. ॥ ३५२
इत्थमुक्तः स **रा** मेण तारेयो[5]ऽक्लिष्टकर्मणा[6] ।
जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट्[7]. ॥ ३५३
ददर्शासीन **म**[8] व्यग्रं **रा**वणं सचिवैः सह ।
तस्थौ तस्याविदूरेण निपत्या[9]ग्निसमप्रभः. ॥ ३५४
ततो भर्तुस्त्रि **ज** गतां श्रावयामास तद्वचः, ।
'दूतोऽहं **को**सलेंद्रस्य **रा**मस्याक्लिष्टकर्मणः. ॥ ३५५
अंगदस्तन **य** स्तस्य[10] **वा**लिनश्चे[11]त्त्वया श्रुतः ।
आह त्वां **रा**घवो **रा**मः **कौ**सल्यानंदवर्धनः. ॥ ३५६
निष्पत्य[12] त्वं सु **रा** राते! युध्यस्व, पुरुषो[13] भव, ।
हंतास्मि त्वां सहामात्यं सपुत्र[14]ज्ञातिबांधवम्. ॥ ३५७
त्रयो लोकाः सु[15] **म** नसो भविष्यंति हते त्वयि ।
बिभीषणस्य चैश्वर्यं भविष्यति महात्मनः. ॥ ३५८
उद्धरिष्यामि **ज** गतीसुराणां त्वा[16]द्यकंटकम्[17] ।
[18]हरेरिभ इव स्थातुं न त्वं मम पुरः क्षमः. ॥ ३५९
देवदानव **य** क्षाणां गंधर्वोरग[19]पक्षिणाम् ।
शत्रुमुन्मूलयिष्यामि त्वामहं लीलया रणे. ॥ ३६०

---

१. पक्षी होऊन. २. अनुजम् । कनीयांसं भ्रातरम्. ३. लंका चांगली पाहून घे, कारण ह्यापुढें ती दृष्टीस पडावयाची नाहीं. ४. देहात् ऊर्ध्वं प्राप्त ऊर्ध्वदेहः परलोकस्तत्र हितं दानादिकमौर्ध्वदेहिकम् किंवा और्ध्वदैहिकम् । 'अनुशतिकादीनां च' ७।३।२० या नियमानें उभयपदवृद्धि होते. ५. अंगदः. ६. ज्याच्या आरंभलेल्या कार्याचा विघात होत नाहीं अशानें. ७. हव्यं वहति इति हव्यवाट् वह्निः. ८. अव्याकुलम्. ९. आकाशांतून खालीं उतरून. १०. ज्याच्या पराक्रमाचा तुला चांगला अनुभव आहे त्या प्रसिद्ध वालीचा. ११. 'वेदाः प्रमाणं चेत्' इतिवत् असंदिग्धे संदिग्धवचनम् । श्रुत एव इत्यर्थः. १२. पुरात् निष्क्रम्य. १३. शूरो भव=Be a man. १४. पुत्रैश्च ज्ञातिभिश्च बांधवैश्च सहवर्तमानम्. ज्ञातिशब्दाचा अर्थ सगोत्र सपिंड असा करावा व बंधुशब्दाचा अर्थ भिन्नगोत्र सपिंड. १५. प्रशांतचित्ताः, आनंदितचेतसः. १६. त्वा=त्वाम्. १७. 'त्वा अद्य कंटकम्' किं 'त्वा अद्यकंटकम्' असा पदच्छेद करावा. १८. जसा सिंहाच्या पुढें हत्ती. १९. उरगाः सर्पाः. या प्रसंगाचें अंगदाचें भाषण प्राकृत मंत्ररामायणांत फार सुरेख आहे तें वाचकांनीं अवश्य पहावें. [काव्यसंग्रहग्रंथमाला—मोरोपंतकृत रामायणें—भाग १—मंत्ररामायण—युद्धकांड—गीति २८८-३१३ पृ० ११२-११४.]

उक्तं सत्यं नि **ज** वचः करिष्यामि **द**शानन! ।
न चेत्सत्कृत्य **वै**देहीं प्रणिपत्य प्रदास्यसि.' ॥ ३६१

तारायास्तन **य** स्येत्थं श्रुत्वा स परुषं वचः ।
रुष्टः [1]शशास सचिवान्[2]असकृद्गृह्यतामिति. ॥ ३६२

जगृहु[3]र्युव **रा** जानं चत्वारो रजनीचराः ।
[4]ग्राहयामास **ता**रेयो बलं दर्शयितुं तदा. ॥ ३६३

स तान्[5]विहंग **म** समान्[6]भुजसक्तान्महाबलः ।
[7]समादायोत्पपाताशु प्रासादं शैलसन्निभम्. ॥ ३६४

यदोत्पपात **श्री** मान्स प्रबलः [9]पक्षिराडिव ।
तस्योत्पतनवेगात्ते निर्धू[10]ताः पतिता मृताः. ॥ ३६५

तस्य पादभ **रा** क्रांतः प्रासादः [11]स महानपि ।
पफाल शतधा वज्रप्रहाराद्गिरिमवानिव. ॥ ३६६

प्लवंगमानां **म** ध्ये स **रा**मपार्श्वमुपागतः ।
भंक्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः. ॥ ३६७

ततः प्रवृत्तं [12]**ज** न्यं तद्दारुणं कपिरक्षसाम् ।
[13]कबंधा उत्थिता यत्र दुस्तराः [14]शोणितापगाः. ॥ ३६८

तारायास्तन **य** स्तत्र रात्रियुद्धे भयंकरे ।

---

१. आज्ञा करिता झाला. २. पुनः पुनः. ३. अंगदम्. ४. स्वेच्छया ग्रहणं कारयामास, आपखुषीनें धरूं दिलें, बांधूं दिलें. [स० ४० श्लो० ८४-८६.] ५. पतगान् इव. ६. भुजांना चिकटलेल्यांना. ७. घेऊन वर उडाला. ८. पर्वततुल्यम्. ९. 'पक्षिराज्' शब्दाची प्रथमा. गरुड इव. १०. अंगदाच्या अतिवेगामुळें त्यांची पकड सुटून. ११. एका प्रासादाला घेऊन तो वर उडाला होता. आकाशांतून जात असतां त्याचे तुकडे झाले असें गृहीत केलें पाहिजे. आतां दुसरा प्रासाद त्याचे दृष्टीस पडला, त्याचें शिखर त्याच्या पायांच्या भारानेंच मोडून पडलें. पहिला प्रासाद रावणाची कचेरी असावी, दुसरा प्रासाद अन्य राजगृह असावें. अंगद प्रासादासह उडाला या गोष्टीवरून **श्री**धरस्वामींनीं आपल्या '**रा**मविजयां'त कल्पना केली कीं, त्या प्रासादासह अंगद रामाजवळ आला, तें पाहून रामाला वाईट वाटलें व त्यांनीं सांगितलें कीं 'बिभीषणाला हा प्रासाद उपयोगीं पडेल त्याकरतां तेथें नेऊन ठेव.' त्याप्रमाणें अंगदानें केलें. १२. युद्धम्. १३. शिरःशून्य क्रियायुक्तदेहः. 'मनुष्याणां सहस्रे तु हतेषु हतमूर्धसु । तदावेशात्कबंधः स्यादेकोऽमूर्धा क्रियान्वितः ।।' लढाईंत गुंतलेल्या वीराचें अकस्मात् शिर तुटलें तर त्याचें तें शिराशिवाय असलेलें 'धड' कांहीं वेळपर्यंत लढत असतें, त्याला 'कबंध' म्हणतात. १४. रक्ताच्या नद्या. अपसंबंधिना वेगेन गच्छंति इति आपगाः, अथवा अपां समूहमापं (समुद्रम्) गच्छंति इति.

तस्मिंद्रजितमत्युग्रं चकार विरथं बली. ॥ ३६९

महामायः[1] स **रा** त्रौ तावदृश्यो **राम**लक्ष्मणौ ।

बबंध शरबंधेन कूटयोधी[2] निशाचरः. ॥ ३७०

बद्धौ भुजंग **म** वरैर्विद्यया[3] शरतां गतैः ।

निष्पंदौ[4] पतितौ वीरौ मूर्छितौ **राम**लक्ष्मणौ. ॥ ३७१

स्रातौ स्वक्षत **ज** स्रुत्या[5] भूयस्या[6] समराजिरे[7] ।

तौ **राम**लक्ष्मणौ दृष्टौ पुष्पिताविव किंशुकौ[8]. ॥ ३७२

तावुवाच वि[9] **य** द्वर्ती रावणिर्मा[10] सुरेश्वरः ।

द्रष्टुमासादितुं वापि न शक्तः किं पुनर्युवाम्. ॥ ३७३

यमलोकं रा **ज** पुत्रौ नयामीति वदञ्शरैः ।

निर्बिभेद पुनस्तीक्ष्णैः प्रजहर्ष ननाद च. ॥ ३७४

तयोर्जगन्ना **य** कयोः शरीरेंऽगुलमंतरम् ।

न ह्यविद्धं बभूवोग्रैः फणिभिर्बाणतां गतैः. ॥ ३७५

दृष्ट्वा खरश[11] **रा** क्रांतौ जगत्यां[12] जगतां पती ।

बिभीषणश्च सुग्रीवः संतापं परमं गतौ. ॥ ३७६

कपयो **हनु** **म** न्मुख्या व्याकुलौ परिवार्य तौ ।

तस्थुर्द्यां च भुवं चापि वीक्षमाणा वनौकसः[13]. ॥ ३७७

सलक्ष्मणं तं **श्री राम**ं परिवार्य स्थितान्कपीन् ।

यूथपानिषुभिर्घोरैरताडयदरिंदमः[14][15]. ॥ ३७८

एवं सर्वान्प **रा** भूय हर्षयन्सर्वराक्षसान् ।

प्रहृष्टो **रावणि**र्लंकां[16] प्रविवेश महायशाः. ॥ ३७९

---

१. महती माया यस्य सः, कपटविद्येमध्यें मोठा निष्णात असा इंद्रजित्. २. कपटयुद्ध करणारा. ३. मंत्रविद्येच्या सामर्थ्यानें. [स० ४५ श्लो० ८-१०.] ४. निश्चलौ. ५. स्रुतिः क्षरणम् तया; रक्ताच्या वाहण्यानें. ६. पुष्कळ. 'भूयसी' शब्दाची तृतीया. ७. समरांगणे. ८. पळसाच्या झाडांप्रमाणें. ९. वियति आकाशे वर्तते इति आकाशस्थः. १०. रावणस्य अपत्यं पुमान् रावणिः इंद्रजित्. या श्लोकाचें उत्तरार्ध रामायणांत आहे. [स० ४५ श्लो० ११.] ११. तीक्ष्णशरविद्धौ. १२. पृथिव्याम्. भ्रूभंगमात्रेण सर्वजगत्संहर्तुरपि भगवतो नागपाशबंधनसहनं स्वकृतमर्यादारूपब्रह्मवरदानपालनार्थम्. १३. वन (अरण्य) आहे ओकस् (घर) ज्यांचें ते. हें अर्ध रामायणांत आहे. [स० ४६ श्लो० १.] १४. नील, मैंद, द्विविद इत्यादि कपिनायकांला. १५. रावणिः. [स० ४६ श्लो० १७.] १६. सर्ग ४६ श्लो० २८ पहा.

बिभीषणोऽथ **म** तिमानब्रवीद्[1]वानरेश्वरम्, ।
‘[2]पर्यवस्थापयात्मानम[3]नाथं मां च संकटे. ॥ ३८०

त्वं [4]वैक्लव्यं त्य **ज** क्षिप्रं न मृतौ **रामलक्ष्मणौ**, ।
पश्येमौ न जहाति [5]श्रीरग्रेऽपीयं न हास्यति. ॥ ३८१

तस्मादाश्वास **य** स्वांतं [6]बलं च प्लवगाधिप! ।
[7]यावत्सैन्यानि सर्वाणि पुनः [8]संस्थापयाम्यहम्’. ॥ ३८२

एवमाश्वास्य **रा** जानं राक्षसेंद्रो **बि**भीषणः ।
वि[9]द्रुतं [10]वानरानीकं तत्समाश्वासयत्पुनः. ॥ ३८३

इंद्रजित्सुस **म** र्थस्तत्प्रियं पित्रे न्यवेदयत् ।
उत्पपातासनाद्धृष्टः स पुत्रं परिषस्वजे. ॥ ३८४

बिभीषणाग्र **ज** न्मा ता राक्षसीरब्रवीत्स्वयम्, ।
‘हता**विं**द्रजि[11]ताख्यात **वै**देह्यौ[12] **रामलक्ष्मणौ**. ॥ ३८५

तां **पुष्पकं** प्र **य** त्नेन समारोप्यायतेक्षणाम् ।
दर्शयध्वं हतौ मर्त्यौ युद्धे [13]**दा**शरथी इति. ॥ ३८६

---

१. सुग्रीवम्. २. आश्वासय. ३. अशरणम्. विभीषण म्हणतो, ‘तुझें स्वतंत्र राज्य तरी आहे, माझें तर कांहींच नाहीं, करितां आपल्या चित्ताला व मला अनाथाला या संकटांत धीर दे.’ ४. दैन्याचा त्याग कर, कारण ‘अतिस्नेहोऽपि कालेऽस्मिन्मरणायोपकल्पते.’ अतिस्नेहः=अतिस्नेहमूलरोदनादिव्यापारः. [स० ४६ श्लो० ३६ टीका.] ५. श्रीः अग्रे अपि इयम्. ६. स्वकीय सैन्य. बल=तेज, रूप. [‘**बलं** गंधरसे रूपे स्थामनि स्थौल्यसैन्ययोः । पुमान्हलायुधे दैत्यप्रभेदे वायसेऽपि च ॥.’ ७. ‘तुझ्यानें सैन्याची थावराथावर होत नसेल तर धीर धरून रामाचें रक्षण कर, मी सैन्याचें आश्वासन करतों’ असें बिभीषण म्हणाला. वा० रामायणांत ‘अथवा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः’ असें स्पष्ट दिलें आहे. ८. स्थिराणि करोमि, आश्वासयामि. या उत्तरार्धाचा अर्थ ओढाताण करून द्यावा लागला, याकरितां खालीं दिल्याप्रमाणें पाठ कल्पावाः—तस्मादाश्वासय स्वांतं बलं च प्लवगाधिप । अथवा रक्ष्यतां रामो यावत्संज्ञाविपर्ययः ॥ यावत् सर्वाणि सैन्यानि पुनः संस्थापयाम्यहम्. ९. भयानें पळालेल्या. १०. वानर+अनीक+द्वि० प्र०=वानरसैन्याला. ११. आ+ख्या+लोट् त. ‘चक्ष्’धातूचा आर्धधातुकलकारांत उपयोग होऊं शकत नाहीं म्हणून ‘ख्या’धातूचा त्याबद्दल प्रयोग करितात, ‘चक्षिङः ख्याञ्’ २।४।५४. परंतु हा ‘ख्या’ धातु निराळाच धरला पाहिजे. १२. ही संबंधसामान्ये षष्ठी. १३. रामलक्ष्मणौ. ‘दाशरथी इति’ या पदांचा संधि केला नाहीं, कारण ‘संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥’ अशी हरिकारिका आहे.

[१]यदाश्रयाद्रा **ज** पुत्री गर्वान्मां [२]नोपतिष्ठते ।
सोऽस्या भर्ता सह भ्रात्रा निहतो रणमूर्धनि. ॥ ३८७

दृष्ट्वा रामक्ष **य** मियं निर[३]पेक्षाद्य **मै**थिली ।
मामुपस्थास्यते[४]ऽगत्या सर्वाभरणभूषिता.' ॥ ३८८

तथेत्युक्त्वाशु **रा** क्षस्यः **सी**तामारोप्य **पु**ष्पकम् ।
निन्यु**स्त्रि**[५]जटया सार्धं सापश्य**द्रा**मलक्ष्मणौ. ॥ ३८९

तौ मृतावेव **म** त्वा सा विललाप पतिव्रता, ।
'पु[६]त्रिण्यविधवेत्यूचुर्ये मां तेऽनृ[७]तवादिनः ॥ ३९०

विहाय दीनां **श्री** मान्मां क[८]रुणोऽयं कथं गतः? ।
हा **कौ**सल्ये! हा **सु**मित्रे! हा **कै**केयि! सुतौ मृतौ!॥ ३९१

लक्षणानि ध[९] **रा** देवैर्यान्युक्तानि शुभान्यलम् ।
तां[१०]न्यद्य निहते रामे वित[११]थान्येव सर्वशः.' ॥ ३९२

---

१. ययोः (रामलक्ष्मणयोः) आश्रयात्. २. न सेवते. ३. रामो मिलिष्यति इति आशारहिता. ४. शरण जाण्याला स्थल न राहिल्यामुळें. ५. त्रिजटा ही राक्षसी सीतेला अनुकूल होती. तिनें सीतेला त्रास देणाऱ्या राक्षसींना स्वप्न सांगून धमकाविलें होते ही गोष्ट पूर्वी सांगितलीच आहे. ६. पुत्रिणी अविधवा इति ऊचुः ये—असा पदच्छेद. इतियोगे प्रथमा. 'दयितं जनः खलु गुणीति मन्यते' इतिवत्. ७. असत्यवादी. [ऋत=सत्य.] ८. दयालुः. ९. भूसुरैः, ब्राह्मणैः. १०. प्राकृत मंत्ररामायणांतील या प्रसंगाचें वर्णन फार हृदयद्रावक उतरलें आहे. मृत रामलक्ष्मणास पाहून सीतेनें केलेला विलाप **पं**तांनीं वर्णिला आहे तो असाः— 'अवलोकुनि राघववर देवर, भूमीवरी रजोध्वस्त, । अस्तधृति त्रस्तमना सीता ठेवी स्वमस्तकीं हस्त. ॥ 'हा नाथ! हा रमण! हा लक्ष्मण! हा तात! हांब! हा दिष्ट! । विष्टपनायक काळें गिळिला, केलें मलाचि अवशिष्ट. ॥ निजला काय श्रीमान् वसिष्ठ भगवान् भवत्कुलाचार्य? । आर्यसुता! स्वर्गीतें गेलाशि, कसा न होनि कृतकार्य. ॥ हा दशरथ! राजमहिषि! कैशी तूं साहशील सुतशोक? । कैकेयि! तोक गिळिला, म्हणेल तुज काय हा बरें लोक? ॥ कौशिकगौतमकश्यपवसिष्ठजाबाल्यगस्त्यविप्राशी । झाल्या विफळा कैशा? मज्जीवन काल केंवि न प्राशी? ॥ हा देवर! तुजला मी पंचवटीमाजि गांजिलें, बापा! । न वदावें तें वदल्यें, म्हणउनि रुसलासि काय निष्पापा! ॥ त्रिभुवनभयहि न हरिलें, स्वरलहरदस्यु मारिला नाहीं; । मज टाकुनियां स्वर्गा, गेलां कार्य न करोनियां कांहीं. ॥ तातासि विचाराया गेलां, दोघेहि धर्मसंकट कीं; । सत्वर पुनरपि येतों, ऐसें कथिलें नसे कसें कटकीं? ॥ त्यजिलें जरि मज, तरि हें राहो, तुज विषयरुचि नसे, शांता! । त्यजिली कशि धर्मज्ञा! वृद्धा विधवैकनंदना माता? ॥' [काव्यसंग्रहग्रंथमाला—रामायणें—भाग १—मंत्ररामायण—युद्धकांड—गीति ३५०-३५८ पृ० ११८.] ११. खोटीं, असत्य.

तथा **रा**मस्य **म** [1]हिषीं कृपणां बहुविह्वलाम् ।
[2]परिदेवयमानां तां राक्षसी **त्रि**जटाब्रवीत्, ॥ ३९३
'मा विषादं व्र **ज** शुभे! भर्तायं तव जीवति ।
मूर्च्छितः सानुजो **रा**मो मुखयोः श्रीः शुभानयोः. ॥ ३९४
हते [3]पैत्यावा **य** ताक्षि! योधानां वदनान्यलम् ।
विवर्णानि भवंत्येषां न तथा, न मृताविमौ. ॥ ३९५
इदं हि राज **रा** जस्य विमानं **पु**ष्पकं महत् ।
दिव्यं त्वां धारयेन्नैव यद्येतौ गतजीवितौ. ॥ ३९६
विश्रब्धा भव **म** द्वाक्यैर[4]नुमानैः [5]सुखोदयैः ।
अहतौ पश्य **का**कुत्स्थौ स्नेहादेत[6]द्ब्रवीमि ते.' ॥ ३९७
एवमुक्ता **त्रि** **ज** टया **सी**ता सुरसुतोपमा ।
कृतांजलिरुवाचेमामेवमस्त्विति सा सती. ॥ ३९८
सन्निवर्त्य वि[7] **य** द्यानं **सी**ता **त्रि**जटया सह ।
अशोकवनिकां भूयो राक्षसीभिः [8]प्रवेशिता. ॥ ३९९
ततः स वीरोऽ **ज** कुलप्रदीपः प्रत्यबुध्यत, ।
भ्रातरं [9]दीनवदनं पर्यदेवयदातुरः, ॥ ४००
'पंचत्वमद्य **य** द्येष प्राप्तः **सौ**मित्रि[10]रात्मवान् ।
किं नु मे **सी**तया कार्यं? परित्यक्ष्याम्यसूनहम्. ॥ ४०१
शक्या लोकेषु **रा** मा मे **सी**ता तुल्या विचिन्वता ।
न **ल**क्ष्मणसमो भ्राता [11]सचिवः [12]सांपरायिकः. ॥ ४०२
किं नु वक्ष्यामि **म** म तां **कौ**सल्यां मातरं? बत! ।
किं **कै**केयीं किं सुमित्रां [13]पुत्रदर्शनलालसाम्? ॥ ४०३
साधु[14]र्गुणाढ्यः **श्री** मान्यः पातितो हंत! मत्कृते ।
धिङ् मां दुष्कृतकर्माणमनार्यं दुःखभाजनम्. ॥ ४०४
अस्यामेव ध **रा** यां स्वं देहं त्यक्ष्याम्यहं बत! ।

---

१. पट्टराज्ञीम्. २. विलपंतीम्. ३. सेवेचा स्वामी मेला असतां. ४. चिह्नैः. ५. सुखोदर्कैः, शुभसूचकैः. ६. सर्ग ४८ श्लोक २२-२८ पहा. ७. आकाशयानं पुष्पकम्. ८. सर्ग ४८ श्लोक ३६ पहा. ९. दीनमुद्रेनें. १०. प्रशस्तमनाः. ११. मंत्री, सहायः. [सर्ग ४९ श्लोक ४-१०.] १२. युद्धे साधुः, रणकुशलः, सांयुगीनः. १३. पुत्राला भेटण्यास फार उत्सुक. १४. गुणवान्.

तत्तु मिथ्या प्रलपितं मां [1]प्रवक्ष्यत्यसंशयम्. ॥ ४०५
यल्लंकायां नो **म** यायं कृतो राजा **बि**भीषणः ।
अस्मिन्मुहूर्ते **सु**ग्रीव! प्रतियातुमितोऽर्हसि. ॥ ४०६
पुरस्कृत्यात्म **ज** ममुं ससैन्यस्तर सागरम् ।
शोकेन सत्वहीनं त्वां **रा**वणोऽभिभविष्यति ॥ ४०७
यत्तु शक्यं [2]वै **य** स्येन [3]सुहृदा वा परं मम ।
कृतं **सु**ग्रीव! तत्सर्वं भवताधर्मभीरुणा. ॥ ४०८
यत्कार्यं वान **रा**! मित्रैर्भवद्भिर्हनुमन्मुखैः ।
तत्कृतं तेन तुष्यामि स्वस्ति वोऽस्तु यशस्विनः. ॥ ४०९
अनुज्ञातास्ते **म** या ये समुत्तीर्याब्धिमागताः ।
भो ऋक्षा! वानराः! सर्वे यथेष्टं [4]गंतुमर्हथ.' ॥ ४१०
यैः श्रुतं तस्य **ज** गतीभर्तुस्तत्[5]परिदेवितम् ।
रुरुदुस्ते भृशं दीना ऋक्षाश्च कपयः समम्. ॥ ४११
[6]स्थापयित्वा प्र **य** त्नेन सर्वाः सेना **बि**भीषणः ।
आजगाम गदापाणिस्त्वरितं यत्र **रा**घवः. ॥ ४१२
त[7]मंजनाभं **ज** विनं दृष्ट्वा सर्वे वनौकसः ।
दिशः प्रदुद्रुवुर्भीता मत्वा **रा**वणिमागतम्. ॥ ४१३
हेतुं तेषां भ **य** स्याथ ज्ञात्वा [8]राजा **बि**भीषणम् ।
जांबवंतमुवा 'चैतान्पर्यवस्थापय द्रुतम्.' ॥ ४१४
जांबवान्वान **रा** न्सर्वान्पलायनपरान्स्वयम् ।
[9]सांत्वयामास संत्रस्तान्सन्निवर्त्य महाजवः. ॥ ४१५
बिभीषणः स **म** क्लेशो दृष्ट्वा तौ **रा**मलक्ष्मणौ, ।
'हा हे'त्युक्त्वा स शोकार्तो रुरोद विललाप च, ॥ ४१६
'जिह्मे[10]नं हंत [11]**श्री** मंतौ वंचितावृ[12]जुविक्रमौ ।

---

१. जाळून टाकील. [सर्ग ४९ श्लो० २२-२४.] २. वयस्य=केवलसखा. ३. सुहृद्=उपक्रियामूलसखा. ४. सर्ग ४९ श्लोक २५-३० पहा. ५. परिदेवनम्, प्रलपितम्. ६. सेनेंत शांतता करून. ७. अंजनसदृशम्, नीलांजनोपमम्. ८. सुग्रीवः. ९. सर्ग ५० श्लोक ८-१४ पहा. १०. शठेन. ११. 'श्रीमंतावंचितौ' असा पाठ एथें होता तो चुकीचा आहे. ब्रह्मदेवाच्या वरामुळें प्राप्त झालेल्या तिरस्करणी विद्येच्या योगानें, कपटानें लढणें ज्यांस माहीत नव्हतें अशा रामलक्ष्मणांला, ठकविलें. १२. ऋजुविक्रमौ—जे कूटयोगी नव्हते.

जीवन्नद्य विपन्नो[1]ऽस्मि नष्टराज्यमनोरथः. ॥ ४१७
कृतः सकामोऽ **रा** तिर्नो मेघनादेन रावणः' ।
विलपंतं[2] परिष्वज्य तमुवाच हरीश्वरः. ॥ ४१८
भविष्यति स **म** ग्रस्ते कामो धैर्यं सखे! कुरु ।
त्यक्त्वा[3] मोहं निहंतारौ रावणं रामलक्ष्मणौ.' ॥ ४१९
अथ वाल्यनु **ज** स्तत्र सुषेणं श्वशुरं तदा ।
अब्रवी'द्गच्छ किष्किंधां गृहीत्वा रामलक्ष्मणौ. ॥ ४२०
दशास्यायाल्य **य** महं कृत्वा पुत्रादिभिः सह ।
मैथिलीमानयिष्यामि शक्रो नष्टा[5]मिव श्रियम्.' ॥ ४२१
सुषेणो वान **रा** धीशमब्रवी'त्क्षीरसागरे ।
चंद्र[6]द्रोणौ गिरिश्रेष्ठौ वर्तेते वानरेश्वर! ॥ ४२२
तत्रौषध्यौ[7] ते **म** हत्यौ विद्येते नामनी तयोः ।
संजीवकरणी[8]त्येवं विशल्य[9]करणीति च. ॥ ४२३
अद्यौषधी ते **ज** वनाः संपातिपनसादयः ।
प्रयांत्वानेतुमाश्वेको हनूमान्वा महाजवः. ॥ ४२४
हताः सुराः सं **य** ति ये दैत्यैस्तान्धिषणः[10] स्वयम् ।
याभ्यामुत्थापयामास निर्मिताभ्यां स्वयंभुवा.' ॥ ४२५
तस्मिन्काले द्वि[11] **ज** श्रेष्ठो महता पक्षवायुना ।
कंपयन्सार्णवां[12] क्षोणीमाजगाम भुजंगभुक्[13]. ॥ ४२६
दुद्रुवुस्तेऽह **य** स्त्रस्ताः पक्षिराजे समागते ।
जाता व्राता[14] वानराणां मुदिता रुदिताकुलाः. ॥ ४२७
जयाशिषा न **रा** धीशौ प्रतिपूज्य खगेश्वरः ।

१. मृतोऽस्मि. २. बिभीषणम्. [सर्ग ५० श्लो० २०.] ३. 'दशास्थायात्ययमहं कृत्वा' या अर्धाशीं कसा मेळ पडतो? ४. हें अर्ध वा० रामायणांत आहे. [स० ५० श्लो० २५.] ५. वृत्रासुराच्या वधामुळें ब्रह्महत्येचें पातक इंद्राला घडलें यामुळें इंद्राची लक्ष्मी पाताळांत गेली होती, ती यज्ञ करून इंद्रानें स्वर्गाला परत आणली. ६. सर्ग ५० श्लोक ३१ पहा. प्राकृत मंत्ररामायण—युद्धकांड—गीति ३७८ पहा. ७. 'ओषध्यौ' हें 'ओषधी' शब्दाचें द्वितीयाद्विवचन. ८. मृतास जीवंत करणारी. ९. बाणशल्यांची पीडा निवारण करणारी. १०. बृहस्पतिः. [प्राकृत मंत्ररामायण—युद्धकांड—गीति ३८० स० ५० श्लो० २८ पहा.] ११. पक्षिराजः. १२. ससमुद्राम्. १३. भुजंगान् भुक्ते इति । गरुडः. १४. समूह.

[1]विममर्श च पाणिभ्यां मुखे चंद्रसमप्रभे. ॥ ४२८

स्पृष्टास्तेन स **म** स्तास्ते तयोः [2]संरुरुहुर्व्रणाः ।
[3]सुवर्णे च [4]तनू स्निग्धे तयोराशु बभूवतुः. ॥ ४२९

धृतिश्च शक्तिः **श्री** स्तस्य सानुजस्य प्रभोस्तदा ।
द्विगुणाभूत्स्मृतिर्बुद्धिर्[5]लीलया मानुषाकृतेः. ॥ ४३०

सस्वजे च सु **रा** धीशप्रतिमौ तावुभौ मुदा ।
रामस्तमब्रवी'दावां व्यसने रक्षितौ त्वया. ॥ ४३१

यथा [6]तातं प्रे **म** सिंधुं य[7]थाजं च पि[8]तामहम् ।
तथा भवंतमासाद्य हृदयं मे प्रसीदति. ॥ ४३२

को [9]भवान्विर **ज** स्के त्वं [10]वसानो [11]वसने शुभे ।
दिव्य[12]स्रगंगरागश्च दिव्याभरणभूषितः.' ॥ ४३३

वि[13]नतातन **य** स्तेऽहं सखा प्राणो बहिश्चरः ।
नाम्ना **गरुड** इत्युक्त्वा पृष्ट्वा सोऽ[14]गाद्यथागतम्. ॥ ४३४

प्रहृष्टा वान **रा** दृष्ट्वा [15]नीरुजौ **रामलक्ष्मणौ** ।
सिंहनादं तदा नेदुर्लांगूलं दुधुवुश्च ते. ॥ ४३५

ततः प्लवंग **म** वरा द्रुमानुत्पाट्य कोटिशः ।
लंकाद्वाराण्युपाजग्मुर्युद्धकामा महाबलाः. ॥ ४३६

राजराजानु **ज** स्तेषां ज्ञात्वा हर्षस्य कारणम् ।
[16]संशयस्थं बलं मेने [17]धूम्राक्षं प्राहिणोदथ. ॥ ४३७

---

१. स्पर्श करिता झाला. हें अर्ध रामायणांत आहे. [स० ५० श्लो० ३८.] २. भरून आले, यथापूर्व संरूढमांसा अभूवन्. ३. शोभनकांतियुक्ते. ४. शरीरे. ५. लीलेनें मानुषदेह धारण करणाऱ्याची धृति इत्यादि. ६. पितरम्, दशरथम् । 'पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते.' ७. अज हा नहुषाचा नातु व दशरथाचा बाप. ८. चतुर्मुखब्रह्मांशम्. ९. वि+रजस्+कप्+द्वि० प्र०=निर्मले. १०. वस्+शानच्+प्र० प्र०=परिधान करणारा. ११. अंतरीयोत्तरीये. १२. स्रक् (माला) च अंगरागः (उटी) च स्रगंगरागौ, दिव्यौ स्रगंगरागौ यस्य सः. १३. विनता हें गरुडाचे आईचें नांव. विनतापुत्र=गरुड. हें गरुडाचें उत्तर आहे. १४. 'अगात्' हें लुङ्लकाराचें तृतीय पुरुषाचें 'इ'धातूचें रूप. 'इणो गा लुङि' २।४।४५. १५. नास्ति रुजा ययोस्तौ, निर्+रुजा+द्वि० प्र० रो रि ८।३।१४ ढ्रलोपे इत्यादि ६।३।१११. हा श्लोक रामायणांत आहे. [सर्ग ५० श्लो० ६१.] १६. 'कपिनिनदें श्रीदानुज पावे तात्काल मृत्युची शंका; । आतंकाकुल झाला, हरिसैन्यें वेष्टिली जशी लंका. ॥' [प्राकृत मंत्ररामायण—युद्धकांड—गीति ३९१ पृ० १२१.] १७. धूम्राक्ष हा रावणाकडील एक रणदक्ष वीर.

क्रृतः कीशक्ष **य** स्तेन धूम्राक्षेण रणाजिरे ।
गिरेः शिखरमादाय स हतो [१]वायुसूनुना. ॥ ४३८

[२]वज्रदंष्ट्रं च **ज** न्यार्थं प्रेषयामास रावणः ।
अंगदस्तस्य चिच्छेद शिरस्तदसिना रणे. ॥ ४३९

अकंपनं ज **य** स्यार्थं निर्गतं रावणाज्ञया ।
हनूमानवधीद्युद्धे [३]तरुणा [४]तरुणार्करुक्. ॥ ४४०

[५]प्रहस्तोऽथ [६]सु **रा** नीकपराभवविचक्षणः ।
रावणप्रहितो युद्धे नीलेन शिळया हतः. ॥ ४४१

अथ श्रुत्वा प्र **म** थितं प्रहस्तं वाहिनीपतिम् ।
निर्ययौ स्वयमेवोग्रः क्रूरकर्मा [७]दशाननः. ॥ ४४२

हंतुं [८]सुकंठः **श्री** दस्य भ्रातरं भीमविक्रमम् ।
गृहीत्वाद्रेर्महाशृंगमभिदुद्राव वेगवान्. ॥ ४४३

[९]सायकै[१०]र्यातु **रा** जस्तच्चूर्णीकृत्य महाबलः ।
शरेणैकेन सुग्रीवं पातयामास भूतले. ॥ ४४४

शैलान्गृहीत्वा **म** हतो [११]गवाक्षगवयर्षभाः ।
प्रदुद्रुवुस्तेऽपि शरैस्तेन विद्धा निपातिताः. ॥ ४४५

यथा वातेन **ज** लदा भग्नास्तेन [१२]वलीमुखाः ।
जग्मुः [१३]शरण्यं शरणं रामं [१४]कामं भयाकुलाः. ॥ ४४६

[१५]कोदंडमादा **य** परं हंतुं गंतु समुद्यतम् ।
प्रांजलिर्लक्ष्मणो राममब्रवीदग्रतः स्थितः, ॥ ४४७

'[१६]पर्याप्तोऽहं प **रा** भूतौ रावणस्य दुरात्मनः ।
आर्य ! कार्यमिदं कर्तुमनुजानीहि मां प्रभो !' ॥ ४४८

तं सोऽब्रवी'त्स **म** र्थोऽसि गच्छ यत्नपरो भव ।
आत्मानं रक्ष सौमित्रे ! रावणो हि[१७] महाबलः.' ॥ ४४९

---

१. सर्ग ५२ श्लोक २३-२८ पहा. २. हा सुमालीचा मुलगा व रावणाचा मामा. [स० ५३ श्लो० २.] ३. वृक्षानें. ४. मध्याह्नीच्या सूर्याप्रमाणें ज्याचें तेज आहे तो. तरुण+अर्क+रुच्=युव+सूर्य+तेज. ५. हा रावणाचा मामा. ६. देवांच्या सैन्याचा पराभव करण्यांत मोठा कुशल. ७. प्राकृत मंत्ररामायण–युद्धकांड–गीति २९४-२९९ पहा. ८. सुगलः=सुग्रीवः. ९. बाणैः. १०. राक्षसराजः. ११. गवाक्ष+गवय+ऋषभाः. १२. वानराः, वलियुक्तं मुखं एषां ते. १३. शरणागतत्राणकरणयोग्यम्. १४. अत्यर्थम्. १५. धनुष्य. १६. समर्थ. १७. यस्मात् यतः.

परिष्वज्याग्र **ज** मथो नत्वा **सौ**मित्रि[1]राहवे ।
ययौ ददर्श **दि**[2]क्तुंडं छादयंतं शरैररीन्. ॥ ४९०

तं **वा**युतन **य** स्तस्य समासाद्य रथं रणे ।
उवाच दक्षिणं बाहुमुद्यम्याद्भुतविक्रमः, ॥ ४९१

'अवध्यत्वं [3]कं **ज** जस्य वराद्देवासुरादिभिः ।
प्राप्तं त्वया **द**शग्रीव! वानरेभ्यस्तु ते भयम्. ॥ ४९२

दक्षिणो मम **र्थं**[4] त्तोऽयं बाहुरद्य समुद्यतः ।
विधं[5]मिष्यति ते देहे [6]भूतात्मानं चि[7]रोषितम्.'॥ ४९३

संक्रुद्धो यातु **रा** जस्तमब्रवी'त्प्रहर द्रुतम् ।
ततः पराक्रमं ज्ञात्वा त्वां वधिष्यामि वानर!' ॥ ४९४

तमब्रवीत्स **म** रुतः सूनुः क्रुद्धं **द**शाननम्, ।
'त्वं मया निहतं पूर्व**म**क्षमात्मसुतं स्मर.' ॥ ४९५

रोषेण बंधुः **श्री** दस्य तलेनोरसि **मा**रुतिम् ।
आजघानाहतस्तेन स चे[9]चाल मुहुर्मुहुः. ॥ ४९६

[10]स्थैर्यं कृत्वा सु **रा** रातिं तलेनैवाजघान सः ।
दशग्रीवः कंपितोऽभूद्भूमिकंपे य[11]थाचलः. ॥ ४९७

दृष्ट्वा वि[12]संज्ञ **म** मरा ऋषयो वानरा मुदा ।
विनेदुः स [13]त्वथाश्वस्य **रा**वणो [14]हरिमब्रवीत्, ॥ ४९८

'साधु वानर! **[15]जं** न्ये त्वं श्लाघनीयोऽसि वीर्यतः.' ।
तमब्रवीत्कपि'र्वीर्यं धिगस्तु मम **रा**वण! ॥ ४९९

---

१. युद्धे. युद्धार्थम् । आहूयंतेऽरयोऽत्रेति. २. दशाननम्. ३. कमलोद्भवस्य ब्रह्मणः. [स० ५९ श्लो० ५४-५५.] ४. मारण्याकरितां यत्नवान्. ५. तव देहात् अपहरिष्यति. ६. प्रत्येक प्राण्याच्या देहांत परमेश्वराचा अंशभूत जो 'जीव' नामक आत्मा असतो त्याला एथें 'भूतात्मा' म्हटलें आहे. आत्म्याचे विभाग दोन कल्पिले आहेत; ते परमात्मा व जीवात्मा हे होत. ७. पुष्कळ काळापासून देहांत वास करणाऱ्या (जीवात्म्याला). 'चिरोषितम्' हें विशिष्टपद लावण्याचें कारण हेंच कीं रावण हा प्रजापतीचा पणतु (प्रपौत्र) आहे, तो 'विवस्वत्' याच्या काळीं जन्मला व रामाच्या अवतारापर्यंत होता, तितक्या काळांत सुमारें ३५ राजे झाले. ८. सर्ग ५९ श्लोक ५८-६६ पहा. ९. कोलांट्या खाऊं लागला. १०. स्थिर होऊन. ११. पर्वतः. १२. मूर्छितम्. १३. तु अथ आश्वस्य, कांहीं वेळानें नीट श्वासोच्छ्वास करायाला लागून, शुद्धीवर येऊन. १४. हनूमंतम्. १५. युद्धे.

जीवस्यद्यापि **य** स्त्वं [1]मे निःशंकं [2]तैलताडितः ।
सकृत्तु प्रहरेदानीं दुर्बुद्धे! किं विकत्थसे? ॥ ४६०
ततस्त्वाममम **रा** राते! मामको मुष्टिरुद्धतम् ।
लोकपीडाकरं मत्तं प्रणेष्यति [3]यमक्षयम्.' ॥ ४६१
ततः स पर **म** क्रुद्धो मुष्टिमावृत्य दक्षिणम् ।
पातयामास वेगेन **वा**नरोरसि [4]वीर्यवान्. ॥ ४६२
स प्रभंजन **ज** स्तेन ताडितो दृढमुष्टिना ।
पुनः पुनः संचचाल प्रवाते [5]विटपी यथा. ॥ ४६३
दृष्ट्वा वायोः का **य** जं तं व्याकुलं **द**शकंधरः ।
समुत्सृज्य महातेजा **नी**लं प्रति समभ्यगात्. ॥ ४६४
समाश्वस्तः **[6]सोऽज** नाजो दृष्ट्वा **नी**लेन संगतम् ।
उवाच **मा**रुति'र्नेदं युक्तं ते **द**शकंधर!' ॥ ४६५
क्षिप्ता **नी**लेन **य** [7]ईलाधरा वृक्षाश्च भूरिशः ।
रावणस्तान्प्रचिच्छेद शरैरशनिसन्निभैः. ॥ ४६६
[8]ह्रस्वरूपः सु **रा** रातेर्ध्वजाग्रे निपपात [9]सः ।
जज्वाल **रा**वणः क्रोधात्ततो **नी**लो ननाद च. ॥ ४६७
सौमित्रिहनु **म द्रा**मा **रा**वणस्यां[10]ग्निनंदनम् ।
[11]दृष्ट्वा ध्वजाग्रे चापाग्रे किरीटाग्रे च विस्मिताः. ॥ ४६८
तथैव बंधुः **श्री** दस्य [12]कपिलाघवविस्मितः ।
अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम्. ॥ ४६९

---

१. मया. 'न लोकाव्यय—'इत्यादिना २।३।६९ तृतीयैव युक्ता. २. हें रामायण रचतांना **पं**तांनीं मूळग्रंथांतील जीं पदें घेण्यासारखीं होतीं तीं घेतलीं असून टीकेंतीलही पदें अनेक ठिकाणीं घेतलीं आहेत असें आढळून येतें. अर्थबोध होण्यासाठीं टीकाकारानें जीं सोपीं पदें टीकेंत योजिलीं आहेत त्यांचा **पं**तांनीं आपल्या ग्रंथांत आदर केला आहे. हा ग्रंथ सुबोध व्हावा अशी **पं**तांची फार इच्छा होती असें म्हणण्यास कांहीं हरकत नाहीं. ३. यमालयम्. ४. पराक्रमी. ५. शाखी, वृक्षः. ६. अंजनेपासून झालेला मारुति. ७. भूधराः, पर्वताः. ८. लहानसें रूप घेऊन, ह्रस्वं रूपं यस्य सः. ९. नीलः १०. नीलम्. [सर्ग ५९ श्लो० ६७-८३.] ११. रणांत रावणाच्या किरीटावर उभें राहणें परम दुष्कर होतें, परंतु नील वानराला तेथें पाहून रामादिक तिघेही विस्मित झाले. [सर्ग ५९ श्लो० ७९ टीका.] १२. नीलाच्या युद्धकुशलतेनें चकित झालेला.

चुक्रुशुर्वान **रा** हृष्ट्वा भ्रान्तं[1] दृष्ट्वा **द**शाननम्; ।
क्रुद्ध आग्नेयसंयुक्तं शरमादाय **रा**वणः. ॥ ४७०

अब्रवीन्नील '**म** द्य त्वं जीवितं रक्ष वानर !' ।
इत्युक्त्वास्त्रप्रयुक्तेन शरेण तमताडयत्. ॥ ४७१

नीलः पपात **ज** गतीपृष्ठे तत्कालमेव सः ।
परं पितुश्चात्मनश्च तेजसा न मृतस्तदा.[2] ॥ ४७२

ततोऽरातिर्ज[3] **य** प्रेप्सुः **सौ**मित्रिमभिनिर्ययौ ।
सै[4] तमा'हार्हसि कपीन्द्र योद्धुं पश्य मां स्थितम्.'॥ ४७३

तमुवाच सु **रा** राति'र्दिष्ट्या दृष्टोऽसि **रा**घव ! ।
अस्मिन्क्षणे मृत्युलोकं यास्यसि त्वं ममाशुगैः.' ॥ ४७४

अब्रवीत्स स **म** न्युस्तं 'किं पाप ! त्वं विकत्थसे ? ।
महाप्रभावा गर्जंति न जातुचिदसत्तम !'[5] ॥ ४७५

ततः **श्री**दानु **ज** श्चक्रे युद्धं **सौ**मित्रिणा सह ।
सौमित्रिश्च महातेजास्तस्य चिच्छेद सायकान्. ॥ ४७६

सुमित्रातन **य** स्याथ ललाटे स **द**शाननः ।
निचखान शरं घोरं **ब्र**ह्मदत्तं पविप्रभम्[6]. ॥ ४७७

स **रा**मस्यानु **ज** स्तेन व्याकुलोऽभूत्क्षणं पुनः ।
संज्ञां प्राप्य महातेजाः शत्रोश्चिच्छेद कार्मुकम्. ॥ ४७८

त्रिभिस्तीक्ष्णैः सा **य** कैस्तमाजघानाशु मर्मणि ।
स चचाल पुनः संज्ञां कृच्छ्रात्प्राप **दि**ग्[7]गाननः. ॥ ४७९

ततः शक्तिं खं[8] **रा** माशु **ब्र**ह्मदत्तां[9] महाबलः ।
प्रेषयामास संक्रुद्धां कालीं[10] व्यालीं नवामिव. ॥ ४८०

शरैरस्त्रैः स **म** र्थैस्तां जघान **भ**रतानुजः ।
तथापि शक्तिः सा तस्य विवेशैव भुजांतरम्[11]. ॥ ४८१

---

१. किंकर्तव्यताविमूढम्. २. सर्ग ५९ श्लोक ८४-८९ पहा. ३. जय+प्र+ईप्सुः=जयाची फार इच्छा करणारा, ईप्सुः=आप (ईप)+सन् उः. ४. सौमित्रिः. ५. हे असत्तम (दुष्ट) प्रभवशाली आहेत ते कधींही वडबड करीत नाहींत. ६. वज्रतुल्यम्. ७. दिक्तुंडः=दशाननः. ८. उग्राम्. ९. स्वयंभुदत्ताम्. १०. कृष्णसर्पिणीम्. ११. उरांत. सर्ग ५९ श्लोक १०७ पहा.

[1]ब्राह्म्यापि शक्त्या **श्री** मान्स ताडितोऽपि स्तनांतरे ।
विष्णोरमीमांस्यभागमात्मानं प्रत्यनुस्मरत्. ॥ ४८२
द्वाभ्यां भुजाभ्यां **रा** जा तं जग्राहोपेत्य सत्वरम् ।
चालनेऽपि क्षमो नाभूत्किं तस्योद्धरणे पुनः ? ॥ ४८३
तदानीं द्रुत **म** भ्येत्य **रा**वणं **वा**युनंदनः ।
आजघानोरसि [2]क्रुद्धो [3]वज्रकल्पेन मुष्टिना. ॥ ४८४
राजराजानु **ज** स्तेन वमन्रुधिरमाकुलः ।
पपात मूर्च्छितो नेदुर्देवदैत्यमहर्षयः ॥ ४८५
कपिस्तमान **य** त्तूर्णं [4]रामाभ्याशं [5]सुभक्तिमान् ।
शक्तिस्तमुत्सृज्य गता **रा**वणस्य रथं प्रति. ॥ ४८६
[6]आश्वस्तोऽभूद्[7] **रा** तिघ्नो मुहूर्ताद्भरतानुजः ।
रावणोऽपि पुनर्योद्धुं धनुर्बाणान्समाददे. ॥ ४८७
[8]दृष्टप्लवंग **म** वधो **रा**मो [9]रक्तांतलोचनः ।
हनूमंतं समारुह्य **रा**वणं [10]समदुद्रुवत्. ॥ ४८८
तमाह [11]मनु **ज** च्छद्मा, 'तिष्ठ कृत्वा ममाप्रियम् ।

---

१. मूळांत हा श्लोक आहे. [स० ५९ श्लो० ११०.] रावणाच्या मनांत, लक्ष्मण कदाचित् पुनः जिवंत होईल, अशी भीति असल्यामुळें तो लक्ष्मणाला उचलून समुद्रांत टाकणार होता, परंतु तो लक्ष्मणाला उचलूं शकला नाहीं. त्याचें कारण या श्लोकांत दिलें आहे. 'भरतानुजः संख्ये उद्धर्तुं शक्यो नाभूत्, कुतस्तत्राह शक्त्येति अमोघया ब्रह्मदत्तया स्तनांतर आहतः सौमित्रिर्विष्णोरमीमांस्यं निःसंशयविष्णुभागत्ववंतमियत्तया चिंतयितुमशक्यं वा विष्णोर्भागमात्मानं प्रत्यनुस्मरदन्वस्मरत, नहि स्वीयं स्वं हिनस्तीत्याशयेन ब्रह्मशक्तिमूलापत्राणार्थं भगवत्तेजोंऽश एवाहमस्मीति ध्यातवान् । नटवदंगीकृतमनुष्यत्वस्येतरेषां दृढप्रतीत्यर्थम्, परं न सर्वदा तथा ध्यानम्, एवं च ब्रह्मभावनया लक्ष्मणेन स्वशरीरस्य गरीयस्त्वमापादितमित्युक्तं भवति ।' इति तिलके. [स० ५९ श्लो० १०९-११० टीका.] 'मीमांस्य' हें कृत्य कृदन्ताचें रूप आहे 'मीमांस' हा धातु मूळ 'मन्'धातूला स्वार्थीं सन् प्रत्यय लागून झाला आहे. २. सौमित्रिक्लेशनात्क्रुद्धः. ३. वज्रतुल्येन. ४. रामाजवळ. अभ्याश किंवा अभ्यास द्विरूप शब्द आहे. ५. सुभक्तिमान् हें हेतुगर्भविशेषण आहे. मारुति लक्ष्मणाला उचलूं शकला कारण तो सुभक्तिमान् होता. ६. प्राप्ताश्वासेंद्रियग्रामः. ७. शत्रुघ्नः । शत्रुसूदनः. ८. दृष्टः प्लवंगमानां वधो येन सः. ९. रक्तांते लोचने यस्य सः. १०. रावणावर धांवून गेला. 'अदुद्रुवत्' हें लुङ्लकाराचें रूप. ११. छद्मना मनुजः. 'राजदंतादिषु परम्' २।२।३१ या आकृति गणाप्रमाणें छद्म शब्दाचा परनिपात झाला. खोटेंच मनुष्याचें रूप धारण करणारा.

क्व नु राक्षसशार्दूल! गत्वा मो[१]क्षमवाप्स्यसि? ॥ ४८९

कर्ता तव क्ष **य** [२]स्याहं पुत्रैः पौत्रैः प्रियैः सह ।

[३]क्षणाद्येन **ज**नस्थानं सर्वं [४]नीराक्षसं कृतम्.' ॥ ४९०

एवमुक्तः **सोऽ ज** नाजं वहंतं **रा**घवं रणे ।

आजघान शरैर्दीप्तैः पूर्ववैरमनुस्मरन्. ॥ ४९१

त[५]**स्यां**जनाका **य** भुवः [६]कालानलविषोपमैः ।

ताडितस्य शरैर्भूयस्तेजोवृद्धिरभूत्तदा. ॥ ४९२

रामो राक्षस **रा** जेन दृष्ट्वा भक्तं कृतव्रणम् ।

चकार विरथं सूतं हयान्हत्वा निरायुधम्. ॥ ४९३

छित्वा ध्वजं हि[७] **म** करप्रभं छत्रमथेषुभिः ।

किरीट[८]कूटं चिच्छेद जघानोरसि राक्षसम्. ॥ ४९४

वज्रप्रहारैः **श्री** मान्यो न चचाल **द**शाननः ।

स **रा**मबाणाभिहतो मुमोह धनुरत्यजत्. ॥ ४९५

तमुवाच पं[९] **रा** धीनं **रा**घवो विरथं खलम्, ।

'अलं श्रांतोऽसि राजंस्त्वं युद्धे नास्त्यद्य ते बलम्.॥ ४९६

गच्छ मुक्तोऽस्य **म** त्यारे! विश्रांतः [१०]श्वस्त्वमाहवम् ।

पुनः सैन्यैः परिवृतो योद्धुमेहि मया सह. ॥ ४९७

प्रेक्षिष्यसे भु **ज** स्थं मे वीर्यमा[११]जौ स्वकैः सह ।

[१२]परिश्रांतं मृत्युवशं नयामि त्वां न राक्षस!' ॥ ४९८

एवमुक्तो भ **य** व्यासो [१३]हतदर्पो निशाचरः ।

विवेश **लं**कां **रा**मेण लीलया युधि निर्जितः. ॥ ४९९

श्री**रा**मेण प **रा** भूतो बभूव व्यथितेंद्रियः ।

[१४]मातंग इव सिंहेन **ग**रुडेनेव पन्नगः. ॥ ५००

---

१. हा श्लोक मूळांतही बहुतेक असाच आहे. [स० ५९ श्लो० १२७.] क्व गत्वा इति योजना. न क्वापीत्यर्थः. २. सोऽहम्. ३. येन क्षणात्. ४. न संति राक्षसा यस्मिंस्तत् । निर्+राक्षस+प्र० प्र०. ५. अंजनायाः कायात् भवतीति अंजनाकायभूः. तस्य आंजनेयस्य. ६. 'कालानलशिखोपमैः' हा मूळांतील पाठ उत्तम आहे. ७. शशिप्रभम्. ८. किरीटशिखरं किरीटसमूहं वा. ९. मोहपरवशम्. १०. श्वः=उद्यां. ११. संग्रामे. १२. पूर्वीची धर्मयुद्धाची रीत लक्ष्यांत ठेवण्याजोगी आहे. [स० ५९ श्लो० १४०.] १३. नष्टगर्वः. १४. हें अर्ध मूळांत आहे. [स० ६० श्लो० २.]

उवाच पर[1] **म** व्यग्रः प्रेक्षमाणो निशाचरान्, ।
‘व्यर्थं तपो मे यद्युद्धे मानुषेणास्मि निर्जितः. ॥ ९०१
इदं तत्कं[2]ज **ज** वचो घोरं मामभ्युपस्थितम्, ।
मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा. ॥ ९०२
देवदानव **य** क्षैस्तैर्गंधर्वोरगराक्षसैः ।
अवध्यत्वं मया प्राप्तं, मानुषेभ्यो न याचितम्. ॥ ९०३
[3]अनरण्योऽपि **ज** गतीपतिर्मामशपत्पुरा ।
शप्तोऽहं वे[4]दवत्या च सेयं जनकनंदिनी. ॥ ९०४
[5]उमा शंभोः प्रि **य** तमा मह्यं कै[6]लासचालने ।
[7]नंदीश्वरश्चोपहासे घोरं शापं ददौ पुरा. ॥ ९०५
तद्राक्षसाः! स्म **रा** म्यद्य निमित्तं मद्भयस्य यत् ।
यूयं प्रियाः सहाया मे यत्नं कर्तुमिहार्हथ. ॥ ९०६

---

१. अत्यंतव्याकुलः. २. रावणस्य वचः, कमलोद्भववचः, [मोरोपंत—संस्कृत मंत्ररामायण उत्तरकांड श्लो० १२०-१२१, वा० रा० उत्तर० स० १० श्लो० १९-२०.] या वराचें वर्णन प्राकृत मंत्ररामायणांत असें आहे:—शुभवंचनें तो राक्षस, अनतिक्रमितांचि बोलिल्या विधिला; । सांग समचीं वन्यें. तेव्हां ‘अमरत्व दे’ म्हणे विधिला. ॥ द्रुहिण म्हणे, ‘अमराच्या भावाला पात्र अन्य जन नाहीं; । सुखकर वर देतों घे, वाचे वद होय योग्य जें कांहीं. ॥’ ‘यक्षसुपर्णभुजगसुरदितिदनुसुतराक्षसादि जे कांहीं । यांपासुनि मरण नसो. नरादिकीं भीति’ तो म्हणे ‘नाहीं.’ ॥-ऐसें ऐकुनि तोयजभव त्यासि म्हणे, ‘दिलें प्रपौत्राला; । अन्यदुरासदता घे-समर्पिली कामरूपता बाला!’ ॥ [प्राकृत मंत्ररामायण—उत्तरकांड—गीति ३२-३५ पृ० १६९.] ३. वा० रा० उत्तर० स० २० श्लो० २९-३०. ‘रविवंशज राजर्षी अनरण्य प्राज्ञ बोलिला, ‘तुजला; । मत्कुलज वीर मारील’ तें हें संप्राप्त जाहलें मजला. ॥ [काव्यसंग्रहग्रंथमाला—मोरोपंतकृत रामायणें—भाग १—प्राकृत मंत्ररामायण—युद्धकांड—गीति ४२८ पृ० १२४.] ४. वेदवतीची साग्रकथा वा० रा० उत्तर० स० १७ त दिली आहे. शापाबद्दल, श्लो० ३०-३२ पहा. मोरोपंतकृत प्राकृत मंत्ररामायण—उत्तरकांड—गीति ७६-८९ पृ० १७४-१७५ पहा. ५. उमेनें कोणता शाप दिला हें वा० रामायणांत नाहीं. रावणाला स्त्रीनिमित्त मरण प्राप्त होईल असा उमेनें कैलासशिखरचालनप्रसंगीं शाप दिला. [स० ६० श्लो० १२ टीका.] ६. कैलास=शिवाचें क्रीडास्थान. [‘**कैलासः** कनकाद्रिश्च मंदरो गंधमादनः । क्रीडार्थं निर्मिताः शंभोर्देवैः क्रीडाद्रयोऽभवन् ॥’ इति शंभुरहस्ये. ‘**कैलासो** हिमवांश्चैव उत्तरे वर्षपर्वतौ । पूर्वपश्चायतावेतौ अर्णवान्तरुपस्थितौ ॥’ इति ब्रह्मांडपुराणे.] ७. वा० रा० उत्तर० स० १६ श्लो० १४-१७. रावण नंदीला पाहून उपहासपूर्वक हंसला, कारण नंदीचें मुख वानरासारखें होतें. तेव्हां राग येऊन नंदीनें ‘तुझा कुलक्षय वानरच करतील’ असा रावणाला शाप दिला—या कथेचा एथें संबंध आहे.

महासत्वो म **म** भ्राता **कुंभकर्णो** विबोध्यताम्, ।
प्रयत्नः क्रियतां दुर्गप्राकारद्वाररक्षणे. ॥ १०७
संरक्षणीया **श्री** रद्य प्रयत्नेन निशाचराः! ।
सुखं स्वपिति निश्चितः **कुंभ**कर्णो विबोध्यताम्. ॥१०८
स हि संख्ये प[1] **रा** क्रांतः [2]ककुदं सर्वरक्षसाम् ।
वानरान्राजपुत्रौ च क्षिप्रमेव हनिष्यति. ॥ १०९
रामेण संग्रा **म** इह [3]प्रभग्नस्य सुदारुणे ।
भविष्यति न मे शोकः **कुंभ**कर्णे [4]विबोधिते.' ॥ ११०
भर्त्रेत्युक्ताः प्र **ज** ग्मुस्ते **कुंभ**कर्णनिवेशनम् ।
गंधं माल्यं महद्भक्ष्यमादाय रजनीचराः. ॥ १११
ते **कुंभ**कर्णं **य** त्नेन महता राक्षसोत्तमाः ।
दिनद्वये[5]नायुतशः कृच्छ्रेण प्रत्यबोधयन्. ॥ ११२
प्रबुद्धो मांस **रा** शीन्स भुक्त्वा नानान्नपर्वतान् ।
सहस्रशो मद्यकुंभान्पीत्वा स्नातो [6]घटश्रुतिः. ॥ ११३
[7]यूपाक्षात्स स **म** ग्रं तत्सचिवाद्वृत्तमात्मनः ।
प्रबोधकारणं श्रुत्वा **कुंभ**कर्णस्तमब्रवीत्. ॥ ११४
'हरिसैन्यं रा **ज** पुत्रौ तौ चाहं **रामलक्ष्म**णौ ।
जित्वा प्रथममेवाजौ ततो द्रक्ष्यामि [8]**रा**वणम्.' ॥ ११५
[9]**म**होदरो न **य** ज्ञस्तं **कुंभ**कर्णं तदाब्रवीत्, ।
'श्रुत्वा प्रभुवचः शत्रून्पश्चादपि विजेष्यसे.' ॥ ११६
स प्रतस्थेऽग्र **ज** स्यादौ दर्शनार्थं महातनुः ।
कुंभकर्णः पदन्यासैः [10]कंपयामास मेदिनीम्. ॥ ११७
[11]बहिस्थाः कप **य** स्तस्य व्रजतो राजवर्त्मनि ।
दर्शनात्**कुंभ**कर्णस्य त्रस्ताः सर्वे पलायिताः. ॥ ११८
केचिच्छरण्यं **रा** जेंद्रं **रा**घवं शरणं ययुः ।

---

१. पराक्रमशाली. २. सर्व राक्षसांमध्यें श्रेष्ठ. ३. या दारुण संग्रामांत रामानें ज्याचा चांगला मोड केला त्या माझा. ४. सर्ग ६० श्लो० ५-२१ पहा. यांत रावणोक्ति आहे. ५. हजारों प्रकारांनीं. ६. कुंभकर्णः. ७. 'यूपाक्ष' हें सचिवाचें नांव. [स० ६० श्लो० ७१.] ८. सर्ग ६० श्लो० ७९ पहा. ९. हा एक राक्षसयोधमुख्य होता. १०. असेंच वर्णन प्राकृत मंत्ररामायणांत आहे. [युद्धकांड—गी०४४५. पृ०१२६.] ११. बाहेर असलेले.

[1]क्रममाणं महाकाशं पुरा **ना**रायणं यथा. ॥ ६१९

तथा दृष्ट्वा त **म** त्युग्रं **रा**मो **द**शरथात्मजः ।
कोऽयमत्युच्छ्रितः श्रीमानित्यपृच्छ**द्वि**भीषणम्. ॥ ६२०

बिभीषणस्तं श्री मंतं **रा**घवं जगतः पतिम् ।
प्रणम्याकथयत्तस्य नामवीर्याद्यशेषतः. ॥ ६२१

‘राम! येन सु **रा** धीशः साक्षात्**का**लश्च निर्जितः ।
[2]ऐरावतैकदंतेन **वा**सवो युधि ताडितः. ॥ ६२२

भक्षिताश्च स **म** र्थेन प्रजा येन महौजसा ।
यं दृष्ट्वा त्रिदशाः सर्वे **का**लोऽयमिति मोहिताः.॥६२३

ब्रह्मा यमाह **ज** नितस्त्वं हि **वि**[3]श्रवसा ध्रुवम् ।
प्रजानाशाय तत्पाप! मृतकल्पः शयिष्यसे. ॥ ६२४

ब्रह्माग्रजेन[4] **य** स्यार्थे प्रार्थितः सन्पुराब्रवीत्, ।
‘शयिता ह्येष षण्मासमेकाहं जागरिष्यति.’ ॥ ६२५

सोऽयं राक्षस **रा** जस्य **कुं**भकर्णोऽनुजः प्रभो! ।
उत्थापितो बलादद्य राज्ञा योद्धुं [5]त्वया सह.’ ॥ ६२६

---

१. ‘क्रममाणमिवाकाशं पुरा नारायणं यथा’ असा वा० रामायणांतील पाठ आहे. [स० ६१ श्लो० २.] २. या श्लोकांत सांगितलेले कुंभकर्णाचे पराक्रम वा० रामायणांत आहेत. इरावान् समुद्रः तत्रभवः ऐरावतः, तस्य एकदंतेन. ३. विश्रवस् हा कुबेररावणादिकांचा बाप. ४. वडील भावानें, रावणानें. वा० रा० उत्तर० स० ६१ श्लो० ९-२९. ५. सर्ग ६१ श्लो०८-३२ यांत ही बिभीषणोक्ति आहे. या कुंभकर्णाचें वर्णन प्राकृत रामायणांत आहे तें संस्कृत मंत्ररामायणांतील वर्णनाशीं ताडून पहावें:—दशकंठानुज तेव्हां म्हणे, ‘विभो! हा अनंतबलसिंधू; । सिंधुरगति सुप्तोत्थित निद्रालस कुंभकर्ण मद्बंधू. ॥ ४५० ॥ बहुलोकक्षय याणें उपजत केला तधीं शतक्रतुला । मुनिजन कथिती, तेव्हां क्रोध धरी कीं नसे जयास तुला. ॥ ४५१ ॥ अमरपति जयंतपिता यातें वज्रें करूनियां ताडी; । हा ही शतकोटिकठिणमुष्ट्याघातेंचि जिष्णुला पाडी. ॥ ४५२ ॥ आत्मपराजय इंद्रें कथितां, ब्रह्मा म्हणे, ‘असा पापी; । हा पीडाकर राक्षस मृतकल्प सदा निजो असें शापी.’ ॥ ४५३ ॥ त्या समयीं तो रावणधृतपद विधि,‘हा निजोनि सा मास, । जागो एकदिवस’ हें बोले, पुरवी प्रपौत्रकामास.॥४५४॥ हा तोचि पितामहमुखलब्धमहाशापदग्ध घटकर्ण; । अर्णव महाबलाचा, येतो पानीयभृद्धटावर्ण. ॥४५५॥ हा घटकर्ण श्रीमान् बलवान् रणदक्ष युद्धकामानें;।रामा! नेणुनि तुजला, उठवीला पंक्तिकंठनामानें.॥४५६॥ विधिशापपराजित हा येईल, बळें करावयास रण; । यास रणत्पत्र तुझे शर नेतिल जानकीप्रिया! सरण.’ ॥ ४५७ ॥ [काव्यसंग्रहग्रंथमाला—मोरोपंत—रामायणें—भाग १ मंत्ररामायण—युद्धकांड—गी० ४५०-४५७ पृ० १२६-१२७.]

रामस्तमाह, ‘**म**तिमन्! कथमेनं महाबलम् ।
वानरा वारयिष्यंति’ तमुवाच **बि**भीषणः. ॥ १२७
‘उच्यंतां मनु**ज**श्रेष्ठ! वानरा माययारिणा ।
बि[1]भीषिकार्थं समरे [2]यंत्रमेतत्समुच्छ्रितम्. ॥ १२८
ज्ञात्वा मायाम**य**मिमं सर्वे शाखामृगाः प्रभो! ।
ये भीता दर्शनेनास्य ते भविष्यंति निर्भयाः.’॥ १२९
दशकंठानु**ज**वचः श्रुत्वा **दा**शरथिः स्वयम् ।
आह सेनापतिं **नी**लं स तथाकथयत्कपीन्. ॥ १३०
‘यंत्रं मायाम**य**मि’ति श्रुत्वा सर्वे प्लवंगमाः ।
गृहीत्वागान्नगान्हृष्टा **लं**काया द्वारमभ्ययुः. ॥ १३१
कुंभकर्णः प[3]**रा**भूत्या खिन्नमग्रजमब्रवीत्, ।
‘राजंस्त्वया बलवता वैरमुत्पादितं कथम्? ॥ १३२
यः शत्रुमव[4]**म**त्योग्रमात्मानं नाभिरक्षति ।
अवाप्नोति हि सोऽनर्थान्स्थाना[5]च्च [6]व्यवरोप्यते. ॥ १३३
पूर्वं यदुक्तं **श्री**मंस्ते प्रि[7]यया मे[8]ऽनुजेन च ।
तदेव नो हितं वाक्यं यथेच्छसि तथा कुरु.’ ॥ १३४
क्रुद्धो राक्षस**रा**जस्तमुवा‘चाहं गुरुस्तव ।
[9]अनुप्रशास्सि किं मां त्वं? यद्युक्तं तद्विधीयताम्.॥१३५
वि[10]भ्रमाद्वाथ **म**नसो मोहा[11]द्वीर्याश्रयेण वा ।
य[12]न्नोभिपन्नमधुना व्यर्था तस्य पुनः कथा. ॥ १३६

---

१. भिवविण्यासाठीं. विभीषिका=‘बुजाडणें’=a scarecrow असा कधीं कधीं अर्थ होतो. २.‘त्रयमेतत् समुच्छ्रितम्’ हा ‘काव्येतिहाससंग्रहां’तील पाठ चुकीचा आहे. नजरचुकीनें वर्णविपर्यय झाला असावा. तुम्हांला भिवविण्यासाठीं मायाबलानें. रावणानें हें राक्षसाकृति ‘बुजाडणें’ केलें आहे अशी सर्व वानरसेनेंत बातमी पसरवावी, असा मंत्र (मसलत) बिभीषणानें रामाला सांगितला. ३. पराभवामुळें. ४. अवमत्य=अपमान करून किंवा दुर्लक्ष्य करून. जो शत्रूचा अनादर करून आपलें रक्षण करीत नाहीं तो निश्चयेंकरून आपणावर अनर्थ आणून घेतो आणि राज्यभ्रष्ट होतो—असें तात्पर्य. बहुतेक असाच श्लोक वा० रामायणांत आहे. [स० ६३ श्लो० २०.] ५. राजपदव्याः. ६. निवर्त्यंते. ७. मंदोदर्या. ८. बिभीषणेन. ‘स्वमतिसदृशमतित्वान्मेऽनुज इत्युक्तम्’ हा श्लोक वा० रामायणांत आहे. [स०६३ श्लो० २१.] ९. ‘आज्ञा गुरूणां ह्यविचारणीया’ इति रघुवंशे कालिदासः. १०. विपरीत. ११. ज्ञानात्. अज्ञानात्. १२. नाङ्गीकृतम्. ह्याच अर्थाचा श्लोक वा० रामायणांत आहे. [स० ८३ श्लो०२४.]

यद्यस्ति स्वाग्र **ज** इति स्नेहः स्वस्मिंश्च विक्रमः ।
[1]यदि कार्यं ममैतत्ते हृदि कार्यतमं मतम्. ॥ १३७
अस्मिन्काले तु **य** द्युक्तं तददिदानीं विचिंत्यताम् ।
मम[2]ापनयजं दुःखं विक्रमेण [3]समीकुरु.' ॥ १३८
रुष्टं राक्षस **रा** जं तं ब्रुवाणं [4]धीरदारुणम् ।
कुंभकर्णः शनैः [5]श्लक्ष्णमुवाच परिसांत्वयन्. ॥ १३९
'शृणु राजन्म **म** वचः संतापेनाल[6]मुत्थितम् ।
रोषं च संपरित्यज्य स्वस्थो भवितुमर्हसि. ॥ १४०
दैन्यं रक्षोरा **ज**! चित्ते मयि जीवति मा कुरु ।
तमहं नाशयिष्यामि यत्कृते परितप्यते. ॥ १४१
राजन्कालेऽत्र **य** द्योग्यं कर्तुं स्निग्धेन बंधुना ।
शत्रूणां [7]कदनं पश्य क्रियमाणं मया रणे.' ॥ १४२
इत्युक्तवंतं [8]**ज** न्यार्थं समुद्युक्तं **द**शाननः ।
[9]भूषणैर्भूषयामास **कुं**भकर्णं महाबलम्. ॥ १४३
कुंभकर्णः प्रि **य** भ्रातुः पादौ नत्वा निपीडितम् ।
तं परिष्वज्य युद्धाय प्रतस्थे [10]शितशूलभृत्. ॥ १४४
पादन्यासैर्ध **रा** मार्तां कुर्वन्नादेन वानरान् ।
कंपयन्निर्गतोऽत्युग्रः पुराद्बहुबलैर्वृतः. ॥ १४५
तस्य देहस्य **म** हतः [11]परीणाहो [12]धनुःशतम् ।
[13]उच्छ्रायः षट्शतधनुःप्रमाणः परिकीर्तितः. ॥ १४६
विलंघयित्वा **श्री** मान्स [14]प्राकारं पर्वतोपमः ।
निर्ययौ नगरात्तूर्णं **कुं**भकर्णो भयंकरः. ॥ १४७
सर्वेऽपि वान **रा** स्त्रस्तास्तमायांतं सुदारुणम् ।
दृष्ट्वा [15]शकटचक्राक्षं सहसा विप्रदुद्रुवुः. ॥ १४८

---

१. 'एतत्कार्यं युद्धानुष्ठानरूपं यदि कार्यतममतिशयेनानुष्ठातुं योग्यं कार्यमिति तव संमतं तदा युद्धं कुर्विति संबंधः.' २. अनीतिपासून उद्भवलेलें. ३. बरोबर करून टाक, माझ्या दुःखापहाराला अनुरूप असें शौर्य प्रकट कर. ४. धीरं च दारुणं च धीरदारुणं यथा तथा. ५. मधुर शब्दांनीं. ६. उत्थितं रोषम्. ७. मर्दनं. [स० ६३ श्लो० ३३.] ८. जन्य=युद्ध. ९. प्राकृतमंत्ररामायण—युद्धकांड—गीति ४६७ पहा. १०. तीक्ष्ण शूलातें धारण करणारा. ११. घेर. १२. शंभर धनुष्यें. धनुष्याची लांबी सुमारें चार हात असते. १३. उंची. [स० ६५ श्लो० ४१.] १४. स० ६६ श्लो० १-१५ पहा. १५. गाड्याच्या चाकायेवढे ज्याचे डोळे आहेत असा.

तानंगदः स[1] **म** रतो विमुखान्यूथपान्कपीन् ।
नीलादीनब्रवी‘द्वीरा महतीयं बि[2]भीषिका.’ ॥ ५४९

ते तारातनु **ज** स्यातिप्रयत्नेन प्लवंगमाः ।
निवृत्ता यु[3]गपज्जघ्नुस्तं शिलाशिखरद्रुमैः. ॥ ५५०

देहे शै[4]लोच्च **य** क्रूरे विशीर्णास्तस्य ते द्रुमाः ।
शिलाश्च शिखराण्यद्रेः शतशः प्रा[5]ज्यतेजसः. ॥ ५५१

ब[6]लीमुखव **रा** स्तेन निहता बहवो रणे ।
रक्तार्द्रा दुद्रुवुस्तेन तीर्णा येन पै[7]थार्णवम्. ॥ ५५२

अंगदस्तान्भ्र[8] **म** च्चित्तान्वानरान्पुनरब्रवीत्, ।
‘अवतिष्ठत यु[9]ध्यामो निवर्तध्वं प्लवंगमाः ! ॥ ५५३

द्रुतानां नैव **ज** गतीपृष्ठे पश्यामि वः स्थलम् ।
दारा ह्यु[10]पहसिष्यंति सोऽधिको जीवतां वधः. ॥ ५५४

रामं दृष्ट्वा नौ[11] **य** मद्य क्रूरो जीवन्गमिष्यति ।
दीप्यमानमिवासाद्य [12]पतंगो [13]जातवेदसम्. ॥ ५५५

द्रवमाणास्तु **ज** वना अंगदेन बलीमुखाः ।
सांत्वनै[14]श्चानुमानैश्च ततः सर्वे निवर्तिताः. ॥ ५५६

[15]अर्यंत आस्था **य** मतिं तस्थुः [16]संग्रामकांक्षिणः ।

---

१. समर+तसिल् पञ्चम्यर्थे. २. ‘बुजावणें.’ गहूं, हरभरा वगैरे धान्यें श्वापदांनीं खाऊं नयेत म्हणून शेतांत मनुष्याकृति प्रतिमा करून ठेवतात, तिला पाहून कांहीं कालपर्यंत श्वापदादि प्राणी भितात, त्या प्रतिमेला बिभीषिका म्हणतात. ३. एकदम सर्वंच प्रहार करूं लागले. ४. पर्वतप्राय कठिण देहावर. ५. महाबलस्य कुंभकर्णस्य. ६. वानरमुख्याः. ‘कपिप्लवंगप्लवगशाखामृगवलीमुखाः । मर्कटो वानरः कीशो वनौकाः’ इत्यमरः. ७. पथा+अर्णवम् असा पदच्छेद. ८. अस्वस्थ चित्त झालेल्या वानरांना. ९. युध्यामहे । ‘युध् यौङ युद्धे’ असें कविकल्पद्रुमांत आहे व कौमुदींत ‘चिण् ते पदः’ या सूत्राखालीं पांचवा धातु युध् दिला आहे, तेथें ‘कथं युध्यतीति युधमिच्छतीति क्यच् । अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यं इति वा’ याप्रमाणें पाक्षिक समाधान भट्टोजी दीक्षित करितात. ही पंक्ति मूळांत आहे. [स. ६६ श्लो० १८.] १०. तुमच्या बायका तुमचा उपहास करतील आणि हा उपहास मृत्यूपेक्षांही तुम्हांला दुःखद होईल. ११. अयम् कुंभकर्णः. १२. शलभः एक सूक्ष्म जीव. १३. तनूनपातं अग्निम्. १४. नागपाशमुक्तिसप्तपातालभेदरूपै र्जयानुमापकैः. १५. अरि+अंत+सप्त. प्र०= अरिनाशाविषयीं. ‘नैष्ठिकीं बुद्धिमास्थाय’ असा वा० रामायणाचा पाठ आहे. निष्ठा नाशस्तत्संबंधिनीम्. १६. युद्धानुज्ञाप्रतीक्षाः.

पर्यवस्थापिताः सूक्तैरंगदेन प्रहर्षिताः. ॥ ९५७

ततस्तान्वान **रा** न्वीरान्भक्षयामास राक्षसः ।
नासापुटाभ्यां कर्णाभ्यां तस्य केचिद्विनिर्गताः. ॥ ९५८

शैलशृंगैस्तं **म** रुतस्ताडयामास नंदनः ।
तमाजघान शूलेन कुंभकर्णो भुजांतरे. ॥ ९५९

भीमं ननाद **श्री** मान्स **मा**रुती रक्षसाहतः ।
रक्षोगणा विनेदुस्तं समीक्ष्य व्यथितं कपिम्. ॥ ९६०

ऋ[1]षभं च ध **रा** यां स शरभं[2] गंधमादनम् ।
नीलं गवाक्षं चरणे पातयामास राक्षसः. ॥ ९६१

तं समारुह्य **म**[3] हिभृत्तुल्यं ते कपयो रुषा ।
ददंशुर्दारयामासुर्नखैर्जघ्नुश्च मुष्टिभिः. ॥ ९६२

यथा सर्पान्द्वि[4] **ज** पतिर्भक्षयन्परिधावति ।
तथैव कुंभकर्णस्तान्कीशानीशा[5]नविक्रमः. ॥ ९६३

तारायास्तन **य** स्तेन मुष्टिना ताडितो हृदि ।
पपात भूमौ संत्यक्तो महसा[6] सहसार्दितः. ॥ ९६४

सुग्रीवो वान **रा** धीशः शैलशृंगेन वक्षसि ।
तमाजघान तद्भिन्नं विशाले तद्भुजांतरे. ॥ ९६५

शूलं चिक्षेप **म** दिरामदांधः स निशाचरः ।
समुत्पत्य गृहीत्वा तद्बभंज **प**वनात्मजः. ॥ ९६६

शृंगमुत्पाट्य **ज** गतीधरस्य **म**लयस्य सः ।
जघान तेन **सु**ग्रीवं पातयामास मूर्च्छितम्. ॥ ९६७

यथा वातस्तो **य** दं तं संप्रगृह्य जहार सः ।
हनूमांश्चिंतयामास किं कार्यमिति बुद्धिमान्[7]. ॥ ९६८

'मोक्षितश्चेन्नि **ज** स्वामी मयाद्य बलशालिना ।
अप्रीतिश्च भवेदस्य कीर्तिनाशश्च शाश्वतः. ॥ ९६९

मूर्छितोऽद्य स्व **यं** मयं मुहूर्ताद्वानरेश्वरः ।

---

१. स० ६७ श्लो० १-१५ पहा. २. वानरसेनेचे अधिपति. [स० ६७ श्लो० २४-३२.] ३. पर्वतसदृशम् । महि किंवा मही असा द्विरूप शब्द आहे. ४. पक्षिराट् गरुडः. ५. ईशानाप्रमाणें (रुद्राप्रमाणें संहार करण्याचे संबंधानें) ज्याचा पराक्रम आहे असा. एथें पदौचित्य सुव्यक्त आहे. ६. तेजसा बलेन. ७. सर्ग ६७ श्लो० ७३-८० पहा.

मोक्षं प्राप्स्यति सेनां स्वां तावदाश्वासयाम्यहम्.॥ ९७०
एवमाजौ प **रा** क्रम्य तमादाय कपीश्वरम् ।
विवेश लंकां विजयी **कुं**भकर्णो महायशाः ॥ ९७१
पूज्यमानः सु **म** नसां [1]गंधोदानां च वृष्टिभिः ।
राजमार्गे गतो हृष्टः **कुं**भकर्णः शनैः शनैः. ॥ ९७२
अथ प्रबुद्धः **श्री** मान्स प्लवगेशो महाबलः ।
दैवगत्या बभूवास्य त[2]द्वर्षं मोह[3]शांतये. ॥ ९७३
प्लवंगमानां **रा** जाशु तस्य कर्णौ नखैः खरैः ।
लुलुंच नासां दशनैः पार्श्वौ च विददार सः. ॥ ९७४
छि[4]न्नकर्णोऽ[5] **म** र्षार्तो हृतनासो विरूपितः ।
[6]आविध्य भूमौ **सु**ग्रीवं **कुं**भकर्णः पिपेष[7] सः. ॥ ९७५
अभिपिष्टोऽलं **ज** गत्यां हन्यमानोऽपि राक्षसैः ।
जगाम खं [8]कंदुकवज्जवेन स हरीश्वरः. ॥ ९७६
प्रगर्जन्प्र[9]ल **य** प्रोद्यन्मेघधीरध्वनिर्द्रुतम् ।
वानराणां [10]सार्वभौमो **राम**पार्श्वं जगाम सः. ॥ ९७७
आयुधं मुद्ग **रा** ख्यं स प्रगृह्य क्रोधनः पुरात् ।
पुनर्विनिर्गतो योद्धुं [11]प्रलयज्वलनप्रभः. ॥ ९७८
खादन्प्लवंग **म** शता[12]न्यंतकप्रतिमो यदा ।
चचार राक्षसो, भीताः शरणं **रा**घवं ययुः. ॥ ९७९
तदा [13]रामानु **ज** स्तस्य चिच्छेद कवचं शरैः ।
निचखाना[14]शुगान्[15]गेहे शतशो वज्रदारुणान्. ॥ ९८०

---

१. गंधद्रव्यांनीं युक्त असलेल्या उदकांच्या. 'उदकस्योदः' ६।३।५७ या सूत्राखालीं दिलेल्या वार्तिकाच्या आधारें 'उद' असा आदेश झाला, उत्तरपादस्य च इति वक्तव्यम्. २. लाजगंधोदवर्ष. [स० ६७ श्लो० ८८ टीका.] ३. मूर्च्छोपगमाला वृष्टि कारण झाली. ४. छिन्नौ कर्णौ यस्य सः. ५. अतिक्रोधाविष्टः. ६. आपटून. ७. रगडता झाला. ८. चेंडूप्रमाणें. ९. प्रलयाचे वेळीं उठलेल्या मेघाप्रमाणें ज्याचा गंभीर ध्वनि आहे असा. १०. वानरांचा चक्रवर्ती. ११. प्रलयकालीन अग्नीप्रमाणें ज्याचें तेज (बल) आहे असा. १२. अंतकतुल्यः. १३. लक्ष्मणः. [स० ६७ श्लो० १००-१२३.] १४. बाणान्. १५. गेहे गः गणेशः (इंद्रियगणस्य ईशः मनः आत्मा वा) ईहः ईप्सितः यत्र इति । किंवा 'गेह' याचे ठिकाणीं 'देहे' असा पाठ ध्यावा.

कुंभकर्णः स **य** न्नाह, 'साधु साधु महाभुज! ।
युध्यता[1] मामभीतेन ख्यापिता वीरता त्वया. ॥ ९८१
वीर! **रामानु** **ज**! रणे तोषितोऽहं त्वया भृशम् ।
नेंद्रोऽपि मेऽग्रतो युद्धे स्थित[2]पूर्वः कदाचन. ॥ ९८२
अंतकस्याप्य **य** त्नेन जेतुर्मेऽतुलतेजसः ।
तिष्ठन्[3]नप्यग्रतः पूज्यः किमु युद्धप्रदायकः. ॥ ९८३
त्वामनु[4]ज्ञाप्य **रा** जेंद्रं गंतुमिच्छामि **ल**क्ष्मण! ।
तमेव हंतुमीहा[5] मे सर्वं तस्मिन्हते हतम्. ॥ ९८४
दृष्टः पराक्र **म** स्तेऽद्य सत्यं त्वय्यद्भुतं बलम्'. ।
'एष **दा**शरथी **राम**स्तिष्ठती'त्यब्रवीत्स तम्. ॥ ९८५
ततः स **रामं** **श्री** मंतमभिदुद्राव राक्षसः ।
कुंभकर्णो महातेजाः कंपयन्नखिलां महीम्. ॥ ९८६
रामः शचीव[6] **रा** रातिं हृदि विव्याध मार्गणैः ।
विद्धस्य हस्तात्तस्योर्व्यां पपातोग्रगदा तदा. ॥ ९८७
रक्षः[7]प्लवंग **म** र्क्षान्स भक्षयामास राक्षसः ।
मत्तो रुधिरगंधेन मद्येन च रुषोद्धतः. ॥ ९८८
राममुद्दिश्य **ज** गतीधरशृंगमरिर्महत् ।
चिक्षेप समरे क्रुद्धः **कुं**भकर्णो महाबलः. ॥ ९८९
कौसल्यातन **य** स्तूर्णं शरैश्चिच्छेद सप्तभिः ।
द्वे शते वानराणां तत्पतमानमपातयत्. ॥ ९९०
तस्मिन्काले न **रा** धीशं **रामं** **सौ**मित्रिरब्रवीत्, ।
'मत्तः शोणितगंधेन स्वान्परांश्चैष खादति. ॥ ९९१
एनं प्रमत्त **म** धुना वानराः शतशः प्रभो! ।
अधिरोहंतु भारार्तो नान्यान्हन्यादयं कपीन्.' ॥ ९९२

१. युध्यमानेन. २. पूर्वं स्थितः. ३. इंद्रादिकांना जिकणाऱ्या मजपुढें न भीतां उभा राहणारा देखील पूज्य होईल; तेव्हां मजबरोबर युद्ध करणारा पूज्य होईल हें सांगायला नकोच. [स० ६७ श्लो० १०६.] ४. निरोप देऊन. ५. स्पृहा. ६. शची हें इंद्राणीचें नांव, तिच्या पतीचा शत्रु जो कुंभकर्ण त्याला. ७. राक्षसांची देखील रांगोळी क्रोधोन्मादामुळें कुंभकर्णानें केली. 'नहि कोपकलुषिता विमृषति मतिः कर्तव्यमकर्तव्यम् वा' इति हर्षचरिते बाणः.

अधिरूढास्त्रि **ज** गतां नाथस्याज्ञानुवर्तिनः ।
व्यधूनयत्तान्वेगेन दुष्टहस्तीव हस्तिपान्[1]. ॥ ५९३

कोदंडमादा **य** तदा तमुवाच रघूत्तमः, ।
'आगच्छ राक्षसश्रेष्ठ! रक्षःकालमवेहि माम्. ॥ ५९४

दशकंठानु **ज** स्तेन तथोक्तः प्रभुणा स्वयम् ।
रामोऽयमिति विज्ञाय जहास विकृतस्वरम्[2]. ॥ ५९५

उवाच च, 'प्र **य** त्नं त्वं कुरु **राम**! मयि ध्रुवम् ।
न विराधः[3] खलो **वाली** **कुं**भकर्णोऽहमागतः. ॥ ५९६

पराक्रमं त्वं **रा** जीवलोचनाजौ प्रदर्शय ।
ततस्त्वां भक्षयिष्यामि दृष्ट्वादौ तव विक्रमम्.' ॥ ५९७

श्रुत्वेतिविक्र[4] **म** स्येत्थं वाक्यं तल्लक्ष्मणाग्रजः ।
कृत्वा युद्धं प्रचिच्छेद बाहुं तस्य समुद्गरम्[5]. ॥ ५९८

भ्रातुः स बाहुः **श्री** दस्य वज्रच्छिन्नाद्रिशृंगवत् ।
पपात, पतता तेन मर्दिता कपिवाहिनी. ॥ ५९९

स्वर्भानुरिव[6] **रा**[7] केशं **राम**ं हंतुं स राक्षसः ।
अभिदुद्राव वामेन करेणोत्पाट्य भूरुहम्[8]. ॥ ६००

सतालं[9] वाम **म** पि तं **राम**श्चिच्छेद तद्भुजम् ।
तेनापि चूर्णिता रक्षःकपिभूरुहपर्वताः. ॥ ६०१

दृष्ट्वा छिन्नभु[10] **ज** द्वंद्वमागच्छंतं जवेन तम् ।
तत्पादावर्धचंद्राभ्यां[11] चिच्छेदाशु **रघू**त्तमः. ॥ ६०२

तस्य पादौ क्ष **य** करावुग्रौ वानररक्षसाम् ।
विनादयंतौ प्रदिशो[12] दिशोऽब्धिं च निपेततुः. ॥ ६०३

यथैव चंद्रं **रा** हुः स व्यादाया[13]स्यं भयंकरम् ।
रामं दुद्राव पादाभ्यां भुजाभ्यां[14] रहितोऽप्यरिः. ॥ ६०४

अपूरयद्धे[15] **म** पुंखैः शरैस्तस्याननं प्रभुः ।

---

१. महातांना. २. खदखदां हांसला. ३. विराध नांवाच्या राक्षसाची कथा वा० रामायण आरण्य० स० २ यांत दिली आहे. ४. अतिशयितो विक्रमो यस्य तस्य. ५. मुद्गरेण सहवर्तमानम्. ६. राहुः. ७. राकापतिं चंद्रम्. ८. भुवि रोहति इति तम् । वृक्षम् (तालम्). ९. तालवृक्षेण सहवर्तमानम्. १०. छिन्नं भुजद्वन्द्वं (भुजद्वयं) यस्य तम्. ११. अर्धचंद्रशरांनीं. १२. विदिशः. १३. वासून. १४. पादाभ्यां भुजाभ्यां च रहितः. १५. हेममयाः पुंखा येषां तैः

शशाक वक्तुं न तदा [1]चुकूज च मुमूर्च्छ च. ॥ ६०५
अथाददे ते[2] **ज** सेद्धं कालकल्पं शरं वरम् ।
[3]वायुवेगं प्रचिक्षेप **कुं**भकर्णाय **रा**घवः. ॥ ६०६
स [4]कृतारिल **य** स्तस्य चकर्त सहसा शिरः ।
प्रयुक्तो **वा**सवेनेव वज्रो **वृ**त्रस्य विद्विषः. ॥ ६०७
देहं तत्तस्य **ज** लधौ [5]छेदवेगोत्थितं शिरः ।
पपात पुरि वेश्मानि प्राकारं चाप्यपातयत्. ॥ ६०८
दृष्ट्वा हतं [6]सं **य** ति तं दृष्ट्वा देवा महर्षयः ।
प्लवगाः पूजयामासुः श्री**रा**मं जयभागिनम्. ॥ ६०९
कुंभकर्णं [7]पं **रा** सुं तं **रा**घवेण कृतं रणे ।
श्रुत्वा शोकाकुलो [8]राजा स मुमोह पपात च. ॥ ६१०
विललाप स **म** र्थोऽपि दैन्यं प्राप्य स **रा**वणः, ।
'हा वीर! बंधो! व्यसने त्यक्त्वा मां त्वं कथं गतः?॥ ६११
त्वया विना मे **श्री** र्नष्टा किं कार्यं [9]**सी**तया तया? ।
राज्येन नास्ति मे कृत्यं जीविते नास्ति मे [10]मंतिः. ६१२
प्राप्तो मया प **रा** नर्थः सुहृद्वाक्यमगृण्हता ।
बिभीषणेन विदुषा यदुक्तं सत्यमेव तत्. ॥ ६१३
शोकदोऽयं म **म** प्राप्तो [11]विपाकस्तस्य कर्मणः ।
यन्मया धार्मिकः श्रीमान्स निरस्तो **बि**भीषणः.'॥ ६१४
एवं [12]बन्ध्वनु **ज** ध्वंसाद्विलपंतं **द**शाननम् ।
तत्सुतस्[13]**त्रि**शिरा वीरः सांत्वयन्नित्युवाच तम्, ॥ ६१५
'[14]दैवाद्धतोऽद्या **य** माजौ मध्यमो नः पिता बली ।
[15]पराङ्मुखो हतः शोच्यो नैव योऽभिमुखो रणे.॥ ६१६

---

१. अव्यक्त ध्वनि करूं लागला. २. तेजसा इद्धम् (प्रज्वलितम्). ३. वायुवेगानें. ४. कृतः अरिलयः (अरिनाशः) येन सः. ५. छेदनाच्या वेगामुळें वर उडालेलें. ६. युद्धे. ७. गतप्राणम्. ८. दशकंठः. ९. सर्ग ६८ श्लो० १०-२१ पहा. १०. इच्छा. ११. कर्मफलपरिणामः. १२. अनुजाच्या मरणामुळें. १३. त्रीणि शिरांसि यस्य सः. १४. हतः अद्य अयम् आजौ. १५. समरांत पाठ दाखवून जर कोणी मेला तर त्याबद्दल वाईट वाटणें रास्त आहे परंतु जो समरांगणांत लढून मरतो त्याबद्दल मुळींच वाईट वाटूं नये.

विलपंति न **रा** जन्ये शूराः सूरातितेजसः[1] ।
त्रैलोक्यस्यापि[2] विजये समर्थस्त्वमसि प्रभो ! ॥ ६१७

स त्वं कस्मात्स **म** र्थोऽपि शोचस्यात्मानमीदृशम् ।
मा प्राकृत इव प्राज्ञ ! शोकं कुरु सुरुग्घरम्[3]. ॥ ६१८

ब्रह्मदत्तास्ति **ज** यिनी शक्तिश्च कवचं धनुः ।
दिव्यः शरः स्यंदनोऽपि सहस्रखरसंयुतः. ॥ ६१९

त्वया शचीप्रि[4] **य** मुखा विशस्ता[5] दैत्यदानवाः ।
त्वं सर्वायुधसंपन्नो **रा**घवं शास्तुमर्हसि. ॥ ६२०

यथेष्टं त्वं रा **ज** वर्य ! तिष्ठाहं भ्रातृभिः सह ।
गमिष्यामि हनिष्यामि रणे **रा**मं सलक्ष्मणम्.' ॥ ६२१

श्रुत्वा स्वतन **य** स्यैवं वाक्यं रात्रिचरेश्वरः ।
पुनर्जातमिवात्मानं मेने कालेन[6] मोहितः. ॥ ६२२

प्रेषितस्त्रिशि **रा** राज्ञा **दे**वांतक**न**रांतकौ ।
अतिकायश्च ते तस्य सर्वे लब्धवराः सुताः. ॥ ६२३

वैमात्रेयौ[8] स **म** र्थौ च भ्रातरौ वरदर्पितौ ।
पुत्रैश्चतुर्भिः सहितौ **म**हापार्श्व**म**होदरौ ॥ ६२४

नरांतकं तु **श्री** मत्तं पित्रा संप्रेषि**तो**ऽगदः[9] ।
मुष्टिनैवावधीदुग्रं कपिसैन्यतृणानलम्[10]. ॥ ६२५

मारुतेः प्रख **रा** न्मुष्टिप्रहाराद्भिन्नमस्तकः ।
देवांतको जहौ प्राणान्यः पुरान्वर्थनामकः[11]. ॥ ६२६

---

१. सूरादपि (सूर्यादपि) अतिशयितं तेजो येषां ते. २. त्रयाणां लोकानां समाहारस्त्रिलोकी, त्रिलोकी एव त्रैलोक्यम्. हें समाहार द्विगूचें उदाहरण. ३. सु (शोभना) रुक् कांतिः ताम् हरति यस्तं शोकम्. ४. इंद्रप्रमुखाः. ५. मारून टाकले. ६. कालानें ज्याला मोह घातला आहे असा रावण. ७. त्रिशिरःप्रभृति रावणाची संतति. ८. विमातुः पुत्रौ. हे रावणाच्या कैकसी नांवाच्या मातेच्या बहिणीचे मुलगे. पुत्रप्राप्तिसाठीं राका, पुष्पोत्कटा, व कुंभीनसी यांनीं देखील विश्रवस् मुनीचाच आश्रय केला होता. [प्राकृत मंत्ररामायण—युद्धकांड गी० ५०६-५११ पृ० १३२ पहा.] ९. सुग्रीवेण. १०. कपिसैन्यमेव तृणं तस्य अनल इव तम्. ह्या एकाच समस्त पदावरून नरांतक कसा वीर होता हें दिसतें. हीच 'प्रमिताक्षरापि विपुलार्थवती' भारती. ११. ज्याचें देवांतक हें नांव पूर्वीं सार्थ होतें तो.

नीलो गृहीत्वा **म** हतो गिरेः शृंगं सपादपम् ।
क्षिप्तेन तेन हतवान्गजारूढं **म**होदरम्. ॥ ६२७

त्रिशिराश्चात्म **ज** स्तस्य **रा**वणस्य महाबलः ।
गृहीत्वा तदसिं[1] तेन निहतो **वा**युसूनुना. ॥ ६२८

महापार्श्वः **सं** **य** दुग्रो[2] भ्राता **लं**कापतेर्रणे ।
ऋषभेण महातेजास्तस्यैव गदया हतः. ॥ ६२९

अतिकायः **सु** **रा** रातिरस्त्रविद्रणदारुणः ।
सौमित्रिणा हतः शूरो ब्रह्मास्त्रेण रणाजिरे[3]. ॥ ६३०

स्वपुत्रभ्रातृ **म** रणं श्रुत्वा शोकपरायणम् ।
दीनं सभायामालोक्य तात**मिं**द्रजिदब्रवीत्, ॥ ६३१

'मयि जीवत्यैं[4] **ज** प्राप्तद्विषद्भंगवरे युधि ।
न तात! मोहं त्वं गंतुमर्हस्यद्य महाभुज! ॥ ६३२

द्विषां **सं**मुद[5] **य** स्याहमंतको हंत कोविद[6]! ।
पश्याद्य **रा**मं मद्बाण[7]भिन्नदेहं सलक्ष्मणम्.' ॥ ६३३

शक्रशत्रु[8]र्नि **ज** प्राज्यतेजो दर्शयितुं रणे ।
जगाम राक्षसानीकैर्वृतो **वृ**त्र इवापरः. ॥ ६३४

ततः स **विज** **य** प्राप्त्यै द्रव्यैर्युद्धभुवि स्थितः ।
जुहाव हुतभोक्तारं[9]मभिचार[10]विधानतः. ॥ ६३५

कृष्णच्छागं **सु** **रा** रातिर्हुत्वा जीवंतमस्त्रवित् ।
पुनर्ब्रह्मास्त्रोपदेशं ब्रह्मणा समकारयत्. ॥ ६३६

---

१. तस्य खड्गम्. २. संयति उग्रः. ३. सर्ग ७१ पहा. ४. अजात् (ब्रह्मणः सकाशात्) प्राप्तः द्विषद्भंगवरः येन तस्मिन्. ब्रह्मदेवापासून ज्याला युद्धांत शत्रुनाशाचा वर मिळाला. आहे तो मी जिवंत असतां. ५. समूहस्य. ६. हे पंडित. ७. मम बाणैर्भिन्नो देहो यस्य तम्. इंद्रजितानें जनकस्वांतांला तेधवां दिला धीर । वीर प्रतापशाली, बोले तो योधमंडलीं हीर. ॥ ५१५ ॥ 'हा शरसंचय माझा, हे महोदंड, हें महाचाप; । ताता! पद्मभवाचा वर असतां, पावलासि कां ताप? ॥ ५१६ ॥ विजय पराजय दोन्ही पर्यायें भेटताति सकळाला; । यालागिं धीर टाकुनि, तूं घ्यावा व्यर्थ शोक न जळाला. ॥ ५१७ ॥' [काव्यसंग्रहग्रंथमाला—मोरोपंतकृत—रामायणें भाग १—मंत्ररामायण—युद्धकांड—गी० ५१५-५१७ पृ० १३२.] ८. इंद्रशत्रुः. ९. हुतभुजम् अग्निम्. १०. मारणविधीच्या मंत्रांनीं व हविर्द्रव्यांनीं. वा० रा० युद्ध० स० ७३ श्लो० २०-३१. अभिचारकर्मांचे मंत्र अथर्ववेदांत आहेत.

स लब्ध्वा ब्राह्म **म** स्त्रज्ञस्तेन स्वधनुरादिकम् ।
युद्धोपकरणं सर्वं स विद्वानभ्यमंत्रयत्. ॥ ६३७

अंतर्हितः स **श्री** दस्य [1]भ्रातृव्यः सर्ववानरान् ।
पातयामास विशिखैः पुन**र्दा**शरथी च तौ. ॥ ६३८

रामोऽब्रवीच्छ **रा** क्रांतं **सौ**मित्रिं 'वत्स! दुःसहम् ।
[2]सहस्वाव्यग्रमनसा ब्रह्मणोऽस्त्रं मया सह.' ॥ ६३९

स तेनास्त्रेण **म** हता सैन्यं **रा**मं सलक्ष्मणम् ।
[3]निषूदयित्वा स्वपुरीं विवेश विजयी मुदा. ॥ ६४०

नीलस्**ता**रात्म **ज** स्तद्वत्सुग्रीवो **जां**बवानपि ।
तस्मिन्काले शरैर्व्याप्ता न किंचित्[4]प्रतिपेदिरे. ॥ ६४१

बिभीषणः सा **य** कार्तान्यूथपानब्रवीत्स तान्, ।
'विषादस्य न कालोऽयं [5]मा भैष्ट कुशली प्रभुः'. ॥ ६४२

मरुत्पुत्रोऽथ **रा** त्रौ तन्मानयित्वास्त्रमुत्थितः ।
तमाह यो यः सप्राणस्तं तमाश्वासयावहे. ॥ ६४३

[6]उल्काहस्तौ स **म** थौ तौ [7]रणशीर्षे विचेरतुः ।
अपश्यतां सप्तषष्टिकोटिकीशोत्तमान्हतान्. ॥ ६४४

युक्तं [8]स्वभाव **ज** रया **जां**बवंतं शरार्दितम् ।
दृष्ट्वा **बि**भीषणोऽपृच्छत्कच्चित्त्वं तात जीवसि?' ॥ ६४५

[9]ब्रह्मणस्तन **य** स्तं स कृच्छ्रादुत्तरमब्रवीत्, ।
'त्वां स्वरेणाभिजानामि न पश्यामि **बि**भीषण! ॥ ६४६

तात! प्राणा**नां** **ज** नेयः कच्चिद्धारयते रणे?' ।
इति श्रुत्वा **जां**बवंतमब्रवीत्स **बि**भीषणः, ॥ ६४७

'आर्य! धर्मन **य** ज्ञस्त्वमतिक्रम्य **र**घूत्तमौ ।
सुग्रीवमं**ग**दं चापि कस्मात्पृच्छसि **मा**रुतिम्? ॥ ६४८

---

१. भ्रातुः (रावणस्य) पुत्रः इंद्रजित्. २. भगवद्ध्यानैकतत्परेण मनसा. मारुतिनें लंकादाह करण्याचे पूर्वीं जसा ब्रह्मास्त्राचा अपमान केला नाहीं त्याप्रमाणें आपणही ब्रह्मास्त्राला मान दिला पाहिजे. ३. मारून. ४. काय करावें हें न जाणते झाले. ५. मागें 'मा' आल्यामुळें 'अभैष्ट' यांतील 'अ' नाहींसा झाला व 'मा भैष्ट' याला लोट् लकाराचा अर्थ आला. 'अभैष्ट' हें 'भी' धातूचें लुङ्लकाराचें द्वि० पु० अनेकव० रूप आहे. ६. उल्का हस्ते ययोस्तौ. हातांत 'ठेंभा' 'दिवटी' घेऊन. ७. रणमूर्धनि. ८. नैसर्गिक वार्द्धक्यानें. ९. जांबवान्.

न तथा वान रा धीशे नांगदे नापि राघवे ।
आर्य ! संदर्शितः स्नेहो यथा वायुसुते परः.' ॥ ६४९
[1]तमब्रवीत्स म तिमान्, 'हतमप्यहतं बलम् ।
अस्मिञ्जीवत्यन्यथा तु जीवंतोऽपि [2]मृता वयम्.'॥ ६५०
ततः स वृद्धं श्री मंतं जांबवंतं महामतिम् ।
पादौ गृहीत्वा शिरसा हनूमानभ्यवादयत्. ॥ ६५१
तमब्रवीच्छ रा तैः स, 'आगच्छ हरिसत्तम ! ।
[3]पर्याप्तविक्रमो नान्यस्त्वं सर्वांस्त्रातुमर्हसि. ॥ ६५२
त्वमेषां पर म स्त्राता सखा सर्वान्प्रहर्षय ।
विशल्यौ कुरु चाप्येतौ सशल्यौ रामलक्ष्मणौ.॥ ६५३
हिमवंतं ह्यां ज नेय! क्षिप्रं गच्छ महाबल ! ।
[4]कैलासर्षभयोर्मध्ये महानोषधिपर्वतः. ॥ ६५४
[5]तत्रत्यामान य क्षिप्रं [6]मृतसंजीवनीं तथा ।
दिव्याः [7]सुवर्णसंधानविशल्यकरणीरपि. ॥ ६५५
गृहीत्वा तास्त्व रा युक्तश्चतस्त्रस्त्वं महौषधीः ।
आगच्छ योजयित्वैतान्प्राणैराश्वासय स्वकान्.' ॥ ६५६
एवमुक्तः स म रुतः पुत्र उत्थाय सत्वरम् ।
त्रिकूटशिखराद्व्योम्नि वेगादापुप्लुवे हरिः. ॥ ६५७
तस्य भारेण ज गतीधरो भग्नो महानपि ।
लंकाभवत्[9]प्रनृत्येव प्रभग्नगृहगोपुरा. ॥ ६५८

---

१. यापरि संशय याला झाला, त्याला करावया दूर । विधिसुत म्हणे, 'नसे भय, कल्याण जरी असेल तो शूर. ॥ ५२९ ॥ जरि एक अंजनीसुत जीवंत असेल तरि समस्तातें । शत्रुसमुद्रीं बुडतां, देइल तो जीवदानहस्तातें. ॥ ५३० ॥ बल अप्रमेय ज्याचें, शौर्योत्साहाद्यनंतगुणशाली, । त्या लीलाकपितनुची स्मृति म्हणउनि येथवां मला झाली. ॥ ५३१ ॥' [मंत्ररामायण—युद्धकांड—गीति ५२९-५३१.] २. सर्ग ७४ श्लो० १७-२२ पहा. ३. सर्वांचे प्राण रक्षण करण्याकरितां ज्याचा पराक्रम समर्थ आहे तो. पर्याप्तो विक्रमो यस्य सः. ४. हिमालयाच्या कैलास आणि ऋषभ या दोन शिखरांमधील पर्वत. ५. त्या स्थळीं असलेल्या ओषधीला. ६. मृतान् संजीवयति इति ताम्. ७. सुवर्णकरणी संधानकरणी विशल्यकरणी. सुवर्णाप्रमाणें देहकांति करणारी, तुटलेल्या अवयवांचें नाडीसंधान करणारी, व शरीरांत शिरलेल्या बाणांला नाहींसें करून व्रण बरे करणारी, ह्या ओषधींना. [स० ७४ श्लो० २६-३४.] ८. 'चतस्त्रः' हें 'चतुर्' शब्दाचें स्त्रीलिंग द्विती० अनेक० रूप. ९. प्रवृत्तनृत्येव.

गत्वा जवेन **य** [1]स्तेन प्रोक्त [2]ओषधिपर्वतः ।
तं योजन[3]सहस्राणि [4]प्रापातीत्य महाकपिः. ॥ ६५९

तदौषध्यस्तु **ज** ग्मुस्ता [5]मंक्ष्वदर्शनमर्थिनम् ।
विज्ञायागतमुच्चैः स क्रोधं चक्रेऽनिलात्मजः. ॥ ६६०

[6]तमुवाचाद **य** स्त्वं यच्छ्रीरामे नग! तन्मम ।
पश्य [7]दोर्बलमित्युक्त्वा शृंगं तस्योन्ममाथ सः. ॥ ६६१

तत्प्रगृह्य ध[9] **रा** ध्रस्य शिखरं [10]नगनागवत् ।
जगाम **लं**कां जवनः पवनस्य सुतो हरिः. ॥ ६६२

रराज तेन **म** रुतः सूनुः शृंगेण [11]खे तथा ।
यथा धृतेन चक्रेण **वि**ष्णुस्तेजस्विना प्रभुः. ॥ ६६३

दृष्ट्वागतं तं **श्री** मंतं विनेदुः कपयो मुदा ।
ननाद सोऽपि महता हर्षेण [12]**क**पिकेसरी. ॥ ६६४

निपपात ध **रा** यां स **त्रि**कूटस्य **म**रुत्सुतः ।
नत्वा हर्युत्तमेभ्योऽथ सस्वजे तं **बि**भीषणम्. ॥ ६६५

महौषधीना [13]**म** मृतं गंधमाघ्राय **रा**घवौ ।
बभूवतुर्विशल्यौ तावुत्तस्थुरितरेऽपि ते. ॥ ६६६

हतरक्षांसि **ज** ल्धौ राक्षसै**रा**वणाज्ञया ।
क्षिप्तानि तेद्य नोत्तस्थुस्तान्यप्योषधिगंधतः. ॥ ६६७

स वायोस्तन **य** स्तूर्णं शृंग[14]मोषधिभूभृतः ।
हिमवंतं निनायाथ पुनः प्रत्याजगाम च. ॥ ६६८

ततस्ते वान **रा** उल्काः समादाय महौजसः ।
सुग्रीवस्याज्ञया पुर्यां संसृजुर्ज्वलनं रुषा. ॥ ६६९

ददाह **लं**का **म** **न**लः कल्पांत इव दुःसहः ।
स्वनो रक्षःस्त्रीजनस्य शुश्रुवे शतयोजनम्. ॥ ६७०

विनिर्गतान्र **ज** न्यां ते राक्षसान्बहिराकुलान् ।
जघ्नुः **प्लु**वंगाः कोपेन शिलाभिः शिखरैर्द्रुमैः. ॥ ६७१

---

१. जांबवंता. २. ओषधिसंपन्नः पर्वतः. मध्यमपदलोपी समासः. ३. सहस्रशब्दोऽनेकोपलक्षणम्. ४. प्राप अतीत्य इति पदच्छेदः. ५. मंक्षु=तत्क्षणीं. ६. निर्दयः. ७. दोस्+बल द्वि० प्र० दोषोः किंवा दोष्णोः बलम्. ८. उत्पाटयामास. ९. महीध्रस्य. १०. वृक्ष व हत्ती यांनीं युक्त असलेलें. ११. आकाशे. १२. कपिसिंहः. (मारुतिः.) १३. न मृतं (मृतिः) यदाघ्राणात् सः अमृतः गंधः तम्. १४. ओषधिपर्वतस्य.

रावणः [1]प्रल **य** क्रुद्धकालकल्पो बलैर्वृतौ ।
कुंभकर्णस्य [2]तनुजौ प्रेषयामास दारुणौ. ॥ ६७२

चक्रतुः सह **ज** न्यं तैर्वानरैस्तुमुलं तदा ।
वीरौ **कुंभनिकुंभौ** तौ **श**क्रशत्रू महाबलौ. ॥ ६७३

कंपनो [3]विज **य** श्लाघी क्रुद्धो युद्धोद्यतस्तदा ।
अंगदं ताडयामास [4]मर्मसूग्रतरैः शरैः. ॥ ६७४

अंगदो भूध **रा** च्छृंगं प्रगृह्य [5]रणकर्कशम् ।
कंपनं सूदयामास **प्र**जंघं चापि मुष्टिना. ॥ ६७५

मैंदो **यू**पाक्ष **म** वधीत्केसरीव महागजम् ।
द्विविदः [6]**शो**णिताक्षं च [7]गरुत्मानिव पन्नगम्. ॥ ६७६

ततः स **कुं**भः **श्री** मांस्तं शरैः सप्तभिरंगदम् ।
विद्ध्वा मर्मणि तेजस्वी पातयामास मूर्च्छितम्. ॥ ६७७

सुग्रीवस्तं दु **रा** धर्षं **कुं**भं निजबलांतकम् ।
युद्धं कृत्वा धनुर्भंक्त्वा प्रसन्नमतिरब्रवीत्. ॥ ६७८

'त्वं **रा**वणस **म** स्तातसमोऽद्भुतपराक्रमः ।
प्रऱ्हादबलि**वृ**त्रघ्न**कु**बेर**व**रुणोपमः.' ॥ ६७९

कुंभकर्णात्म **ज** स्तस्य श्रुत्वा वाक्यं महाबलः ।
बाहुयुद्धं चिरं चक्रे **सु**ग्रीवेण सहाद्भुतम्. ॥ ६८०

सुग्रीवोऽथ ज **य** प्रेप्सुः **कुं**भमुत्क्षिप्य सागरे ।
पातयामास वेगेन तलं तस्य प्रदर्शयन्. ॥ ६८१

उत्पत्य साग **रा** त्**कुं**भः **सु**ग्रीवमतिवेगवान् ।
आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना. ॥ ६८२

वानरेंद्रः स **म** न्युस्तं विशाले वक्षसि स्वयम् ।
मुष्टिनैव प्रहृत्याशु [10]व्यसुं चक्रे रणाजिरे. ॥ ६८३

---

१. प्रलये क्रुद्धः कालः तस्मात् ईषदूनः किंवा ईषदूनः प्रलयक्रुद्धकालः । 'ईषदसमाप्तौ' इत्यादि ५।३।६७. २. कुंभनिकुंभौ. [स० ७४ श्लो० ४६.] ३. विजयाची बढाई मारणारा. ४. नाजुक भागावर. ५. रणदुर्मदम्, रणसाहसिकम्. ६. स० ७६ श्लो० २६-३२ पहा. ७. गरुतौ (पक्षौ) विद्येते अस्य इति गरुत्मान्. ८. लवणोदधेः. ९. स० ७६ श्लो० ८५ हा बहुतेक असाच आहे. १०. विगता असवो यस्मात्तम्, गतप्राणम्.

ततः [1]कुंभानु **ज** न्मापि **नि**कुंभः [2]कालसन्निभः ।
जग्राह परिघं घोरं वज्रादप्यतिदारुणम्. ॥ ९८४

तं दृष्ट्वा [3]संभ **य** स्वांता वानरा राक्षसा अपि ।
[4]न शेकुः स्पंदितुं तस्य **हनूमान**ग्रतः स्थितः. ॥ ९८५

स बली वात **ज** स्योग्रं परिघं भास्करप्रभम् ।
[5]स्थिरे विशाले क्रोधांधः पातयामास वक्षसि. ॥ ९८६

परिघः स वि **य** [6]त्युल्काशतवत्प्रबभौ तदा ।
विकीर्यमाणः शतधा वक्ष आहत्य **मा**रुतेः. ॥ ९८७

मारुतिस्तं **सु** **रा** रातिं ताडयामास मुष्टिना ।
पुस्फोट [7]चर्मवर्मास्य बहु सुस्राव शोणितम्. ॥ ९८८

स निजग्राह **म** रुतः पुत्रं तस्य पिता यथा ।
सुग्रीवं; तं गृहीत्वाथ नादं चक्रे भयंकरम्. ॥ ९८९

वातस्य सूनुः **श्री** मान्स ह्रियमाणोऽपि तं रिपुम् ।
आजघानोरसि बली वज्रकल्पेन मुष्टिना. ॥ ९९०

पातितस्याचि **रा** द्वक्षस्युत्पत्योच्चैर्निपत्य सः ।
उत्पाटयामास शिरो भैरवं नदतो महत्. ॥ ९९१

खरस्य पुत्रो **म** हता बलेन महसान्वितः ।
मकराक्षो ययौ योद्धुं **रा**वणस्याज्ञयोद्धतः. ॥ ९९२

ते तेन भग्ना **ज** लदा वातेनेव प्लवंगमाः ।
संभ्रांतमनसः सर्वे दुद्रुवुर्भयपीडिताः. ॥ ९९३

---

१. कुंभस्य अनुजः निकुंभः. २. कालकल्पः. ३. सभयानि स्वांतानि (अंतःकरणानि) येषां ते. ४. निकुंभाच्या भयामुळें श्वासोच्छ्वास देखील करूं शकले नाहींत. ५. दृढे, कठिने. ६. 'चकमक' झाडली म्हणजे ज्याप्रमाणें ठिणग्या उडतात त्याप्रमाणें मारुतीच्या वज्रकल्प हृदयावर तो परिघ आदळून त्याचीं शकलें झालीं व ठिणग्या उडाल्या, शेंकडों उल्कांप्रमाणें त्या ठिणग्या दिसल्या. ७. 'चर्मवर्म' असें समस्तपद घेतलें तर त्याचा अर्थ कातड्याचें कवच फुटलें असा होईल, किंवा पृथक् पदें आहेत असें मानिलें तर 'ढाल व कवच' असा अर्थ होईल. चर्म=फलक=ढाल, व वर्म=कवच असा अर्थ घ्यावा. प्राचीनकाळीं कातड्यांचा उपयोग वस्त्राप्रमाणें करीत असत व अर्थातच लढाईचे प्रसंगीं कवचाप्रमाणें त्यांचा उपयोग होत असेल. [स० ७७ श्लो० १६ पहा.] ८. निकुंभस्य पिता (कुंभकर्णः) यथा.

तं वानरक्ष **य** करं वाचालं[1] **खर**नंदनम् ।
अग्न्यस्त्रेणावधीद्रुद्रदत्तशूलधरं प्रभुः[2]. ॥ ६९४
पुनर्वज्रध[3] **रा** रातिः क्रुद्धस्य पितुराज्ञया ।
यज्ञभूमौ जुहावाग्निं रणे विजयसिद्धये[4]. ॥ ६९५
स मेघनादो[5] **म** हता ब्रह्मास्त्रेणाभिपालितः ।
जाज्वल्यमानं[6] स्वरथमारुरोह महास्त्रवित्. ॥ ६९६
अंतर्हितो रा **ज** पुत्रौ शरैः श्री**राम**लक्ष्मणौ ।
विव्याध यूथपान्सर्वान्प्लवंगांश्च नभोगतः. ॥ ६९७
राघवावपि **य** त्नेन तिग्मान्[7]मुमुचतुः शरान् ।
निर्भिद्य[8] तं **श**क्रजितं पेतुस्ते शोणिताप्लुताः. ॥ ६९८
तेनातिविद्धौ **ज** नितव्रणदेहौ रणांगणे ।
बभूवतु**र्दा**शरथी पुष्पिताविव किंशुकौ[9]. ॥ ६९९
सुमित्रातन **य** स्तत्र क्रुद्धः श्री**राम**मब्रवीत् ।
'ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम्.' ॥ ७००
'वत्सैकस्याप **रा** धेन न सर्वान्हन्तुमर्हसि'[10] ।
इत्युवाच तदा **राम**ः क्रुद्धो विद्धः खरैः शरैः. ॥ ७०१
'तस्यैवाहं प्र **म** थने यत्नमद्य महाभुज ।
करिष्यामी'ति चोवाच **ल**क्ष्मणं पुण्यलक्ष्मणम्[11]. ॥ ७०२
'दिव्यास्त्रवेत्ता **श्री** मान्मां हनिष्यत्येव सर्वथा' ।
इति ज्ञात्वेंद्रजित्तूर्णं प्रविवेश पुरीं ततः. ॥ ७०३
निकुंभिलां[12] सु **रा** रातिर्गंतुकामो महाखलः ।
स प्रादुर्भावयामास[13] **सी**तां मायामयीं रथे. ॥ ७०४

---

१. बडबड करणारा, अनर्थक पुष्कळ बोलणारा. २. रामः. [स० ७८ श्लो० २-२०.] ३. वज्रपाणिशत्रु, इंद्रजित्. ४. सर्ग ८० श्लो० ५ पहा. ५. 'जातमात्रेण हि पुरा तेन रावणसूनुना । रुदता सुमहान् मुक्तो नादो जलधरोपमः ॥.' वा० रा० उत्तर० स० १२ श्लो० २९-३०. ६. देदीप्यमानम् । 'ज्वल्' धातूचें यङ्लुङन्ताचें रूप. ७. प्रखरान्. ८. इंद्रजिताच्या शरीराचा वेध करून. ९. फुललेल्या पळसाप्रमाणें. १०. 'अयुध्यमानं प्रच्छन्नं प्रांजलिं शरणागतम् । पलायमानं मत्तं वा न च हन्तुं त्वमर्हसि॥.' [स० ८० श्लो० ३९.] ११. शुभलक्षणम्. १२. निकुंभिला हें एक बाह्योपवन होतें व हीच इंद्रजिताची अभिचारकर्मभूमि. १३. प्रकट केली.

निर्गत्य पश्चि **म** द्वाराद्दृष्ट्वा युद्धोद्यतौ प्रभू ।
तद्वारणार्थं तां मायां स प्रादुरकरोदरिः. ॥ ७०५
सत्यां **सीतामां ज** नेयो मन्यमानो हरिद्विषा ।
[१]गृहीतमूर्द्धजां दृष्ट्वा हंतुकामं तमब्रवीत्. ॥ ७०६
'धिक्त्वां दुष्कर्म **य** स्यैतत्किं तवापकृतं खल! ।
साध्वीं **ज**नकजां **सी**तां यदेनां हंसि निर्घृण! ॥ ७०७
सीतां हत्वाप **रा** धी त्वं न जीविष्यसि जातुचित् ।
[२]वैधार्हकर्मणा तेन मम हस्तगतो ह्यसि.' ॥ ७०८
इति ब्रुवाणो **म** रुतस्तनयो हरिभिः सह ।
अभ्यधावत्सुसंक्रुद्धो राक्षसेंद्रसुतं प्रति. ॥ ७०९
स तं [३]क्षुरै[४]र्प्रां **ज** लिक[५]नाराचैः कपिवाहिनीम् ।
न्यवारयत्क्षोभयित्वा **ह**नूमंतमथाब्रवीत्. ॥ ७१०
'न हंतव्याः स्त्रि **य** श्चेति यद्ब्रवीषि प्लवंगम! ।
पीडाकर[६]ममित्राणां यच्च कर्तव्यमेव [७]तत्. ॥ ७११
[८]यन्निमित्तं त्वं **ज** लधिं तीर्त्वा **रा**मः सलक्ष्मणः ।
सुग्रीवश्चांगदश्चेमे कपयश्च समागताः. ॥ ७१२
इमां हत्वा स्व **य** महं त्वां **रा**मं च सलक्ष्मणम् ।
सुग्रीवं च [९]वधिष्यामि तं चानार्यं **बि**भीषणम्. ॥ ७१३
तमेवमुक्त्वा **रा** तिस्तां रुदतीं **जा**नकीं तदा ।
शितधारेण खड्गेण निजघा**नें**द्रजित्स्वयम्. ॥ ७१४
छिन्ना पपात **म** ह्यां सा **रा**मेत्युक्त्वा तपस्विनी ।
ता**मिं**द्रजित्तथा हत्वा ततो **मा**रुतिमब्रवीत्. ॥ ७१५
'मया हतेति **श्री** रेषा प्रिया **रा**मस्य **जा**नकी ।
पश्य वानर सर्वोऽयं निष्फलो वः परिश्रमः.' ॥ ७१६

---

१. गृहीतकेशाम् । गृहीता मूर्द्धजा यस्यास्ताम्. [स० ८१ श्लो० १६-२७.] २. वध करवून घेण्याला योग्य कर्म केल्यामुळें. वधस्य अर्हं वधार्हम् । तद्विधं कर्म तेन. ३. क्षुराच्या (वरूयाच्या) आकाराच्या बाणांनीं. ४. हात जोडून जो एक आकारविशेष होतो त्या प्रकाराच्या बाणांनीं. ५. नारं (नरसमूहम्) आचामति इति नाराचः. ६. शत्रूणाम्. ७. तत् पापमपि. ८. जिच्या निमित्तानें. ९. हनिष्यामि. १०. अतिशयिता श्रीर्यस्या सा.

तच्छ्रुत्वा वान **रा** स्तस्य दुर्मतेर्गर्जितं[1] तथा ।
दृष्ट्वा विशस्तां[2] **सी**तां च दुद्रुवुर्हेतिवादिनः[3]. ॥ ७१७

निवृत्ता हनु **म** द्वाक्यैस्तं पुरस्कृत्य यूथपाः ।
रक्षसां कदनं चक्रुः शिलाशिखरपादपैः. ॥ ७१८

दृष्ट्वा शिला**मां ज** नेयक्षिप्तां वेगेन **रा**वणिः ।
तस्माद्देशादपाक्रामत्सा विवेश [4]दषद्द्रुवम्. ॥ ७१९

निपतंत्या[5] क्ष **य** स्तेषां रक्षसां शिलया कृतः ।
[6]चापो **रा**वणिना दंडः कालेनेव तदा धृतः. ॥ ७२०

जघ्नुः क्रूराः श **रा** स्तस्य बहून्वानरपुंगवान् ।
स **मा**रुतिः प्लवंगाश्च शिलाभिर्भूरुहैः[7] परान्. ॥ ७२१

स **ह**नूमान्प्र **म** थितं रक्षोनीकं[8] निवार्य तत् ।
यूथपानब्रवीत्सर्वा'न्निवर्तध्वं प्लवंगमाः. ॥ ७२२

यन्निमित्तं नि **ज** प्राणांस्त्यक्त्वा युध्याम[9] आकुलाः ।
सा ह**तें**द्रजिता **सी**ता युद्धेन विफलेन किम्? ॥ ७२३

ज्ञात्वादावप्रि **य** मिदं मह**त्सु**ग्रीव**रा**घवौ ।
तौ यत्प्रति[10]विधास्येते तत्करिष्यामहे वयम्.' ॥ ७२४

इति युद्धा**दां ज** नेयं निवृत्तं हरिभिः सह ।
दृष्ट्वेंद्रजिद्धोतु[11]कामो गतश्चैत्यं[12] **नि**कुंभिलाम्. ॥ ७२५

हुतो धनंज[13] **य** स्तेन यज्ञभूमौ विधानतः ।
[14]संध्यागत इवादित्य उत्थितो रक्ततर्पितः. ॥ ७२६

तस्य तेऽनुच **रा** स्तत्र राक्षसाः सुमहाबलाः ।
तस्थुस्तद्रक्षणे यत्ता गृहीतविविधायुधाः. ॥ ७२७

हनूमता प्र **म** थने प्रियाया विनिवेदिते ।
पपात सहसा भूमौ **रा**घवः शोकमूर्च्छितः. ॥ ७२८

---

१. गर्वाचें भाषण. २. कापून टाकलेल्या. ३. हा इति वादिनः=हा हा असा शब्द दुःखानें करणारे. ४. शिला। हलन्त स्त्रीलिंग शब्द. ५. पडणाऱ्या शिलेनें. ६. चाप शब्द पुंनपुंसकलिंग आहे. ७. वृक्षैः. ८. राक्षससेनाम्. ९. युध्यामहे. १०. प्रतिक्रियानुष्ठाने नियोक्ष्येते तत्करिष्यामहे [स० ८२ श्लो० २१ टीका.] ११. होतुमनाः। हवन करण्याची इच्छा धरणारा. १२. निकुंभिला ही अभिचारकर्मभूमि होय. तेथें एक गुप्त विवर (देवालय) होतें त्या स्थलीं. १३. अग्निः. १४. 'रक्षोविपत्सूत्रकः' असा अर्थ 'संध्यागत इवादित्यः' यावरून घेतला.

रामं सुशीतैः **श्री** मंतमसिंचन्वानरा जलैः ।
आश्वासयामास तदा तं परिष्वज्य **ल**क्ष्मणः. ॥ ७२९
[1]**सी**ताशोकप **रा** धीने **रा**मे खिन्ने कपीश्वरे ।
[2]गुल्मान्संस्थाप्य परित आजगाम **बि**भीषणः. ॥ ७३०
स श्रुत्वोवाच **म** तिमान्**रा**घवं शोकपीडितम्, ।
'**रा**म! मायाविना तेन **सी**ता मायामयी हृता. ॥ ७३१
निकुंभिलां वि **ज** यदं यागं कर्तुं गतो ध्रुवम् ।
गच्छामस्तत्र यावन्न तस्य होमः समाप्यते. ॥ ७३२
त्वं स्वस्थहृद **य** स्तिष्ठ **ल**क्ष्मणं प्रेषय द्रुतम् ।
रावणिर्विघ्नितेः[3] यागे ध्रुवं बध्यो भविष्यति ॥ ७३३
[4]तत्त्वं संदिश **रा** जेंद्र! **सौ**मित्रिं कार्यसिद्धये ।
हनिष्यत्येष तं युद्धे ततस्त्वमपि **रा**वणम्.' ॥ ७३४
ततो **रा**मस्त **म** त्यंतप्रियं **ल**क्ष्मणमाशिषा ।
वर्धयित्वाहितं हंतुं प्रेषयामास सत्कृतम्. ॥ ७३५
यूथपैर्वार्तै[5] **ज** मुखैः [6]सर्क्षराज**बि**भीषणः ।
प्रणम्य **रा**मं **सौ**मित्रिर्जगाम बलसंवृतः. ॥ ७३६
कज्जलस्योच्चैं[7] **य** प्रख्यं [8]व्यूहमासाद्य रक्षसाम् ।
तस्थौ [9]ब्रह्मविधानेन विचेतुं **र**घुनंदनः. ॥ ७३७

---

१. सीताविषयक शोकानें अतिव्याकुल झाला असतां. २. प्रधानवानरवीराधिष्ठित कपिसेनेच्या टोळ्या सर्व सैन्यासभोंवतीं रक्षणासाठीं ठेवून. ३. यागाला विघ्न आणलें असतां. [स० ८४ श्लो० ९-२०.] 'हें सारें मायामय, याचें कापट्य जाणतों हो ! मी; । मोहुनि निकुंभिलेला जाउनि, बसला असेल तो होमीं. ॥ ५७२ ॥ होमांतीं दिव्यश्री स्यंदन जन्मेल भव्य कामगम; । मग मर्त्यामर्त्यांला दुर्जय होईल तो महानिगम. ॥ ५७३ ॥ हें पूर्वी चतुराननं वदला, 'हवनीं करील जो विघ्न । रावणपुत्रा! तूझे होतील प्राण जाण तन्निघ्न. ॥ ५७४ ॥ यास्तव परम त्वरित प्रत्यूह करा, तयासि उठवा हो! । वाहोत रक्ततटिनी, सौमित्रे! चाल तूं महाबाहो! ॥ ५७५ ॥' [मंत्ररामायण—पृ० १३८ गी० ५७२-५७५ पहा.] ४. तत् (तस्मात् कारणात्) त्वं. ५. हनूमत्प्रमुखैः सह. ६. ऋक्षराजः (जांबवान्) बिभीषणश्च ताभ्यां सह वर्तमानः. ७. समूहसदृशम्. ८. सैन्यरचनाविशेषम्. ९. इंद्राला सोडविण्याचे वेळीं ब्रह्मदेवानें इंद्रजिताला वर दिला होता कीं, 'शत्रु निर्जय करण्याचे इच्छेनें अग्नीला यथासांग हवनानें तृप्त करशील तर अग्निकुंडांतून अश्वासहित रथ निघेल त्यावर बसून युद्ध करशील तेव्हां अमरत्व येईल.' वा० रा० उत्तर० स० ३० श्लो० १२-१५. यास्तव हवन समाप्त

निशाचरा नि **ज** घ्नुस्ते शस्त्रैरुग्रैः प्लवंगमान् ।
तानृक्षा वानराश्चापि ग्रावभिः[1] शिखरैरगैः[2]. ॥ ७३८
स संप्रहारो[3] **य** त्नेन तेषां वानररक्षसाम् ।
बभूव तुमुलोऽन्योन्यं क्रुद्धानामभिनिघ्नताम्. ॥ ७३९
उत्तस्थौ स[4] दु **रा** धर्षो विषण्णे निहते बले ।
आरुरोह रथं भीममसमाप्तक्रियो रुषा. ॥ ७४०
मारुतिस्तत्र **म** हता पादपेन महाबलः ।
रक्षसां कदनं चक्रे तं जघ्ने **रा**वणिः शरैः ॥ ७४१
बिभीषणेन श्री मान्स भ्राता **रा**मस्य **लक्ष्म**णः ।
जहि **रा**वणिमित्युक्तो दर्शयित्वा रणोद्यतम्. ॥ ७४२
स **रा**वणिर **रा** तेस्तं पितृव्यं[5] पक्षमाश्रितम्[6] ।
गर्हयामास बह्वीभिर्दुर्वृत्तः परुषोक्तिभिः. ॥ ७४३
बिभीषणोऽपि **म** तिमांस्तमुवाचाग्रजात्मजम्, ।
'दीप्तालय[7] इव त्यक्तः पिता ते दोषवान्मया. ॥ ७४४
पापस्त्वं मनु **ज** श्रेष्ठांल्लक्ष्मणान्न विमोक्ष्यसे ।
नेयमस्ति पुरी **लं**का न च त्वं न च ते पिता.॥७४५
मानी दुराश **य** श्चासि बालो विनयवर्जितः ।
बद्धस्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि.' ॥ ७४६
तस्य **सौ**मित्रि **रा** रुह्य स्कंधं सूनोर्नभस्वतः[8] ।
चकार युद्धं तुमुलं तदा **रा**वणिना सह. ॥ ७४७
बिभीषणेन **म** थिता गदया तस्य वाजिनः ।

होण्यापूर्वींच ब्रह्मदेवाच्या वरदानाप्रमाणें अटीप्रमाणें यज्ञविध्वंस करण्याकरितां बिभीषण लक्ष्मणाला घेऊन गेला.

१. ग्रावन् (पाषाण) या शब्दाचें तृतीयानेकवचन. २. अगैः=वृक्षैः. ३. युद्धम्. ४. इंद्रजित्. ५. पितुर्भ्रातरम्. ६. गत्यर्थाकर्मकेत्यादिना कर्तरि क्तः ३।४।७२. शत्रुपक्षाचा अवलंब करून पुतण्याचा द्रोह केल्याबद्दल इंद्रजित् बिभीषणाला जें कांहीं बोलला तें वाचण्यासारखें आहे. ज्या वटवृक्षावरील भूतगणाला बलि देऊन इंद्रजित् अदृश्य होत असे, त्या वृक्षाजवळ लक्ष्मणाला उभा केला त्यामुळें इंद्रजिताला या प्रसंगीं अदृश्य होऊन लढतां आलें नाहीं. वा० रा० युद्ध० स० ८७ श्लो० ३-१७. ७. पेटलेल्या अग्नीप्रमाणें. ८. नभोऽस्त्यस्याश्रयत्वेनेति नभस्वान् (वायुः) तस्य.

तत्सारथेः शिरः कायात्पातयामास लक्ष्मणः. ॥ ७४८

तमाह 'मनु **ज** त्वं न क्षमः स्थातुं ममाग्रतः ।
त्वामहं प्रेषयिष्यामि नचिराद्यमसादनम्.' ॥ ७४९

लक्ष्मणोऽविन[1] **य** क्रौर्यमायाधर्मवशंवदम् ।
उवाच रावणिं, 'युद्धं कुरु त्वं किं विकत्थसे ? ॥ ७५०

मां जेतुं कोऽपि **ज** गति क्षमो नास्ति निशाचर! ।
वाचा व्याहृत्य[2] जानीषे कृतार्थोऽस्मीति दुर्मते ! ॥ ७५१

अंतर्हितेन **य** स्तुच्छ![3] भवताचरितस्तदा ।
तस्कराचरितो मार्गो नैष वीरनिषेवितः. ॥ ७५२

पुरतस्तेऽस्म्य **रा** तेऽहं स्थितो मार्गणगोचरे[4] ।
दर्शयस्वाद्य तत्तेजो वाचा किं त्वं विकत्थसे ?' ॥ ७५३

इत्युक्तः सोऽत्य **म** र्षेण रावणिः समितिंजयः[5] ।
युद्धं चकार तुमुलं तेन सौमित्रिणा सह. ॥ ७५४

भग्ने शताङ्गे[6] **श्री** मान्स लंकां गत्वा नवं रथम् ।
समास्थायाभ्ययात्तूर्णं परैरनुपलक्षितः. ॥ ७५५

रक्षोबलं श **रा** सारैः प्रममर्द बिभीषणः ।
चतुर्भिः सचिवैः सार्धं मारुतिश्च द्रुमोपलैः. ॥ ७५६

शस्त्रैरस्त्रैः स **म** र्थस्तं युद्धं कृत्वा स लक्ष्मणः ।
ऐंद्रास्त्रेण जघानाजाविंद्रशत्रुं महाबलम्. ॥ ७५७

कृते शिरोंबु[7] **ज** च्छेदे रावणेरमराधिपः ।
मुमुदे सह लोकेशैर्नेदुर्दुंदुभयो दिवि. ॥ ७५८[8]

पुष्पवृष्टिर्वि **यं** त्संस्थैः[9] कृता लक्ष्मणमूर्धनि ।
अप्सरा ननृतुर्मुख्या गंधर्वा ललितं[10] जगुः. ॥ ७५९

---

१. अविनयश्च क्रौर्यं च माया च अधर्मश्च ते, तेषां वशंवदं (अधीनम्). २. बोलून. ३. अंतर्हित होऊन लढाई करीत असे म्हणून तुच्छ (क्षुद्र) हें संबोधन योजलें आहे. ४. बाणपथे । बाणाच्या आटोक्यांत. [स० ८८ श्लो० १२-१६.] ५. लढाया मारणारा. ६. रथे । ज्या वेळीं रथाचा भंग झाला त्या वेळीं इंद्रजितानें जिकडे तिकडे अंधार मंत्रबलानें केला व राक्षसवीरांना लढत राहावयाला सांगून आपण लंकेंत जाऊन रथ घेऊन आला. ७. शिरकमलाचा छेद केला असतां. ८. सर्ग ९० श्लो० ७३-७६ पहा. ९. वियति संस्था येषां तैः । आकाशस्थैः. १०. मधुरम्.

[1]दशाननप्रिये युक्ता मुक्ता[2]श्चापादिवेषवः. ॥ ७७२
[3]लब्धलक्षाः सु**रा**णां ये युद्धे [4]कज्जलमेचकाः ।
नरमांसाशनाः क्रूराः शूराः [5]परिघबाहवः. ॥ ७७३
चतुरंगेण **म**हता बलेन परिवारिताः ।
महाबलाः [6]कवचिनः [7]सर्वामरसुदुःसहाः. ॥ ७७४
ते रावणस्यां**ज**लिना प्रहिता [9]अहिता दिवः ।
[10]त्यक्तप्राणा विनिर्गत्य युयुधुर्विविधायुधाः. ॥ ७७५
तानाजावज**य**न्कीशा **दा**शरथ्योश्च मार्गणाः ।
गता **य**मक्षयं सर्वे मत्ताः [11]सत्तापहेतवः. ॥ ७७६
अन्योन्यमेव **ज**घ्नुस्ते **रा**मसादृश्यमोहिताः ।
[12]गांधर्वास्त्रे संप्रयुक्ते राक्षसा विलयं गताः. ॥ ७७७
बाणैः **कौसल्ये य**मुक्तैर्मुहूर्तद्वयतो रणे ।
सप्तकोट्यस्तथैकोनत्रिंशल्लक्षाणि सद्रथाः. ॥ ७७८
हताश्च कुंज**रा** मत्तास्ते सहस्राणि विंशतिः ।
तथा द्वादशलक्षाणि तथैव दशकोटयः. ॥ ७७९
षष्टिस्तुरंग**म**वराः सहस्राण्यथ विंशतिः ।
लक्षाणि ते दशशतकोटिसंख्याः [13]प्रमर्दिताः. ॥ ७८०
पदातयश्च **श्री**शेन निहताः शतकोटयः ।
पंचचत्वारिंशदष्टाशीतिर्लक्षाणि चाहवे. ॥ ७८१
सिद्धर्षयः सु**रा**श्चैव गंधर्वाश्चारणास्तथा ।
साधु साध्विति **रा**मस्य तत्कर्म समपूजयन्. ॥ ७८२

---

१. दशाननाचें प्रिय (इष्ट) करण्याकरितां उद्युक्त असलेले. २. जणूं काय ते धनुष्यापासून बाणच सुटले. ३. लब्धं लक्षं (कीर्तिः) यैस्ते. ४. कज्जलवत् श्यामाः. ५. परिघवत् (अडसराप्रमाणें) सुदृढौ दीर्घौ च बाहू येषां ते. ६. कवचधारिणः. ७. सर्वैः अमरैः सुष्टुदुःसहाः. ८. इतके राक्षसवीर मेले हें पाहून अवशिष्ट वीर कदाचित् आतां समरविमुख होतील अशी रावणाला भीति पडल्यामुळें त्यानें आतां त्याच्या पुढें हात जोडले. ९. स्वर्गाचें (स्वर्गवासि लोकांचें) अहित करणारे. १०. ज्यांनीं आपल्या जीवाची देखील परवा केली नाहीं असे, जीवावर उदार होऊन. ११. सत्+ताप+हेतवः=सत्पुरुषांच्या तापाला कारण झालेले. १२. गांधर्वास्त्र सोडलें असतां. १३. काव्यसंग्रहग्रंथमाला—रामायणें भाग १—मंत्ररामायण—युद्धकांड—गीति ६११-६१६ पृ० १४१ पहा.

उवाच रामो **म** धुरं **सु**ग्रीवादीन्प्रति प्रभुः, ।
'एतदस्त्रबलं भीमं मम[1] वा त्र्यंबकस्य[2] वा.' ॥ ७८३
हत्वा रक्षोरा **ज** सेनां शस्त्रास्त्रेषु जितक्रमः[3] ।
संस्तूयते स्म त्रिदशै[4] **रा**मो हृष्टैर्महर्षभिः. ॥ ७८४
राक्षसानां क्ष **य** स्तेन **रा**वणेन श्रुतो महान् ।
विलापो राक्षसीनां च शोकार्तानां सुदुःसहः. ॥ ७८५
शोकक्रोधप **रा** धीनो **द**शकंठस्ततः स्वयम् ।
नगरान्निर्ययौ हंतुं सबलौ **राम**लक्ष्मणौ. ॥ ७८६
वृतः सैन्येन **म** हता रथारूढो महाबलः ।
महोदर**म**हापार्श्व**वि**रूपाक्षैः समन्वितः. ॥ ७८७
स्यंदनेन प्र[5] **ज** वितप्रवराष्टहयेन सः ।
द्वारेण निर्ययौ तेन यत्र तौ **राम**लक्ष्मणौ. ॥ ७८८
तदो[6]त्पाता भ **य** स्यारात्[7]सूचका बहवोऽभवन् ।
निष्प्रभो[8]ऽर्कः[9] शिवा[10] नेदु[11]श्चस्खलुश्चास्य वाजिनः. ७८९
राजराजानु **ज** मारिं दृष्ट्वायातं प्लवंगमाः ।
विनेदुर्यातु[12]धानाश्च घोरमंभोधरा[13] इव. ॥ ७९०
रावणेन क्ष **य** श्चक्रे कपीनां भूयसां शरैः ।
परैः सोढुं न ये शक्या यैः सुरा विजिताः खरैः. ७९१
सुग्रीवो वान **रा** धीशः प्रतापी पादपायुधः[14] ।
प्रतस्थे[15]ऽभिमुखं सार्द्धं यूथपै**र्द**शकंधरम्. ॥ ७९२
ननर्द युधि **म** न्यूग्रः स्वरेण महता महान् ।
पोथयन्[16]राक्षसाञ्शिष्टान्**द**शग्रीव[17]पुरःसरान्. ॥ ७९३

---

१. मम=रामस्य=विष्णोः. २. त्रीणि अंबकानि यस्य तस्य । त्रिनेत्रस्य शिवस्य. ३. जितश्रमः. ४. देवैः. ५. प्रकृष्टो जवः प्रजवः । सोऽस्त्येषां ते प्रजविताः । अति वेगाचे उत्तम आठ घोडे ज्याला जुंपले आहेत अशा रथांत बसून । प्रजविताः प्रवराः अष्टौ हयाः यस्मिन् युक्ताः तेन. [सर्ग ९५ श्लो० ३२-४२.] ६. तदा उत्पाताः (अशुभानि शकुनानि). ७. आरात्=समीप. ८. निस्तेज. ९. सूर्य. १०. कोल्हे शब्द करूं लागले. ११. घोडे ठोकर खाऊं लागले. १२. राक्षसाः. १३. जलधरा इव. १४. वृक्ष ज्याचें आयुध आहे तो । पादैः (मूलैः) पिबति जलमिति पादपः वृक्षः. १५. संमुख आलेल्या रावणाकडे. १६. मर्दयन्. १७. दशग्रीवः पुरःसरो येषां ते तान्.

रक्षोबलेषु **श्री** मान्स वृष्टिं चक्रे महीभृताम्[1] ।
ममर्द तान्महावातः प्रवृद्धान्नगमानिव[2]. ॥ ७९४
विरूपाक्षं दु[3] **रा** पातं कपिकंपप्रदायुधम्[4] ।
वानरेंद्रो व्यसुं चक्रे तं च वीरं **म**होदरम्. ॥ ७९५
महापार्श्वस्य **म** थनं **वा**लिनस्तनयोऽकरोत् ।
चकार कोपं तद्दृष्ट्वा राक्षसानामधीश्वरः. ॥ ७९६
तामसास्त्रेण[5] **ज**[6] गतो विधात्रा निर्मितेन सः ।
हत्वा विद्राव्य[7] च कपीन्बहून्**रा**ममुपाययौ. ॥ ७९७
सुमित्रातन **य** स्तेन **रा**वणेन सह स्वयम् ।
युयुधे प्रथमं वीरो राहुणेव निशाकरः. ॥ ७९८
ततैः शतैः[8] श **रा** णां तं व्याकुलीकृत्य **ल**क्ष्मणम् ।
व्यसृजच्छरवर्षाणि **रा**ममासाद्य **रा**वणः. ॥ ७९९
भल्लैश्चिच्छेद[9] **म** हतः शरौघांस्तस्य[10] **रा**घवः ।
विव्याध **रा**मं स पुनः शरैर्दर्शितलाघवः[11]. ॥ ८००
रावणे व्यसृ **ज** द्रामः शरवर्षाणि संततम् ।
रामेऽपि **रा**वणो, वीरावुभौ शस्त्रास्त्रपारगौ[12]. ॥ ८०१
अस्त्रप्रयोगं **य** तौ तौ चक्रतुर्युद्धपंडितौ ।
खंडितौ यौ न कुत्रापि समरे जयमंडितौ. ॥ ८०२
लक्ष्मणोऽथ ध्व **ज** च्छेदं शिरच्छेदं च सारथेः ।
ततश्चक्रे धनुच्छेदं सायकैर्जयदायकैः. ॥ ८०३
बिभीषणो ह **य** श्रेष्ठान्भ्रातुर्ज्येष्ठस्य संगरे ।
जघानाप्लुत्य गदया न दयास्त्यतिपापिनि. ॥ ८०४
ततः खरत **रा** माशु क्रोधादशनिसन्निभाम् ।
बिभीषणाय[13] चिक्षेप शक्तिं शक्तिमतां वरः. ॥ ८०५

---

१. पर्वतानाम्. २. वृक्षान् । नगान्. ३. दुःसहः आपातः यस्य तम्. ४. कपिकंपं प्रददाति इति । कपिकंपप्रदमायुधं यस्य तम्. ५. तमोग्रहदेवताकमस्त्रम्. ६. जगत्स्रष्टा यानें, ब्रह्मदेवानें. ७. पळवून. ८. सोडलेल्या शेंकडों शरांनीं । किंवा 'स तैः' असा पाठ घ्यावा. ९. भाल्यांनीं. १०. शर+ओघ+द्वि०प्र०=शरसमूहान्. ११. दर्शितं लाघवं (लघुहस्तता, शरविमोक्षणकुशलता) येन सः. १२. शस्त्रास्त्रेपु पारंगतौ. १३. बिभीषणमुद्दिश्य । 'यमुद्दिश्य क्रिया प्रवर्तते सोऽपि संप्रदानसंज्ञः स्यात्.'

अप्राप्तामेव **म**ध्ये तां लक्ष्मणस्त्रिभिराशुगैः ।
चिच्छेद खेदयन्युद्धे **द**शकंठस्य मानसम्. ॥ ८०६

अन्यां च शक्र[1]**श्री**हर्ता शक्तिं जग्राह दारुणाम् ।
त्रातुं **बि**भीषणं तस्थावग्रतस्तस्य लक्ष्मणः. ॥ ८०७

तमुवाच श**रा**सारैश्छादयंतं स **रा**वणः, ।
'बिभीषणो मोक्षितश्चेत्त्वयीयं विनिपात्यते.' ॥ ८०८

इत्युक्त्वा शक्ति **म**त्युग्रां चिक्षेप [2]मयनिर्मिताम् ।
मोघा भवेति **रा**मोक्ता तद्वक्षसि ममज्ज सा. ॥ ८०९

पपात मोहं **ज**नयन्**रा**मेऽपि भुवि लक्ष्मणः. ।
न विषादस्य कालोऽयमिति संचिंत्य **रा**घवः ॥ ८१०

कौसल्यातन**य**श्चक्रे तुमुलं युद्धमोजसा ।
विचकर्ष ततः शक्तिं तां विकृष्य बभंज च. ॥ ८११

तदा खराः श**रा**स्तस्य शक्तिं निष्कर्षतोऽरिणा ।
बलीयसा **द**शास्येन गात्रे **रा**मस्य पातिताः. ॥ ८१२

अचिंतयित्वा **म**र्मघ्नांस्तानिषूनरिणेरितान् ।
समाश्लिष्यानुजं **रा**मः **सु**ग्रीवादींस्तदाब्रवीत्. ॥ ८१३

परिवार्यैव **ज**न्येऽमुं संतिष्ठध्वं वनौकसः ! ।
[5]यावद्धन्म्यहितं, कालः प्राप्तोऽयं मे [6]चिरेप्सितः. ॥ ८१४

जातोऽक्षिविष[7]**यँ**श्चायं नैव जीवितुमर्हति ।
[8]विनतातनयेनेव दृष्टो दुष्टो भुजंगमः. ॥ ८१५

करिष्यामि त्रि**ज**गति ख्यातं कर्माद्य यत्सुराः ।
नराश्च कथयिष्यंति यावद्भूश्चंद्रभास्करौ.' ॥ ८१६

एवमुक्त्वा सा**य**कौघैराजघान **द**शाननम् ।
स साध्वसात्प्रदुद्राव यथा वातहतोऽम्बुदः. ॥ ८१७

दशग्रीवं प**रा**भूय केसरीव महागजम् ।
ददर्श करुणासिंधुर्लक्ष्मणं मूर्च्छितं भुवि. ॥ ८१८

इंद्राच्या श्रीचें हरण करणारा. २. मयासुरानें आंदण दिलेली. वा० रा० उत्तर० स० ० २१. ३. अगणयित्वा । परवा न करून. ४. अरिणा ईरितान्=शत्रूनें सोडलेल्या. त् हन्मि अहितं (शत्रुम्).६.फार दिवसांपासून ज्याची इच्छा केली होती असा काल. गोः विषयः जातः=दृष्टिपथमागतः. [स० १०० श्लो० ५३-५४.] ८. वैनतेयानें, गरुडानें.

पादार्पितशि[1] **रा** भ्राता **रा**मेणालिंगितो मुदा ।
बिभीषणें**नें**द्रजितो वधस्तस्मै निवेदितः. ॥ ७६०
मूर्ध्न्युपाघ्राय **म** र्माणि [2]व्रणितानि [3]पैराशुगैः ।
पस्पर्श सदयं साश्रु श्री**रा**मो भक्तवत्सलः. ॥ ७६१
अंकमारोप्य **ज** नकः प्रियं पुत्रमिवानुजम् ।
रामोऽब्रवी'दहोरात्रैस्त्रिभिः कृच्छ्राद्धतो रिपुः. ॥ ७६२
निर[4]मित्रोऽहं **य** शस्वी कृतोऽस्म्यद्य त्वया ध्रुवम् ।
[5]त्वया नाथेन दुष्प्रापे **सी**ता भूश्च न **ल**क्ष्मण !'॥ ७६३
इत्युक्त्वा मनु **ज** श्रेष्ठः **सु**षेणं हरिमब्रवीत्, ।
'विशल्यः क्रियतां क्षिप्रं **सौ**मित्रिर्मित्रवत्सल!' ॥ ७६४
एवमुक्तः प्र **य** तेन स [6]पटुर्हरियूथपः ।
लक्ष्मणाय ददौ [7]नस्तः **सु**षेणः परमौषधम्. ॥ ७६५
गंधमाघ्राय **रा** जीवलोचनस्तस्य तत्क्षणम् ।
निर्वेदनो [8]विशल्यश्च समपद्यत **ल**क्ष्मणः. ॥ ७६६
ते च प्लवंग **म** श्रेष्ठाः सामात्यश्च **बि**भीषणः ।
कृता विशल्या मुदिताः **सु**षेणेन महात्मना. ॥ ७६७
रामोऽतिहृष्टः **श्री** दस्य भ्राता शोकाकुलोऽभवत् ।
सीतां हंतुं प्रगृह्यासि**म**शोकवनिकां ययौ. ॥ ७६८
सीता दृष्ट्वा [9]खं **रा** सिं तं भीता सस्मार **रा**घवम् ।
आर्यां शुशोच **कौ**सल्यां **मं**थरां च निनिंद सा. ७६९
सुपार्श्वो नाम **म** तिमानमात्यः शीलवांस्तदा ।
वारयामास तं **सी**तावधात्सूक्तिशतैर्मतैः. ॥ ७७०
ततो ज्येष्ठात्म **ज** स्यातिशोकव्याकुलमानसः ।
राक्षसान्प्रेषयामास हंतुं **दा**शरथी रणे. ॥ ७७१
[10]चलच्छिलोच्च **य** निभा महोत्साहा महौजसः ।

---

१. पादयोरर्पितं शिरो येन सः. २. व्रणाः संजाता एषु तानि. ३. शत्रूच्या बाणांनीं. ४. निर् (नास्ति) अमित्रः (शत्रुः) यस्य सः. ५. 'उपलालनार्थं नाथशब्दप्रयोगः' । किंवा नाथेन=सनाथेन=युक्तेन. ६. कुशलः. ७. नस्+सप्तम्यर्थे तसिल् प्र०=नासिकायाम्. ८. प्ररूढव्रणः । जखमा भरून आल्या. ९. खरः असिः यस्य तम् । तीक्ष्णखड्गम्. [सर्ग ९२ श्लो० ३७-६४.] १०. चलन्तः (जंगमाः) शिलोच्चयाः (पर्वताः) तैः तुल्याः । हें नित्यसमासाचें उदाहरण.

तत: सुषेण **म**[1] गदंकारं रघुवरोऽब्रवीत्, ।
'लक्ष्मणोऽयं यदि मृत:, प्राणैः किं मे प्रयोजनम् ?'॥ ८१९
तदा सुषेणः **श्री** मंतं तं हनूमंतमब्रवीत्, ।
'गच्छ तात! द्रुतं त्वं ता ओ[2]षधीः पुनरानय.' ॥ ८२०
गत्वा शृंगं ध[3] **रा** भृत्तो गृहीत्वा पुनरागतः. ।
सुषेणस्तं प्रशस्याथ गृहीत्वा तां महौषधिम् ॥ ८२१
[4]संक्षोदयित्वा **म** तिमांस्तद्रसं सोऽमृतोपमम् ।
लक्ष्मणाय ददौ न[5]स्तो न[6]स्तो यस्मान्मृ[7]तिव्यथे. ॥ ८२२
विशल्यो विरु **ज** स्तूर्णमुदतिष्ठत्स लक्ष्मणः ।
तमालिंग्याभवद्रामो बाष्पपर्याकुलेक्षणः ॥ ८२३
प्रहृष्टा हर **य** स्तं ते पूजयामासुरुत्थितम् ।
रामरावणयोर्युद्धं प्रवृत्तं पुनरद्भुतम्. ॥ ८२४
भूमौ स्थिरस्य **रा** मस्य रथस्थस्य च रक्षसः ।
न समं युद्धमित्याहुर्देवगंधर्वकिन्नराः. ॥ ८२५
तच्छ्रुत्वा श[8]त **म** न्युः स्वं सखायं सूतमब्रवीत्, ।
'मातले! गच्छ रामं त्वं मद्रथे स्थापयाश्वि'ति.॥ ८२६
शक्राज्ञया प्रां **ज** लिना प्रार्थितस्तेन राघवः ।
आरुह्य स्यंदनं दिव्यं युयुधे सह र[9]क्षसा. ॥ ८२७
गांधर्वमथ **य** दैवमस्त्रं रां[10]क्षसमद्भुतम् ।
प्रयुक्तमरिणा रामः प्रत्यस्त्रेण जघान तत्. ॥ ८२८
स चकार ध्व **ज** च्छेदं मर्दयित्वा प्रभुं शरैः ।
ऐन्द्रानपि जघानाश्वान्विद्धा मर्मसु मातलिम्.॥ ८२९
त्रिदशा ऋष **य** स्त्रस्ता दृष्ट्वार्तं रघुनंदनम् ।
व्यथिता वानरेंद्राश्च बभूवुः सबिभीषणाः. ॥ ८३०
तदा क्रूरत **रा** जाता उत्पाता बहवो रणे ।
जगाम सुमहाक्रोधं राम[11]स्तामरसेक्षणः. ॥ ८३१

---

१. वैद्याला । कारे सत्यागदस्य. ६।३।७०. २. सर्ग १०१ श्लो० २-३२ पहा. ३. धराभृत्+षष्ठ्यर्थे तसिल्. ४. संमर्द्य । चोळून. ५. नासिकायाम् । नस्+सप्तम्यर्थे तसिल्. ६. न भवतः. ७. मृतिश्च व्यथा च. ८. शतक्रतु । इंद्रः. ९. सर्ग १०२ पहा. १०. रक्षः देवता अस्य इति राक्षसम् । या अस्त्रानें बाण सर्प होऊन दंश करूं लागले. ११. कमलदलेक्षणः.

तस्मिन्क्रुद्धे स **म** र्थे भूः प्राकंपत सपर्वता ।
सर्वभूतानि वित्रेसुः क्षुभितः सरितांपतिः[1]. ॥ ८३२
शूलं गृहीत्वा **श्री** दस्य भ्राता परमदारुणम् ।
हतोऽसीति ब्रुवन्**राम**ं प्रति चिक्षेप कोपतः. ॥ ८३३
दग्ध्वात्मनः श[2]रै **रा** न्घोरानापततं महाप्रभम् ।
रामो वासवशक्त्या तं शूलं चिच्छेद भीमया. ॥ ८३४
शरैस्तुरंग **म** श्रेष्ठांस्तस्य विद्धा **र**घूत्तमः ।
निर्बिभेदोरसि क्रूरं ललाटेऽपीषुभिस्त्रिभिः ॥ ८३५
रामोऽपि प्रति **ज** ग्राह शरानुग्रस्य रक्षसः ।
दृष्टः शोणितदिग्धांगः स फुल्ल इव किंशुकः ॥ ८३६
कौसल्यातन **य** स्यास्य छित्वा शस्त्राण्युवाच तम्, ।
'शून्याश्रमात्त्वया चौ[3]र्यचर्यया राक्षसाधम ! ॥ ८३७
भार्या मम ध[4]र्षे **रा** मृष्टा तस्मात्त्वं नासि वीर्यवान् ।
अद्य त्वां सायकैस्तीक्ष्णैर्नयामि **य**मसादनम् ॥ ८३८
गर्वमद्य स **म** स्तं ते संहर्तुं शिरसा सह ।
स्थितोऽस्मि पुरतस्तिष्ठ त्वं पाप! पुरुषो भव.' ॥८३९
एवमुक्त्वा भ्रा[5] **ज** मानैस्ताडयामास तं शरैः ।
कपयश्चाश्मभिर्जघ्नुः स तदा व्याकुलोऽभवत्. ॥ ८४०
सारथिः सुप्रि **य** स्तस्य तदवस्थं निरीक्ष्य तम् ।
शनैर्युद्धादसं[6]भ्रांतः शतांगं स न्यवर्तयत्. ॥ ८४१
स मोह[7]मुक्तो **ज** नितक्रोधो विकृत्य सारथिम् ।
उवाच परुषं प्रा[8]ज्यं का[9]लनष्टमतिर्हि यत्. ॥ ८४२
सूतस्तमाह, '**यं**[10] द्राजन्कश्मलं त्वयि संगरे ।
दृष्टं मया न तत्पूर्वं तेन त्वं[11]मपवाहितः. ॥ ८४३
यद्वक्ष्यस्यद्य **रा** जन्! मां तत्करिष्याम्यसंशयम् ।
नाहं भीतो भे[12]दितो वा स्नेहेनैतत्कृतं मया.' ॥ ८४४

---

१. समुद्रः. २. इंद्रशक्त्या. [सर्ग १०२ श्लो० ६२-६८.] ३. चौरकर्मणा. [स० १०३ श्लो० १०-२२.] ४. धर्षिता. ५. दीप्तैः. ६. न बावरलेला. ७. अपगतमूर्च्छः. ८. पुष्कळ. ९. कालानें नष्ट केली ज्याची मति असा. १०. मूर्च्छा. ११. युद्धभूमीवरून एकीकडे आणला. १२. कोणत्या तरी प्रकाराची लालूच दाखवून परपक्षाकडील मनुष्य स्वपक्षाला अनुकूल करून घेतला म्हणजे त्याला 'भेदित' किंवा 'उपजप्त' म्हणतात.

श्रुत्वेति वाक्यं **म** धुरं प्रसन्नहृदयोऽभवत् ।
दुदौ तस्मै शुभं ह्येकं [1]हस्ताभरणमात्मनः. ॥ ८४५

सूतो रथं तं **श्री** दस्य भ्रातुर्वचनगौरवात् ।
निनाय **र**घुवीरस्य पुरतः [2]प्रेरयन्हरीन्. ॥ ८४६

[3]दशाननप **रा** भूतिचिंतया व्यग्रमानसम् ।
उपागम्याब्रवीद्**राम**मगस्त्यो भगवानृषिः. ॥ ८४७

'भो **राम**भद्र, **म** त्प्रोक्तं शृणु [4]गुह्यं [5]सनातनम् ।
येन सर्वानरीन्वत्स! प्रजेष्यसि रणाजिरे.' ॥ ८४८

स एवमुक्त्वा **ज** यद**मा**[6]दित्यहृदयं ददौ ।
जपित्वा जेष्यस्यद्य त्वं **राव**णं [7]शक्रशात्रवम्. ॥ ८४९

उपदिश्येति **य** शसानुपमोऽथ जगाम सः ।
रामोऽपि जप्त्वा स्तोत्रं तत्परं हर्षमवाप्तवान्. ॥ ८५०

मूर्तिमानर्म **रा** धीशो रविः सुरगणे स्थितः ।
रामं '**द**शाननं हंतुं त्वरस्वे'ति वचोऽब्रवीत्. ॥ ८५१

रामोऽथ शत **म** न्योस्तं सारथिश्रेष्ठमब्रवीत्, ।
'**मा**तले! पश्य संरब्धमापतंतं रथं रिपोः ॥ ८५२

तिष्ठ[9]प्रमादो **ज** न्येऽस्मिन्प्रत्युद्गच्छ रथं रिपोः ।
विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम्. ॥ ८५३

रथं प्रचोद **य** क्षिप्रमि'त्युक्तः स तथाऽकरोत् ।
[10]चक्रसंभूतरजसा **राव**णं [11]संव्यधूनयत्. ॥ ८५४

स चापमैंद्रं **ज** ग्राह शरांश्चा[12]र्ककरप्रभान् ।
युद्धं तयोस्तदारब्धं [13]दृप्तयोरिव सिंहयोः. ॥ ८५५

---

१. कंकणम्. [सर्ग १०४ श्लो० १५-२६.] २. विद्रावयन्. ३. दशाननाचा पराजय कसा होईल या चिंतेनें व्यग्र मानस ज्याचें झालें आहे अशाला. ४. रहस्यम्. [सर्ग १०५ श्लो० २-२७.] ५. सनातनमित्यनेन स्वकल्पितत्वनिरासः. ६. 'य एषोऽन्तरादित्ये हिरण्मयः' इत्याद्यशेषश्रुतिप्रसिद्धं ब्रह्म तद्देवताकत्वात्तदाख्यं स्तोत्रम्. वा० रा० युद्ध० स० १०५. ७. शक्रशत्रुम् । शत्रुरेव शात्रवः, स्वार्थेऽण्. ८. देवदेवः । ब्रह्मविष्णुरुद्राणामपि उपास्यत्वात्. ९. न प्रमादोऽस्येति । सावधानः. १०. चक्रोत्थितधूलिसमूहेन. ११. अकंपयत्. १२. सूर्यकिरणतुल्यान् । अर्कस्य किरणानामिव प्रभा येषां तान्. १३. बलगर्वितयोः मानिनोः । 'अनुहुंकुरुते घनध्वनिं नहि गोमायुरुतानि केसरी' यावरून सिंहाचा मानी स्वभाव सुव्यक्त होतो.

देवाश्च मुन **य** श्चैव वानरा रजनीचराः ।
युद्धं समागता द्रष्टुं विस्मिताश्चित्रवत्स्थिताः ॥ ८९६
तदा बभूव **रा** ज्ञोस्तद्वैरथं[1] परमाद्भुतम् ।
रामरावणयोर्युद्धं[2] रामरावणयोरिव. ॥ ८९७
जेतव्यमिति **मं** र्त्येशो[3] मर्तव्यमिति रावणः ।
धृतौ[4] स्ववीर्यसर्वस्वं[5] युद्धेऽदर्शयतां तदा. ॥ ८९८
रामः शरेण **श्री** मंतं ध्वजं चिच्छेद रक्षसः ।
तेन तन्मनसि क्रोधः प्रजज्वाल सुदुःसहः. ॥ ८९९

---

१. द्वौ रथौ ययोस्तौ द्विरथौ । तयोरिदं द्वैरथम्. रामरावणाचें युद्ध सात अहोरात्र झालें. सातवी रात्र उलटल्यावर (नवव्या दिवशीं) रावणवध आश्विन शुद्ध नवमीस झाला. [सर्ग १०७ श्लोक ६५.] २. हें **'अनन्वय'** नामक अलंकाराचें उदाहरण आहे. जेथें ज्याची त्यालाच उपमा दिली असते म्हणजे जेथें उपमानत्व आणि उपमेयत्व हीं दोन्हीं एकाच वस्तूवर असतात, तेथें हा अलंकार होतो. जसें:—गगन हें गगनासारखें आहे, रामरावण हे रामरावणोपम होत. याचें लक्षण व उदाहरण:—'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः । इंदुरिंदुरिव श्रीमानित्यादौ तदनन्वयः ॥ गगनं गगनाकारं सागरः सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिव ॥.' आणखी प्राकृत उदाहरणें:—(१) झाले बहु, होतिल बहु, आहेतहि बहु, परंतु यासम हा; । यास महादेवा! दे जय, पाहिन कधिं धनंजयास महा ॥ [मोरोपंत—विराटपर्व—अध्याय ४ गीति ७५; काव्यसंग्रह—पृ० ९६], (२) शक्र म्हणे, 'बा! तुजसम तूंचि भला विश्वमहित तरशील, । व्यसनातें बंधूंसह निर्दाळुनि सर्व अहित तरशील. ॥ [मोरोपंत—वनपर्व—अध्याय २ गीति ११४; काव्यसंग्रह—पृष्ठ २७], (३) श्रीरामरावणसमर होय श्रीरामरावणसमरसा । ते वृष्टि जसे न करिति तसि शुचि सशकार रावण समरसा. ॥ [वनपर्व—अध्याय १२ गीति ६६; काव्यसंग्रह—पृष्ठ १७९], (४) होय रामराज्य रामराज्यसेंचि तोखद, व्याधि जो भवाख्य उग्र हें तयासि ओखद । कीं करी प्रकाशुनि स्वसन्महा निरंजन, श्रीशबुद्धिचें हरूनि जन्म हानि रंजन ॥ [पंचचामर रामायण—श्लोक ८१; सर्वसंग्रह—पृष्ठ ४०५], (५) यासम हाचि धनुर्धर म्हणतां उपमन्युसुरतरु रुसेना । रण विसरतिल रिपुचमू जेंवि हरिसमक्ष सुरत रुरुसेना. ॥ [मोरोपंत—कर्णपर्व—अध्याय ४० गीति ५९; सर्वसंग्रह—पृष्ठ १६५.] (६) जनिमृति वारुनि गति दे शबरीतें पूजितांचि ते बरवी । यासम हाचि दयाकर पाहे आणिक जगीं असा न रवी ॥ ५८ ॥ [मोरोपंत—रामायणें भाग २—शिवरामायण द्वितीय—पृ० ९७], (७) बहु असति परंतु म्हणति वाल्मीकिप्रमुख विप्र, 'यासम हा । प्रभुच्या प्रेमें पावे मारुति होऊनि विप्रयास महा.' ॥ २४ ॥ [परंतुरामायण—पृ० १८०], (८) धर्मराज म्हणे, 'देवऋषी! । ज्ञानविज्ञान तपोराशी । तुळितां तुझिया सामर्थ्यासी । तुजसारिखा तूं एक ॥ १ ॥ [मुक्तेश्वर—सभापर्व—अध्याय ५; काव्यसंग्रहग्रंथमाला—पृ० ५०.] ३. मर्त्यानां ईशः । नरेशः. ४. धृतौ=धृत्वा=निश्चयेन, बुद्ध्या. ५. स्ववीर्यरूप सर्व धन.

वृष्टिं चक्रे श **रा** णां स क्रुद्धो युद्धोद्यतः प्रभौ ।
नानाविधायुधानां च गिरीणां भूरुहामपि[१]. ॥ ८६०
तां वृष्टिं पर **म** प्राज्ञो रामश्चिच्छेद सायकैः ।
ततोऽच्छिनत्तस्य शिरः श्रीमज्ज्वलितकुंडलम्[२]. ॥ ८६१
तस्य शीर्षांबु **ज** च्छेदे दृष्टा देवर्षयो भृशम् ।
अन्यत्तेनैव सदृशं **रा**वणस्योत्थितं शिरः. ॥ ८६२
छिन्नं तदपि **य** त्नेन प्रभुणा क्षिप्रकारिणा[३] ।
छिन्नमात्रं[४] च तच्छीर्षं पुनरेव व्यदृश्यत. ॥ ८६३
एवमेव सु **रा** रातेस्तुल्याकारं[५] शिरःशतम्[६] ।
छिन्नं **रा**मेण समरे क्षिप्रहस्तेन[७] मार्गणैः. ॥ ८६४
दशकंठस्य **म** रणमपश्यन्**रा**घवो रणे ।
चिंतयामास बाणानाममोघानां विपर्ययम्[८]. ॥ ८६५
सप्तरात्रमं[९][१०] **ज** स्रं तत्तयोर्युद्धमभून्महत् ।
उवाच मातली **रा**म'मस्त्रं पैतामहं प्रभो! ॥ ८६६
अस्त्रप्रणाशा **य** रिपोर्विसृज त्वं रघूत्तम!' ।
स्मारितः शक्रसूतेन **रा**मो वीरशिरोमणिः. ॥ ८६७
यमगस्त्यो द्वि **ज** श्रेष्ठो ददौ पूर्वं महाशुगम् ।
अभिमंत्र्य तमेवाशु चिक्षेप ब्रह्मनिर्मितम्. ॥ ८६८
स तस्य हृद **य** स्येषुर्भेदं कृत्वा महाद्विषः ।
भुवस्तलं विवेशाथो[११] तूणीरं च विनीतवत्. ॥ ८६९
गतप्राणो ध **रा** यां स राक्षसेंद्रो **द**शाननः ।
पपात पापो वज्रेण हतो **वृ**त्र इवाहितः. ॥ ८७०

---

१. भू+रुह+ष०प्र०=वृक्षाणाम्. २. ज्वलितं (दीप्तिमत्) कुंडलं यस्मिंस्तत्. ३. लघुक्रियेण, लघुहस्तेन. ४. छिन्नमेव । केवलार्थे मात्रच्प्रत्ययः. ५. तुल्य आकारो यस्य तत्. ६. शिरसां शतम् । शंभर शिरें. 'खरविशिखें जगदीशें रामें जें छेदिलें दशास्यशिर, । तें तें झालें प्रकट ब्रह्मवरानें न लावितां उशिर. ॥ दशमूर्धतोयजें तीं, शतवार च्छेदितां नृपें निकरें; । दशमुख पद नमुनि जणों 'पुरे' असा प्रार्थिला शिरोनिकरें. ॥ मग तो रघुराज बळी संहारायासि निर्जरद्वेषी; । ब्रह्मास्त्रें अभिमंत्रुनि अगस्तिदत्ताशुगाप्रति प्रेषी. ॥' [मंत्ररामायण–युद्धकांड–गीति ६९९-७०१ पृ० १४९.] ७. लघुहस्तेन. ८. भेदनसामर्थ्यगुणाचा बदल. ९. सप्तानां रात्रीणां समाहारः सप्तरात्रम् । 'रात्राह्नाहाः' इत्यादि सूत्राखालीं 'संख्यापूर्वं रात्रं क्लीबम्' असें वार्तिकसूत्र आहे. २।४।२९ व २।३।५. १०. सतत. ११. अथो=अथ.

दृष्ट्वा पतित **म** त्यार्ता हतशेषा[1] निशाचराः ।
हतनाथा[2] भयग्रस्ता **लं**कामभ्यपतन्द्रुतम्. ॥ ८७१

निशाचरास्ते **श्री** मद्भिर्नदद्भिर्जितकाशिभिः[3] ।
वानरैर्मर्दिताः क्रुद्धैर्घना इव समीरणैः[4] ॥ ८७२

विजये रघु **रा** जस्य व्यनदद्देवदुंदुभिः ।
दिव्यगंधवहस्[5]तत्र **मा**रुतः सुसुखो[6] ववौ. ॥ ८७३

वृष्टिस्तदा सु **म** नसां दिव्यानां निपपात खात् ।
सुरर्षिभिः कृता पुण्या स्तुती **रा**मस्य शुश्रुवे ॥ ८७४

मरुद्गणाः[7] प्र **ज** ग्मुस्ते शमं स्वर्गायना[8] जगुः ।
अगुः[9] स्वास्थ्यं च लोकेशाः सुप्रभोऽभूत्सहस्रगुः[10]॥ ७९८

रामः प्रातज **य** स्तत्र मुमुदे सकपीश्वरः ।
भ्रातरं निहतं दृष्ट्वा विललाप[11] **बि**भीषणः ॥ ८७६

सांत्वितः स गि **रा** माध्व्या[12] श्री**रा**मेण महात्मना ।
बिभीषणस्तं संस्कर्तुं प्रार्थयामास **रा**घवम्. ॥ ८७७

'शांतिर्वैरस्य[13] **म** रणं, निवृत्तं नः प्रयोजनम् ।
क्रियतामस्य '[14]संस्कारो ममाप्येष[15] यथा तव.' ॥ ८७८

---

१. हताः शेषो येषां ते । मेलेले वजा करून शिल्लक राहिलेले. २. हतो नाथो येषां ते. ३. जितेन (जयेन) प्रकाशंते इति तैः । जयिभिः. ४. वायुभिः. ५. दिव्यं गंधं वहति इति. ६. अतिशय सुखावह. ७. देवगणाः. ८. स्वर्गांतील गान करणारे (गंधर्व) यशाचा पोवाडा गावूं लागले. ९. अ+इण् (गा लुङि)+लुङ् उस्. १०. सहस्रं गावो यस्य सः । सहस्ररश्मिः, 'गोस्त्रियोः' इति ऱ्हस्वः. १।२।४८. ११. रविवंशोत्तम वाक्यें जाउनि तो बंधुतें परेतातें । आलिंगूनि म्हणे, 'हा! केलें सुरकाम त्वां पुरें तातें. ॥ तव हृदय श्रीकंठीं, 'शिवशिव' म्हणशी सदैव तूं वदनें; । म्हणुनि जणो तुज वधिलें, शिवदग्धें अन्यदुःसहें मदनें. ॥ कीं राज्यमदें राजा! शिवासि विसरूनि सेविला काम; । या अन्यायें क्षोभ स्मररिपुचा जाहला महोद्दाम. ॥ वसुधासुरामराशीं केला तूं द्रोह, पीडिला धर्म; । कर्म अमंगळ करितां भूतरिपू कोण पावला शर्म? ॥ पापाचारें निजजन नरवानरहस्तकेंचि मारविला; । मारविलासतमानें गिळिलें तुज राक्षसोत्तमा! रविला.' ॥ [रामायणें भाग १—मंत्ररामायण—युद्धकांड—गीति ७१५-७१९ पृ० १५१]. १२. मधुरया. १३. मरणांतानि वैराणि. १४. और्ध्वदेहिकम्, अंत्येष्टिसंस्कारः. १५. मम अपि स्नेहविषयः. माझाही हा (रावण बंधु) जसा तुझा. [असाच उद्गार मंत्ररामायणांत आहे— 'करणें क्रिया यथोक्त, त्वद्बंधु जसा तसाच हा माझा' इत्यादि पहा. गीति ७१३. तसेंच मूळ रामायणांतही 'ममाप्येष यथा तव' हेच शब्द आहेत. 'मरणांतानि वैराणि निवृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥.' सर्ग १०९ श्लोक २५.]

इत्युवाच त्रि **ज** गतां नाथो **र**घुकुलोत्तमः ।
[1]तमःप्रशमकृन्नामा सर्वभूतेषु यः समः ॥ ८७९
अथ सर्वाः स्त्रि **य** स्तस्य मृतं श्रुत्वा तमीश्वरम् ।
मंदोदरीप्रभृतयो विलापं चक्रुराकुलाः. ॥ ८८०
अंतः पुराद्रा **ज** भार्या विनिष्पेतुः [2]शुचार्दिताः ।
[3]रणपांसुषु चेष्टंत्यो [4]मुक्तकेश्यो [5]हतेश्वराः ॥ ८८१
ददृशुस्ताः प्रि **य** तमं पतितं रणपांसुषु ।
आलिंग्य रुरुदुः सर्वाः सा च **मं**दोदरी भृशम्. ॥ ८८२
[6]'इंद्रियाणि पु **रा** जित्वा जितं त्रिभुवनं त्वया ।
स्मरद्भिरिव तद्वैरमिंद्रियैस्त्वं विनिर्जितः ॥ ८८३
तं चापि काम **म** प्राप्य **मै**थिलीसंगमे कृतम् ।
पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो ! ॥ ८८४
सीता सतीयं **श्री** रेव **रा**मो **वि**ष्णुर्न मानुषः ।
हतोऽस्यतिक्रमान्नीतेर्धर्मस्य त्वं [7]महानपि ॥ ८८५
मैथिली सह **रा** मेण [8]विशोका विहरिष्यति ।
अल्पपुण्या त्वहं घोरे पतिता [9]शोकसागरे.' ॥ ८८६

---

१. तमसः (अज्ञानस्य) प्रशमं (नाशं) करोति इति । तमःप्रशमकृत् इति नाम यस्य सः. २. शोकानें पीडित झालेल्या. ३. रणांतील धुळींत. ४. मुक्ताः केशाः यासां ताः. ५. हत ईश्वरो यासां ताः. ६. 'कामुक होउनि कां मुकता, परमार्थसुखाला देह विका' अशा अर्थाचा उपदेश मंदोदरीसतीनें किति तरी उत्तम प्रकारें केला आहे. ७. येवढा ऐश्वर्यसंपन्न असूनही धर्मनीतीचें उल्लंघन केल्यामुळें नाश पावलास. ८. विगतः शोको यस्याः सा. ९. प्राकृत रामायणांत हें वर्णन कसें आहे तें पहाः—म्हणती, 'कां निजलासि क्षितिवरि ? उठ ये स्वकेलिशयनातें; । सप्रेम एकदां तरि पाहें, उघडोनि रम्यनयनातें.' ॥ ७२३ ॥ हे महिषीमय कन्या राज्ञी मंदोदरी स्वयें आली; । आलिंगुनी तुज देवा ? समजावितसे तुझी प्रिया आली. ॥ तव पदभजनावांचुनि, नेणों आणीक हे तुझी आण । प्राणपते ! हें वदतों, मिथ्या कीं सत्य तें मनीं आण. ॥ अपराध काय झाला? रुसवा केला दयानिधे ! कां जी ? । अमुतप्राशन करवुनि पाजावें काय शेवटीं कांजी ? ॥ सेवक अमरादि तुझे कांचनमय दुर्ग मुदितजनवर्ग; । भर्ग प्रसन्न झाला, अधिक तुला काय भासला स्वर्ग ? ॥ त्याच्या करीं समर्पण करणें, जो पुत्रतुल्य रक्षील; । आम्हांशि शोकहस्तीं दिधलें, हा या क्षणींच भक्षील.' ॥ ऐशा विगत श्री त्या विकलस्वांता द्विषन्निहतकांता । कांता दशाननाच्या करिती तेंव्हां अनेक आकांता. ॥ [मंत्ररामायण—युद्धकांड पृ० १५२.]

इत्यार्ता तस्य **म** हिषीं तामन्याश्च **बि**भीषणः ।
सांत्वयामास बहुधा रुदतीः सुदती[१]: प्रियाः. ॥ ८८७
श्रीकौसल्यात्म **ज** स्तासां सांत्वनाय **बि**भीषणम् ।
रावणस्य च संस्कारं कर्तुमाज्ञापयत्तदा. ॥ ८८८
'नाहं पापाश[२] **य** स्यास्य परदाराभिमर्शिन[३]: ।
कर्तुमिच्छामि संस्कारमि'त्युवाच **बि**भीषणः. ॥ ८८९
'मैवं ब्रूह्यद्य **रा** ज्ञस्त्वं संस्कारं कर्तुमर्हसि ।
मरणांतानि वैराणि ममाप्येष यथा[४] तव.' ॥ ८९०
इत्युक्तः स स **म** र्थेन श्री**रा**मेण **बि**भीषणः ।
विधिवत्तस्य संस्कारं चकार विधिकोविद[५]: ॥ ८९१
सांत्वितास्तेन **ज** ग्मुस्ताः स्त्रियः सर्वाः स्वकान्गृहान्. ।
बिभीषणो **रा**मपार्श्वे संप्रातिष्ठद्[६]विनीतवत् ॥ ८९२
आज्ञां दत्त्वा 'न **य** रथं शक्रपार्श्व[७]मि'ति प्रभुः ।
मातलिं पूजयामास सखायं तं **श**तक्रतोः ॥ ८९३
रामचंद्रोऽनु **ज** मथ प्रोवाच शुभलक्षणम्, ।
'**बि**भीषणमिमं सौम्य ! लंकायाम[८]भिषेचय. ॥ ८९४
कामो मे हृद **य** स्थोऽयं परमो यद्बिभीषणम् ।
पुरेऽभिषिक्तं पश्येयं प्रियं पूर्वोपकारिणम्'. ॥ ८९५
सौमित्रिर्वान **रा** न्दत्वा घटान्हैमान्मनोजवान् ।
व्यादिदेश समुद्रेभ्य[९]: सलीलानयनं द्रुतम्. ॥ ८९६

---

१. शोभना दंता यासां ताः। 'संख्या सुपूर्वस्य'इत्यादि ५।४।१४०-१४१. अर्थसंगतिकरितां हा नवा श्लोक मोरोपंतानें घातला, परंतु असें करण्यामुळें पुढील श्लोकाच्या अर्थांत घोंटाळा होतो. २. पापः आशयः (अभिप्रायः) यस्य तस्य. ३. परदारान् अभिमृशति यस्तस्य। परस्त्रीला स्पर्श करणाऱ्याच्या. ४. श्लोक ८७८ यावरील टीपा पहा. ५. विधानज्ञः. ६. 'समवप्रविभ्यः स्थः.' १।३।२२ या नियमानें आत्मनेपद पाहिजे. किंवा 'प्रातिष्ठत विनीतवत्' असा पाठ कल्पावा. ७. इंद्राकडे. ८. अशोचांत बिभीषणाला राज्याभिषेक कसा केला अशी शंका असल्यास 'उद्यतैराहवे शस्त्रैः क्षत्रधर्मभृतस्य तु। सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिः ॥' हें मनुस्मृतिवाक्य ध्यानांत ठेवावें. याचा भावार्थः—'युद्धांत क्षात्र धर्मानें (पराङ्मुख न होतां) खड्गादिक शस्त्रांपासून जो मृत झाला त्याचा सद्यः (तत्क्षणीं) यज्ञ संपूर्ण होतो म्हणजे त्याला ज्योतिष्टोमादि यज्ञाचें पुण्य प्राप्त होतें, तसेंच अशौचही तत्क्षणीं समाप्त होतें अशी शास्त्रमर्यादा आहे.' [अध्याय ५।९८.] ९. चार समुद्रांपासून. [स० ११२ श्लो० १४.]

जलैः प्लवंग **म** श्रेष्ठैरानीतैस्तं बिभीषणम् ।
अभ्यषिंचत्प्रसन्नात्मा लक्ष्मणः परमासने. ॥ ८९७
अ[1]र्थाद्भुतैक **श्री** रामः प्रभुर्मारुतिमब्रवीत् , ।
'बिभीषणम[2]नुज्ञाप्य कुशलं पृच्छ जानकीम्. ॥ ८९८
वैदेह्या वान **रा** धीशं कुशलं लक्ष्मणं च माम् ।
आचक्ष्व वदतां श्रेष्ठ! रावणं च हतं रणे. ॥ ८९९
प्रियमुक्त्वा स **म** ग्रं त्वं ततस्तस्या हरीश्वर! ।
प्रतिगृह्य च [3]संदेशमुपावर्तितुमर्हसि.' ॥ ९००
इत्युक्तो वायु **ज** स्तेन रामेणाक्लिष्टकर्मणा ।
तां [4]पुष्पवाटिकां गत्वा सीतां नत्वेदमब्रवीत्. ॥ ९०१
'कुशलं [5]त्वाह **य** स्तेऽतिप्रियः श्रीरघुसत्तमः ।
गतं रक्षो लयं देवि! भास्करेणेव तत्तमः. ॥ ९०२
प्रियमाख्यामि **रा** ज्ञि! त्वां [6]भूयोभूयः [7]संभाजये ।
रामस्याद्य प्रमुदिता देवर्षीणां सभा [8]जये. ॥ ९०३
[9]प्रभावात्ते सु **म** हिते रावणो निहतो रणे ।
[10]बिभीषणसहायेन रामेणाद्भुततेजसा. ॥ ९०४
स दक्षिणो भु **ज** स्तस्य रामस्य कुशली सति! ।
लक्ष्मणः सुमहातेजाः सुग्रीवश्च महामतिः. ॥ ९०५
लब्धोऽयं विज **य** [11]स्तेजो रामेण [12]ख्यापितं महत् ।
लंका [13]वशीकृता सीते! स्वस्था भव [14]गतज्वरा.' ॥ ९०६
सीतोवाच [15]नि **ज** स्वांतप्रियं श्रुत्वानिलात्मजम् ।
तूष्णींभूता क्षणं पश्चत्तेन संप्रार्थिता सती. ॥ ९०७ ॥
'[16]वत्साख्यातुः प्रि **य** स्यास्य भवतो हितकारिणः ।

---

१. अद्भुता अत एव अनुपमा श्रीर्यस्य सः. २. आज्ञा घेऊन, कळवून. 'पुराधिपतित्वात् कर्तव्येऽर्थे तदनुज्ञापेक्षणम्.' [स० ११२ श्लो० २२-२५.] ३. प्रतिसंदेशम् । उलट निरोप. ४. पुष्पोद्यानांत, फूलबागेंत. ५. त्वां आह. ६. पुनः पुनः किंवा अतिशयित. ७. प्रीणयामि । आनंदितांतःकरण झालों आहें. ८. रामस्य जये—असा अन्वय. ९. पातिव्रत्यवैभवात्. [स० ११३ श्लो० ७-१३ पहा.] १०. बिभीषणः सहायो यस्य तेन. ११. वीर्यम्, पराक्रमः. १२. गाजविलें. १३. अवशावशा कृता. १४. गतः (नष्टः) ज्वरः (संतापः) यस्याः सा । मनःपीडारहिता नष्टाधिर्वा सती. १५. आपल्या मनांतील आवडती गोष्ट. निजं स्वांतं (मनः) तस्य प्रियं वस्तु. १६. हे वत्स, आख्यातुः सदृशम् (प्रिय कळविणाऱ्याला अनुरूप). [स० ११३ श्लो० १७-२०.]

देयं वस्तु न पश्यामि सदृशं किंचिदप्यहम्.' ॥ ९०८

हनुमानाह **रा** ज्ञीं तां प्रांजलि'देवि! वत्सले! ।

स्निग्ध[1]मेवं[2]विधं वाक्यं त्वमेवार्ह[3]स्यनिंदिते! ॥ ९०९

एतदेव म **म** श्रेयः प्रियं भर्तृहिते रते ।

लब्धं सर्वं मया श्रुत्वा वाक्यमेतत्तवामृतम्. ॥ ९१०

देयो वरोऽद्य **श्री** मत्या मातर्यः प्रार्थ्यते मया ।

श्रोतुमर्हसि तं देवि! विश्व[4]विख्यातसद्व्रते! ॥ ९११

इमास्तु खलु **रा** क्षस्यो यदि त्वमनुमन्यसे ।

हंतुमिच्छामि ताः सर्वा याभिस्त्वं तर्जिता पुरा.' ॥ ९१२

जानक्युवाच, 'म तिमन्! कुर्वतीनां परा[5]ज्ञया ।

विधे[6]यानां च दा[7]सीनां कः कुप्येद्वानरोत्तम!' ॥ ९१३

इत्युक्तो वात **ज** स्तुष्टस्तामुवाच यशस्विनीम्, ।

'युक्ता **रा**मस्य भवती धर्मपत्नी[8] गु[9]णान्विता ॥ ९१४

वैदेहि! हृद **य** स्थं यत्[10]त्वं त[11]त्त्वं म[12]नस्विनि! ।

[13]प्रतिसंदिश मां देवि! गच्छेयं यत्र **रा**घवः.' ॥ ९१५

एवमुक्ता न **रा** धीशसुता **सी**ता हनूमता ।

साब्रवी'दृष्टुमिच्छामि भर्तारं भक्तवत्सलम्.' ॥ ९१६

हनूमान्राम म हिषीमुवाच प्रांजलिस्तदा, ।

'पूर्णचंद्रमुखं **रा**मं द्रक्ष्यस्यद्य सलक्ष्मणम्.' ॥ ९१७

[14]एवमुक्त्वा भ्रा **ज** मानां **सी**तां साक्षादिव श्रियम् ।

आजगाम महातेजा हनूमान्यत्र **रा**घवः. ॥ ९१८

तस्याः सोऽकथ **य** त्सर्वं **रा**घवायोत्तरं वचः ।

स्वयं चोवाच शोकार्तां द्रष्टुमर्हसि तामिति. ॥ ९१९

---

१. प्रेमयुक्तम्, स्नेहयुक्तम्. २. अशक्यप्रीतिदानमित्येवंरूपम्. ३. भाषितुमर्हसि. ४. विश्वे विख्यातं सत् (शोभनं) व्रतं यस्याः तत्संबुद्धौ हे विश्वविख्यातसद्व्रते. ५. दुसऱ्याच्या आज्ञेनें. ६. स्वामीच्या आज्ञेप्रमाणें वागणें ज्यांना आवश्यक आहे अशा दासींवर. [स० १३३ श्लो० ३६-३७.] ७. संबंधविवक्षया षष्ठी । 'क्रुधद्रुह—'इत्यादिना (१।४।३७) षष्ठी एव युक्ता. ८. धर्मस्य पत्नी । अश्वघासादिवत् समासः। 'चतुर्थी तदर्थार्थ—' इत्यादि २।१।३६. तदर्थेन प्रकृतिविकृतिभाव एव. ९. गुणैरन्विता, गुणयुक्ता. १०. यत् तत्त्वं (वस्तु). ११. तत् त्वम् (तूं.) १२. धीरोन्नतचित्ते. १३. परत कांहीं निरोप सांग. १४. हा श्लोक मूळांत बहुतेक असाच आहे. [सर्ग १३ श्लो० ५०.]

एवमुक्तस्त्रि **ज** गतां नाथो धर्म[1]भृतां वरः ।
आगच्छत्सहसा ध्यान[2]मीषद्बा[3]ष्पपरिप्लुतः. ॥ ९२०

'[4]तामुपस्थाप **य** क्षिप्रं **सी**तां स्नातामलंकृताम्' ।
बिभीषणमिति श्रीमानुवाच **र**घुनायकः. ॥ ९२१

आरोप्य प्रव **रा** मार्यां शिबिकां तां **बि**भीषणः. ।
[5]नाययामास सुस्नातां प्रीतां **सी**तां [6]स्वलंकृताम्. ॥ ९२२

तदा प्लवंग **म** क्षांस्तान्वा[7]रितान्वेत्र[8]पाणिभिः ।
दृष्ट्वा, **बि**भीषणं **रा**मो मैवमित्यब्रवीत्क्रुधा. ॥ ९२३

अथाह **रा**मः **श्री** मांस्तां विनीतां पार्श्वमागताम्, ।
'पौ[9]रुषाद्यदनुष्ठेयं मयैतदुपपादितम्. ॥ ९२४

निर्जितासि [10]वं **रा** रोहे! शत्रुं जित्वा रणाजिरे ।
परिश्रमोऽयं वृ[11]त्तार्थं, न त्वदर्थं मया कृतः. ॥ ९२५

[12]प्राप्तसंदेह **म** हिमा मम [13]प्रतिमुखे स्थिता ।

---

१. धार्मिकेषु श्रेष्ठः. २. परगृहीं राहिलेल्या स्त्रीचा स्वीकार निःशंकपणें केल्यानें लोक नांवें ठेवतील व ती निर्दोष असल्यास त्याग केल्यानें महा दोष पदरीं येईल यासंबंधानें रामाला चिंता लागली. चिंतेचें खरें कारण मुख्य सीतालाभ कसा होईल हें होतें. रावणाच्या घरीं छायासीता होती. सीतेनें आपलें खरें रूप अग्नींत ठेवलें होतें हें सीताहरणप्रसंगाच्या श्लोकांच्या टीपेंत मागें सांगितलेंच आहे. ३. किंचित् बाष्पपर्याकुल झालेला. [स० ११४ श्लो० ५-३०.] ४. जवळ आणवा. ५. 'नाययामास' या कल्पित पाठाचे जागीं 'नयामासत' असा पाठ होता तो अशुद्ध आहे. नेवविता झाला. ६. सु+अलंकृताम्. ७. दूरमुत्सारितान्. ८. विभीषणाच्या चोपदारांनीं. सीता आली असें जेव्हां बिभीषणानें रामाला कळविलें तेव्हां रामानें आज्ञा केली कीं, 'वैदेही संनिकर्षे मे क्षिप्रं समभिगच्छतु.' सीता रामाला भेटेल त्या वेळीं तेथें इतक्या मंडळीनें राहूं नये अशी बिभीषणाची समज होऊन त्यानें वानरांना दूर मागें हटविलें हें पाहून रामाला राग आला व बिभीषणाला म्हणाला, 'न गृहाणि न वस्त्राणि न प्राकारस्तिरस्क्रिया (आवरणम्)। नेदृशा राजसत्कारा [जनापसरणादिव्यापाराः] वृत्तमावरणं स्त्रियः ॥ व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे । न क्रतौ नो विवाहे वा दर्शनं दूष्यते स्त्रियः ॥ सैषा विपद्गता चैव कृच्छ्रेण च समन्विता । दर्शने नास्ति दोषोऽस्या मत्समीपे विशेषतः ॥ विसृज्य शिबिकां तस्मात्पद्भ्यामेवापसर्पतु । समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः॥' [सर्ग ११४ श्लो० २७-३०.] ९. शौर्यानें जें करण्यासारखें होतें तें म्यां केलें. [सर्ग ११५ श्लो० ३-२४.] १०. नितंबिनि ! ११. शत्रुकृतस्वदारणामुळें आलेल्या मलीनतेला धुवून वीरता दाखविण्यासाठीं, वीर आहें ही कीर्ति राखण्याकरितां. १२. वा० रामायणांतील 'प्राप्तचारित्रसंदेहा' हा पाठ बरा दिसतो. १३. संमुखे.

दीपो नेत्रा[1]तुरस्येव प्रति[2]कूलासि मे दृ[3]ढा. ॥ ९२६
तद्गच्छ त्वं रा **ज** कन्ये! य[4]थेष्टं विवृ[5]ता दिशः ।
कः क[6]विः पुनरादद्यात्स्त्रियं परगृहोषिताम्? ॥ ९२७
लक्ष्मणे वा[7]त्या **य** ताक्षि! **भ**रते वा नरोत्तमे ।
शत्रुघ्ने वा गुणाढ्ये त्वं कु[8]रु बुद्धिं यथासुखम्. ॥ ९२८
सुप्रिये वा[9]न **रा** धीशे राक्षसे वा **बि**भीषणे ।
निवेशाय मनः **सी**ते! यथा वा[10] सुखमात्मनः. ॥ ९२९
न त्वां **द**शास्यो **म**[11] हिलां दिव्यरूपां बलाद्धृताम् ।
मर्षयेत्सुचिरं **सी**ते! स्वगृहे [12]पर्यवस्थिताम्.' ॥ ९३०
अत्यप्रियं रा **ज** कन्या तदुपश्रुत्य सा प्रियात् ।
रुदती सुदती **सी**ता भर्तारमिदमब्रवीत्. ॥ ९३१
'किमेवं हृद[13] **य** च्छेदि प्रभो! मां श्रोत्र[14]दारुणम् ।
रूक्षं श्रावयसे वाक्यं प्राकृतः प्राकृतामिव? ॥ ९३२
न तथास्मि, नि **ज** स्वांते यथा मामवगच्छसि, ।
प्रत्ययं गच्छ मे, स्वेन चा[15]रित्रेण शपे स्वयम्. ॥ ९३३

---

१. नेत्ररोगिणः. २. अप्रिया. ३. अतिशयेन. 'दृढम्' असा पाठ बरा दिसतो. ४. मर्जी असेल त्याप्रमाणें ५. मोकळ्या. ६. शहाणा. ७. वा अत्यायताक्षि. ८. आमच्या आप्तांपैकीं कोणाजवळ राहून आयुष्याचे दिवस घालीव. जनापवादामुळें सीतेचा स्वीकार राम करीना व व्यभिचारिणी स्त्री असली तरी त्या स्त्रीच्या पतीनें तिला अन्नवस्त्र पुरविलें पाहिजे असा धर्मशास्त्राचा नियम आहे, कारण घटस्फोटाचा प्रकार शास्त्रांत सांगितला नाहीं, यासाठींच रामानें सीतेला आपल्या आप्तांकडे राहावयास सांगितलें. याज्ञवल्क्यस्मृतींत सांगितलेला उपाय 'व्यभिचाराद्दतौ शुद्धिर्गर्भे त्यागो विधीयते' रामाला आवडला नाहीं असें दिसतें. ९. सुग्रीवे. १०. स्वमातृपितृकुले वा. ११. महिला, दिव्यरूपा, इत्यादि पदें, रावणाला पापबुद्धि अवश्य झाली असेल, हें दाखविण्याकरितां योजिलीं आहेत. १२. **पं**तांनीं अन्यत्र वर्णन केलें आहे तें असें:– जनसंग्रहार्थ तो श्रीराम प्रभु कपटमानव सतीस । बोले, 'विलोकितों तुज जरि तूं परमंदिरीं न वसतीस. ॥ रिपु मारुनि सोडविलें कीर्त्यर्थचि तुज, न देवि! भोगाया, । कीं नमुनि ईश्वराला 'यशचि' म्हणति सुजन 'दे विभो! गाया.' ॥ परकरग स्वकलत्र स्पर्शेंचि महायशासि वाहवितें । कोण प्राज्ञ म्हणेल श्वा शिवला ज्या तशा शिवा हवितें? ॥ जा स्वैर, म्हण, स्त्रीच्या सुखदे हो सुप्रसन्न मोकळिके! । जी चुंबिली भुजंगें मधुप म्हणेलचि तिला 'नमो कळिके!' ॥ [काव्यसंग्रहग्रंथमाला–मोरोपंत–वनपर्व–अ० १२ गी० ८५-८८ पृ० १८३.] १३. हृदयं छिनत्ति इति मर्मच्छेदि. १४. कर्णकटु. [सर्ग ११६ श्लो० ४-१६.] १५. पातिव्रत्यलक्षणेन चारित्रेण.

अन्यासामन **य** ज्ञत्वाज्ज्ञातिं त्वं परिशंकसे ।
त्यज शंकां, परस्पर्शे कामकारो न मे प्रभो ! ॥ ९३४
शरीरेऽत्र प **रा** धीने किं करिष्याम्यनीश्वरी ? ।
मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते. ॥ ९३५
निपीडितो म **म** करो न प्रमाणीकृतस्त्वया ।
न मे भक्तिर्न मच्छीलं, सर्वं ते पृष्ठतः कृतम्.'॥ ९३६
सैवं तदोक्त्वा **श्री** मंतं लक्ष्मणं दीनमानसम् ।
उवाच, 'व्यसनस्यास्य भेषजं कुरु मे चिताम्. ॥ ९३७
त्यक्ता देवर! **रा** ज्ञाहमप्रीतेन गुणैर्मम ।
मिथ्यापवादोपहता निवेक्ष्ये हव्यवाहनम्.' ॥ ९३८
प्राप्तो वशामर्ष **म** र्षस्य स विज्ञाय प्रभोर्मतम् ।
चितां चकार **सौ**मित्रिः परवान्भृशदुःखितः. ॥ ९३९
नहि **रामं** ते **ज** सोग्रं तदा कश्चिद्यमोपमम् ।
अनुनेतुमथो वक्तुं द्रष्टुं वाप्यशकत्सुहृत्. ॥ ९४०
अधोमुखं प्रि **य** तमं **रामं** कृत्वा प्रदक्षिणम् ।
बद्धांजलिः सती **सी**ता साब्रवीदग्निसंनिधौ. ॥ ९४१
'यथा मनो मे **रा** जेंद्रान्नापसर्पति **राघवात्** ।
तथा सर्वस्य साक्षी मां सर्वतः पातु पावकः. ॥ ९४२

---

१. सामान्य स्त्रियांची अनयज्ञता पाहून सर्व स्त्रीजातीची शंका आपणांला येते. २. इच्छापूर्वकता. ३. असमर्था. ४. विवाहकालीं केलेलें पाणिग्रहण, किंवा माझी भक्ति, किंवा माझें शील, हें प्रमाण धरलें नाहीं. सीता म्हणते कीं माझें शील, भक्ति, व पाणिग्रहण ह्या गोष्टी माझ्या शुद्धाचाराची पूर्ण साक्ष देतात, त्या आपण प्रमाण धरल्या नाहींत. ५. औषधम्. (आपत्तिरूप रोगापासून मुक्त होण्याकरितां.) ६. मिथ्या+अपवाद+उपहता= लोकांच्या खोट्या निंदेनें नाश पावलेली. ७. प्रवेश करीन. ८. हव्यं वहति इति हुतवहः, अग्निः. ९. क्रोधस्य. १०. परतंत्रः पराधीनः. ११. तेजसा उग्रम्. १२. विनंति करून मन वळविण्याला. १३. अ+शक्+लुङ्त्. १४. या प्रसंगास अनुलक्षून **पंत** म्हणतातः—'जेंवि व्यसनीं त्रिजगन्नाथस्मृतिचा धरी करीश पथ, । ती तेंवि सत्यधर्मस्मरणपरा जानकी करी शपथ. ॥ चुकलें असेल तिळभरि तरि शापावें मला सतीव्रातें. । भुजगीतें कीं तुमच्या भुजभुजगातें शिवेन तीव्रातें. ॥ स्वप्नींहि तुम्हाहुनि परपुरुषीं गेलें असेल हें मन, हो! '। तरि युष्मच्चरणरजःस्पर्शें मद्देहलोह हेम न हो. ॥ मळलें असेल हृदय स्वसतीव्रतनियमलेशभंगोहें । प्रभुजी! तरि मन्मस्तक आतांचि तुम्हांसमक्ष भंगो हें.' ॥ [काव्यसंग्रहग्रंथमाला—मोरोपंत—वनपर्व—अध्याय १२ गीति ९३-९६ पृ० १८४.]

यद्यहं शुद्धि **म** त्यस्मि [१]श्रीमद्रामैकमानसा ।
केशवस्त्रादिकमपि [२]मोधाक्षीन्मम पावकः.' ॥ ९४३

एवमुक्त्वा [३]गै **ज** गतिः परिक्रम्य हुताशनम् ।
सीता विवेश ज्वलनं निःशंकेनांतरात्मना. ॥ ९४४

महान् [४]जनोच्च **य** स्तत्र ददर्शाश्रुसमाकुलः ।
[५]प्रविशंतीं सतीमग्निं दीप्तं सौ[६]दामनीमिव. ॥ ९४५

ददृशुस्तां रा **ज** कन्यां प्रविशंतीं हुताशनम् ।
ऋषयो देवगंधर्वाः पूर्णाहुतिमिवाध्वरे. ॥ ९४६

प्रचुक्रुशुः स्त्रि **य** स्तास्तां दृष्ट्वा दीप्ते चितानले ।
पतंतीं संस्कृतां मंत्रैर्वसो[७]र्धारामिव क्रतौ. ॥ ९४७

रक्षसां वान **रा** णां च 'हाहे'ति विपुलः स्वनः ।
तस्यामग्निं संविशंत्यां संबभूर्वा[८]द्भुतोपमः. ॥ ९४८

ततो **राम**ः [९]का **म** खिन्नः श्रुत्वैवं वदतां गिरः ।
[१०]दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः. ॥ ९४९

शक्रो यमोऽथ **श्री** दश्च **शं**भुर्ब्रह्मा सुरैः सह ।
लंकां विमानैरागत्य तेऽभिजग्मू **र**घूत्तमम्. ॥ ९५०

अब्रुवंस्तं सु **रा** **रा**मं प्रांजलिं पुरतः स्थितम्, ।
'विश्वस्य कर्तास्यात्मानं कथं त्वं नावबुध्यसे? ॥ ९५१

सीता तवेयं **म** हिषी साक्षाच्छ्रीर्जनकात्मजा ।
उपेक्षसे कथं **वि**ष्णो! पतंतीं हव्यवाहने? ॥ ९५२

---

१. श्रीमति रामे एकं (अविभक्तं) मानसं यस्याः सा. २. मा+अदह्+सीत् लुङ= भस्म न करो. [स० ११६ श्लो० २५-२६.] ३. गजस्येव गतिर्यस्याः सा करिगमना, हत्तीप्रमाणें जिचें मंदमंद डुलत चालणें आहे अशी. ४. जनसमूहः. ५. या प्रसंगाचें वर्णन **पं**तांनीं प्राकृतमंत्ररामायणांत फार सुंदर केलें आहे:—'जाणों विरहमयाग्नी क्षितितनयेला असह्य तो जाळी; । तापें ताप हरावा, म्हणउनि अनलीं प्रवेशती झाली. ॥ हेमांबुजिनी श्रीमत्सरस्वतीच्या हृदीं तसी साजे; । ज्वलनाधिदेवता कीं, त्रिलोकपूज्या जगन्निवासा जे. ॥ कीं स्वच्छपद्मरागग्रावविरचितालवाल हेमलता । माणिक्यदर्पणांतस्वःस्त्रीप्रतिबिंब हें म्हणो भलता. ॥ [काव्यसंग्रहग्रंथमाला—रामायणें—भाग १—मंत्ररामायण—युद्धकांड—गीति ७४१-७४३ पृ० १५३.] ६. विद्युल्लतामिव. ७. संततां घृतधाराम्. ८. आश्चर्यमित्युपमाज्ञानं यत्प्रवृत्तौ सः. [स० ११६ श्लो० २७-३४.] ९. कामं (निकाममतिशयेन वा) यथा तथा खिन्नः. १०. किमुक्तं किं कृतं किंचातःपरं कर्तव्यमिति चिंतापरो बभूव. [सर्ग ११७ श्लो० १.]

अस्माभिस्त्वं त्रि **ज** गतां भर्ता हंतुं **द**शाननम् ।
प्रार्थितो मानुषीं योनिं प्रविष्टोऽसि सनातनः. ॥ ९५३

प्र[१]भवश्चाप्य **य** श्च त्वं देवकार्यं कृतं त्वया ।
सर्वे कृतार्थास्त्वद्भक्ताः शरण्यस्त्वं **ज**नार्दन !' ॥ ९५४

गृहीत्वा तां व **रा** रोहां मूर्तिमान् हव्यवाहनः ।
उत्थायाभ्येत्य भगवानित्युवाच **र**घूत्तमम्. ॥ ९५५

'राम ! रामा[२]च्छ **म** नसं **सी**तां शी[३]तांशुजिन्मुखीम् ।
गृहाण त्वमिमां मान्यां मान्यां बुद्धिं कुरु प्रभो !' ॥ ९५६

एवमुक्त्वा रा **ज** मानां सीतां **दा**शरथेः प्रभोः ।
स्थापयामास वामे तामंके [४]पंकेरुहेक्षणाम्. ॥ ९५७

'लोकापवादो **य** शसो नाशकोऽतस्तमागतम् ।
परिमार्ष्टुमिदं दि[५]व्यं मया विज्ञाय कारितम्. ॥ ९५८

इयं विशुद्धा **ज** गति श्रेष्ठा भानोरिव प्रभा, ।
न विहातुं मया शक्या कीर्तिरात्मवता यथा. ॥ ९५९

सु[६]स्निग्धानां सु **य** शसां नाथानां वदतां हितम् ।
अवश्यं च मया कार्यं सर्वेषां वो वचः प्रियम्.' ॥ ९६०

एवमुक्त्वा स **रा** जेंद्रः प्रियां स्वीकृतवान्मुदा. ।
ततः शुभतरं वाक्यं व्याजहार **म**हेश्वरः. ॥ ९६१

'पुं[७]ष्कराक्ष ! स[८] **म** र्थेश ! श्[९]यामतामरसप्रभ ! ।
दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर ! ॥ ९६२

---

१. प्रभवः=सृष्टिः, अप्ययः=प्रलयः । तत्कारणत्वात्तद्व्यपदेशः. २. अच्छं (निर्मलं) मनो यस्यास्ताम्. ३. शीता अंशवो यस्य स शीतांशुश्चंद्रः । तं जयति इति शीतांशुजित् । तद्विधं मुखं यस्यास्ताम्. ४. पंके रोहति इति पंकेरुहं कमलम् । पंकेरुहवत् ईक्षणे यस्यास्ताम्. ५. अति प्राचीनकाळीं कोणावर अपराध केल्याचा दोष आला तर त्या मनुष्याला आपली निर्दोषता ठरविण्याकरितां तापलेल्या लोखंडाला स्पर्श करावा लागत असे किंवा तापलेल्या पाण्यांत हात बुडवावा लागे. दुखापत न झाल्यास त्या मनुष्याला निर्दोष समजत. निर्दोषता सिद्ध करण्याच्या या प्रकाराला 'दिव्य' ही संज्ञा होती. सीतेचें अग्निदिव्य फार भयंकर होतें. याला इंग्रजींत fire ordeal असें म्हणतात. ६. स्नेहवताम्. ७. हे कमलाक्ष. ८. हे समर्थ, हे ईश. ९. 'पुष्कराक्ष' हें संबोधन आहेच. तेव्हां 'श्यामतामरसप्रभ' असें संबुद्धिपद करणें बरें दिसतें. श्यामतामरसस्येव प्रभा यस्य सः.

आश्वास्य दीनं **श्री** मंस्त्वं **भ**रतं भक्तमात्मनः ।
मातॄंश्च राज्यं कृत्वाथ [1]स्वपदं गंतुमर्हसि. ॥ ९६३

विमानेऽयं [2]नें **रा** धीशः पिता **द**शरथस्तव ।
लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय. ॥ ९६४

शक्रस्य लोकं [3]**म** र्त्यैंद्रो गतो मतिमतां वरः ।
सत्पुत्रेण त्वया **राम**! तारितोऽयं गुरुस्तव.' ॥ ९६५

राघवः सानु **ज** श्चक्रे नमनं पितुरात्मनः ।
स चैनमं[4]क आरोप्य परिष्वज्य मुदाब्रवीत्. ॥ ९६६

'**रा**म! प्राणप्रि **य**! स्वर्गः [5]समानोऽपि सुरर्षभैः ।
न मे बहुमतो जातु त्वां विना गुरुवत्सल! ॥ ९६७

कैकेय्या यानि **रा** जीवनेत्र! प्रोक्तानि दुष्टया ।
तानि वाक्यानि शल्यानि स्थितानि हृदये मम. ॥ ९६८

दुःखान्मुक्तोऽद्य **म** हतस्त्वां परिष्वज्य सानुजम् ।
तारितोऽहं त्वया पुत्र! सुपुत्रेण महात्मना.' ॥ ९६९

रामः प्रोवाच **ज** नकं, '**कै**केय्या **भ**रतस्य च ।
प्रसादं कुरु, [6]शापः स सपुत्रां न स्पृशेत्प्रभो!'॥ ९७०

तथेत्युक्त्वा प्रि **य** गुणं **ल**क्ष्मणं तां च **जा**नकीम् ।
समाश्वास्य, विमानेन ययौ स्वर्गं महायशाः. ॥ ९७१

ततो [7]जयंत **ज** नको **रा**मं प्रांजलिरब्रवीत्, ।
'अमोघं दर्शनं **राम**! तवास्माकं **र**घूत्तम! ॥ ९७२

प्रीताः स्मो, ब्रूहि **य** त्प्राज्यं राजेंद्र! मनसेप्सितम्.' ।
तच्छ्रुत्वा **वा**सवं हृष्टो वचनं प्राह **रा**घवः. ॥ ९७३

'मम हेतोः [8]प **रा** क्रांता ये गता **य**मसादनम् ।
ते सर्वे जीवितं प्राप्य समुत्तिष्ठंतु वानराः. ॥ ९७४

अकाले चापि **म** धुराः फलमूलसमृद्धयः ।
नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र [9]वानराः.' ॥ ९७५

---

१. त्रिदिवं ब्रह्मलोकम्. २. पुरःस्थस्यापि देवदेहपरिग्रहेण अज्ञायमानतया अंगुल्या निर्देशः. ३. मर्त्येशः. ४. अंके. ५. सुरर्षभैः समानोऽपि स्वर्गो न बहुमतः इत्यन्वयः. ६. 'तुझा मी पुत्रासह त्याग करतों' असा दशरथानें कैकेयीला दिलेला शाप. [स० ११९ श्लो० २५.] ७. इंद्रः. ८. कृतपराक्रमाः. ९. सर्ग १२० श्लो० २-१० पहा.

र[1]क्षःक्षयाप्त **श्री** रिंद्रः प्रत्युवाच तदा प्रभुम्, ।
'महानयं वरस्तात! त्वयोक्तो **र**घुसत्तम! ॥ ९७६
मम त्वयि प **रा** प्रीतिस्तस्मादेतद्भविष्यति. ।
समुत्तिष्ठंतु सर्वे ते ये हता युधि राक्षसैः.' ॥ ९७७
ततः प्लवंग **म** व्रातास्ते सुप्त्वेव समुत्थिताः ।
बभूवुर्वानरा ऋक्षाः किं न्वेतदिति विस्मिताः. ॥ ९७८
राममापृच्छ्य **ज** ग्मुस्ते स्वर्गं सेंद्रा दिवौकसः. ।
श्री**रा**मं प्रार्थयामास सत्कर्तुं स **बि**भीषणः. ॥ ९७९
त[2]माह **रामो, 'य** दि मां राजन्! सत्कर्तुमिच्छसि ।
हरीन्**सु**ग्रीवमुख्यांस्त्वं सर्वानप्यद्य सत्कुरु. ॥ ९८०
स तु ताम्यति **रा** ज्येऽपि **भ**रतो मत्कृते सदा ।
तं विना मे बहुमतं न स्नानं व[3]स्त्रभूषणम्. ॥ ९८१
एतत्त्वं पश्य **म** तिमन्! यथा क्षिप्रं निजां पुरीम् ।
प्रतिगच्छामि, मार्गोऽयं राजन्! परमदुर्गमः.' ॥ ९८२
दशकंठानु **ज** स्तं स प्रत्युवाच कृतांजलिः, ।
'अन्हा त्वां प्रापयिष्यामि **सा**केतं **पु**ष्पकेण तत्.॥९८३
अ[4]नुग्रहस्ते **य** द्यस्ति सदारः सानुजो वस ।
गृहाण सत्क्रियां मत्तः, सौहृदं तव चेन्मयि.' ॥ ९८४
तत्**कौ**सल्यात्म **ज** स्तस्य श्रुत्वा वाक्यं ततोऽब्रवीत्, ।
'सा[5]चिव्येन तथा प्रेम्णा पूजितोऽहं भृशं त्वया. ॥९८५
भरतं तु प्रि **य** सखं द्रष्टुं मे त्वरते मनः ।
शिरसा याचतो यस्य न कृतं वचनं मया. ॥ ९८६
कौसल्यां च प **रा** मातां **सु**मित्रां **के**कयात्मजाम् ।
गुहं च सुहृदं पौरान्द्रष्टुं मेऽत्युत्सुकं मनः. ॥ ९८७
अनुजानीहि **म** तिमन्! मामहं सत्कृतस्त्वया ।
उपस्थापय मे शीघ्रं विमानं रा[6]क्षसेश्वर!' ॥ ९८८
स तं[7]द्विमानं **श्री** दस्य कामगं **रा**वणाहृतम् ।

---

१. रक्षसां क्षयस्तेन आप्ता श्रीयेंन सः. २. या प्रसंगाचें वर्णन फार मनोहर आहे. मंत्ररामायण—युद्धकांड—गी० ७६३-७६६ पहा. ३. सर्ग १२१ पहा. ४. प्रसादः, कृपा. ५. मंत्रसाहाय्येन. ६. सर्ग १२१ श्लो० १७-२२ पहा. ७. या विमानाचें वर्णन पहा. (स० १२१ श्लो० २३-२९.)

स्थापयामास सेवायां सुरतः[1] पुरतः प्रभोः. ॥ ९८९

ससैन्यं वान **रा** धीशं संपूज्य परया मुदा, ।
'साकेतं मां नये'त्याह रामं भक्तो बिभीषणः.॥ ९९०

सोऽपि प्लवंग **म** पतिः सुग्रीवो मंत्रिभिः सह ।
तथैव प्रार्थयामास प्रभुं प्राज्यदयं[2] स्वयम्. ॥ ९९१

तद्विमानं भ्रा **ज** मानं राजराजस्य[3] राघवः ।
ताभ्यां सह समारुह्य राजभ्यां कपिरक्षसाम्. ॥ ९९२

त्रिकूटात्तं प्रि **य** तमामंके कृत्वा सलक्ष्मणः ।
प्रतस्थे सुमहातेजा लंकालंकारजित्पुरम्[4]. ॥ ९९३

कैलासशिख **रा** कारे त्रिकूटशिखरे स्थिताम् ।
लंकां युद्धधरां[5] रामो दर्शयन्नाह जानकीम्. ॥ ९९४

'प्रिये! पश्य त्व **म** स्याद्रेस्त्रिकूटस्य शिरोगताम्[6] ।
सुरैर्दुरासदां लंकां निर्मितां विश्वकर्मणा. ॥ ९९५

इयं युद्धस्य **ज** गती, त्वत्कृते[7]ऽत्र सह प्रियैः ।
सचिवैर्भ्रातृभिः पुत्रैः सीते! दशमुखो हतः. ॥ ९९६

रावणस्य स्त्रि **य** स्तत्र मंदोदर्या सह प्रिये! ।
विविधं भूरिकरुणं तं मृतं पर्यदेवयन्. ॥ ९९७

सेतुर्नलेन **ज** लधावेष देव्याज्ञया मम ।
तव हेतोर्विशालाक्षि! बद्धः पश्य सुदुष्करः. ॥ ९९८

पश्य सीते!ऽत्या **य** ताक्षि! दुस्तरं वरुणालयम् ।
जंतवो यत्र पतितं नयंत्यकरुणालयम्[8]. ॥ ९९९

इतस्त्वं रुचि[9] **रा** पांगे! मैनाकं पश्य पर्वतम् ।
विश्रामार्थं हनुमतो भित्त्वा सागरमुत्थितम्. ॥ १०००

उत्तरं तीर **म** स्याब्धेरेतद्देवि! मनोरमम् ।

---

१. अति अनुरक्त असलेला. २. प्राज्या (प्रचुरा) दया यस्य तम्. ३. यक्षाधिपस्य. राज्ञां (यक्षाणां) राजा (प्रभुः)=कुबेरस्तस्य. ४. लंकेला अलंकाराप्रमाणें शोभविणारा (रावण) त्याला जिंकणारा. लंका+अलंकार+जि+त्+क्विप्. ५. युद्धभूमिम्. ६. शिखरे स्थिताम्. ७. तुझ्याकरितां. ८. न करुणा अस्त्यस्य इति अकरुणो यमः, तस्यालयम्. ९. हे सुंदरनेत्रप्रांताच्या स्त्रिये.

अत्र[1] पूर्वं[2] महादेवः प्रसादमकरोद्विभुः[3]. ॥ १००१

इदं तु तीर्थं **श्री** मद्यत्तीर्थमन्यत्ततोऽधिकम् ।
से[4]तुबंध इति ख्यातं भव्यं[5] कव्यंचितं[6] हितम्[7]. ॥ १००२

अत्र राक्षस **रा** जोऽयं देव्यागच्छद्विभीषणः, ।
सुग्रीवस्य पुरी चैषा[8] किष्किंधा वालिपालिता.' ॥ १००३

सीतोवाच, 'म **म** स्त्रीभिः सुग्रीवस्य महात्मनः ।
ताराप्रभृतिभिर्गंतु सार्ध[9]मिच्छा पुरीं प्रभो !' ॥ १००४

एवमस्त्वित्य[10] **ज** कुलश्रेष्ठः प्रेष्ठ[11]ः सतां प्रियाम् ।
उक्त्वोवाच तथा कर्तुं सुग्रीवं वानरेश्वरम्. ॥ १००५

स सुग्रीवः प्रि **य** तमां स्वयं तारां[12] तथाब्रवीत् ।
तयाहूताः प्लवंगानां सर्वा भार्याः[13] स्वलंकृताः. ॥ १००६

ताभिः सह त्व **रा** युक्ता पुष्पकं सारुरोह[14] तत् ।
सीता तया कपींद्रस्य योषिता तोषिताभवत्[15]. ॥ १००७

ततो रघूत्त **म** स्तत्र पुष्पके द्रुतगामिनि ।
वैदेहीमित्युवाचायमृ[16]ष्यमूकः स भूधरः. ॥ १००८

---

१. सेतुमूले. २. सेतुबंधनात् पूर्वम्. ३. मत्स्थापितत्वेन अत्र. स्थितोऽभूत् । सेतोर्निर्विघ्नतासिद्ध्यै समुद्रप्रसादानंतरं शिवस्थापनं रामेण कृतमिति गम्यते. (स० १२३ श्लो० २०.) ४. अत्र स्थले महात्मनः सागरस्य तीर्थं सेतुनिर्माणमूलप्रदेशत्वात् सेतुबंध इति ख्यातं भविष्यति. ५. भावि, होईल. ६. पंडितैः पूजितम्. ७. दर्शनात् सर्वपापविशोधनम्. ८. सुग्रीवाची मुख्य नगरी किष्किंधा. येथेंच रामानें वालीला मारिलें. किष्किंधा जेथें होती तेथें हल्लीं अनागोंदी शहर आहे. हें तुंगभद्रेच्या कांठीं आहे. ९. सह. १०. अजाच्या कुलांतील श्रेष्ठ पुरुष. ११. अतिप्रिय. १२. सुषेणाची कन्या, वालीची पत्नी. वालीच्या मरणानंतर ही सुग्रीवाची स्त्री झाली. सुग्रीवाच्या पहिल्या स्त्रीचें नांव रुमा. १३. सर्ग १२३ श्लो० ३४-३७ पहा. १४. 'सा समारुहत्' हा अपपाठ आहे, यास्तव 'सारुरोह तत्' असा पाठ कल्पिला आहे. १५. तोषः संजातोऽस्या इति. १६. या प्रसंगाचें वर्णन फारच हृदयद्रावक आहे:—कांतेसि म्हणे राघव, 'हा दिसतो ऋष्यमूकनाम नग; । तेथें मजला तूझे सुग्रीवें अर्पिले स्वकीय नग. ॥ ७८२ ॥ वाल्यनुजाचें मस्तक, येथें राज्याभिषेकनीरानें; । मेघें गिरिशिखर तसें, भिजवीलें या तुझ्याचि दीरानें ॥ ७८३ ॥ हे पंपा पुण्यजला, येथें तुजला स्मरोनि मी रडलों; । सौमित्र्यंकावरता, मुहूर्तपर्यंत कश्मलें पडलों. ॥ ७८४ ॥ निशिचरनायक येथें आला होऊनि दंभसंन्यासी; । तुज नेउनि मज दिधलें दुःख, जनीं जें असह्य अन्यासी. ॥ ७८५ ॥ ज्या स्थानीं रुचिराक्षी ! तूंचि उभी हें मनांत माजा ये; । आलिंगिले लताद्रुम, विद्रुमबिंबप्रभा-

यत्राहं वारि **ज** स्पर्धिमुखि! प्रियतमे! सति! ।
अनेन राज्ञा कीशानां सुग्रीवेण समागतः. ॥ १००९
त्वया विहीनो **य** त्राहं विलापपरमोऽभवम् ।
एषा सा दृश्यते पंपा शंपाकंपावहप्रभे! ॥ १०१०
अत्र सीते! यो **ज** नोग्रबाहू राहू रसागतः ।
कबंधो निहतो भ्रात्रा लक्ष्मणेन तथा मया. ॥ १०११
न्यग्रोधं पश्य **य** त्र त्वां त्रातुं मम पितुः सखा ।
प्रवृत्तः समरे तातो जटायुर्निहतोऽरिणा. ॥ १०१२
रक्षसां यत्र **रा** ज्ञा त्वं रावणेन हृता बलात् ।
एषा गोदावरी रम्या प्रसन्नसलिला शुभा. ॥ १०१३
एतत्तदाश्र **म** पदमस्माकं वरवर्णिनि! ।
पर्णशाला तथा चित्रा दृश्यते शुभदर्शने! ॥ १०१४
कांतेऽतिपुण्यः **श्री** वासे कुंभजस्यायमाश्रमः ।
शरभंगस्य च मुनेरत्रेः कुलपतेरयम्. ॥ १०१५
चित्रकूटो व **रा** रोहे! शैलेंद्रोऽयं प्रकाशते ।

धरे! जाये! ॥ ७८६ ॥ दिसतो आश्रम तो हा, जेथें तुज शोधितां सये! जाये! । शतवार सानुजें म्यां, केलें गोदावरीस ये जा ये. ॥ ७८७ ॥ वाढविले निजहस्तें, जे तूं सुतनिर्विशेष भूपुत्री! । ते हे उटजस्थानीं, मृग शुक शिखि हंस सारिका पत्री. ॥ ७८८ ॥ पंकजदलायताक्षि! स्वकरें तूं शिंपिलीस जी लवली; । तीही फलभारानें, भाग्यानें सज्जनापरी लवली. ॥ ७८९ ॥ जे त्वां द्विजराजमुखि! स्वकरें पूजार्थ लाविली तुळशी; । तत्सेवनें मदंकीं सांबुदविद्युल्लतेसवें तुळशी. ॥ ७९० ॥ आवालवलय निर्मुनि जे चूताजवळ लाविली जाती; । पुष्पवती ते त्यातें, आलिंगाया स्वयें पहा! जाती. ॥ ७९१ ॥ [काव्यसंग्रहग्रंथमाला—रामायणें—भाग १—मंत्ररामायण—युद्धकांड—गी० ७८२-७९१ पृ० १५८.] १७. पर्वत.

१. वारिजेन (कमलेन) सह स्पर्धते इति वारिजस्पर्धि, वारिजस्पर्धि मुखं यस्याः सा। तत्संबोधने हे वारिजस्पर्धिमुखि. २. पंपा हें सरोवर हंपीजवळ आहे. या सरोवराच्या जवळ पंपा नामक गांवीं प्रख्यात माधवाचार्य (ज्यांस सायण माधव किंवा विद्यारण्यस्वामी असें म्हणतात ते) रहात असत. हें बुक्कराजाचे विजयनगराच्या समीप आहे. ३. शंपा (विद्युत्) तस्याः कंपं आवहति इति शंपाकंपावहा। तद्विधा प्रभा यस्याः सा तत्संबुद्धौ हे शंपा०. जिची देहकांति पाहून विजेच्या ठायीं कंप (कांपरें) उत्पन्न होतो. ४. चार कोस लांब असलेल्या उग्र बाहूंनीं युक्त असलेला. ५. राहूप्रमाणें भासणारा. ६. भूमीवर पडलेला. रसा+गतः. ७. वरः (श्रेष्ठ) वर्णो (देहकांतिः) यस्या विद्यते इति वरवर्णिनी, तत्संबुद्धौ. ८. श्रियो वासो यस्मिन् इति. ९. अगस्त्यस्य. १०. आश्रमस्वामिनः. 'कुलमन्वयसंघातगृहोत्पत्त्याश्रमेषु च' इत्यजयः. [स० १२३ श्लो० ४८.] ११. प्रयागास आगगाडीनें जातांना वाटेंत माणिकपुर नांवाचें रेल्वेस्टेशन लागतें. तेथून माणिकपुर—झांशी

कैकेय्या अत्र पुत्रो मां प्रसादयितुमागतः. ॥ १०१६
राजपुत्रि ! य **म** स्यैषा सा स्वसा यमुना नदी ।
भरद्वाजाश्रमश्चैष दृश्यते सुकृताकरः[1]. ॥ १०१७
इयं च गंगा **ज** गतां सेव्या देव्यांश्रितेष्टदा[2] ।
शृंगवेरपुरं चैतद्गुहो यत्र सखा मम. ॥ १०१८
सैषा सतां प्रि **य** तमा राजधानी पितुर्मम ।
[3]अयोध्यां कुरु वैदेहि ! प्रणामं पुनरागता. ॥ १०१९
ततस्ते वान **रा** ऋक्षा राक्षसाश्च सनायकाः ।
उत्पत्योत्पत्य संहृष्टास्तां पुरीं ददृशुस्तदा. ॥ १०२०
[4]शुभ्रहर्म्योत्त **म** प्राज्यप्रोच्चप्रासादमालिनीं ।
अपश्यंस्ते पुण्यवंतः साक्षादिंद्रपुरीमिव. ॥ १०२१
रामो भरद्वा **ज** मुनिं तं ववंदे तदाश्रमे ।
पूर्णे चतुर्दशे वर्षे [5]पंचम्यां [6]रचितांजलिः. ॥ १०२२
स्ववृत्तं कथ **य** न्रामो मातॄणां भरतस्य च ।
पप्रच्छ मुनिशार्दूलं भरद्वाजं द्विजेश्वरम्. ॥ १०२३
कुशलं स द्वि **ज** श्रेष्ठः कथयामास सर्वतः ।
भरतस्य व्रतं तीव्रं भक्तिं तत्पादुकार्चने. ॥ १०२४
द्रुमेष्वतिश **य** स्तस्मात्फलानां वरदान्मुनेः ।
[7]वव्रे बद्धांजली रामो मार्गे यावन्निजं पुरम्. ॥ १०२५

रेल्वेनें गेलें असतां चित्रकूट लागतो. चित्रकूट हें विंध्याचें शिखर आहे. येथें मंदाकिनी नांवाची नदी आहे. प्रयागापासून पायरस्त्यानें चित्रकूट तीस कोस आहे. येथें अलीकडे अमृतराव साहेब व त्यांचे चिरंजीव विनायकराव साहेब रहात असल्यामुळें चित्रकूट महाराष्ट्रांत पुष्कळ माहित झाला आहे, व त्यामुळेंच येथें महाराष्ट्रीयांची वस्ती झाली होती.

१. सुकृतखनिः पुण्याची खाण. २. आश्रित+इष्ट+दा=आश्रितांचे मनोरथ पूर्ण करणारी. ३. प्रयागाहूनच रामानें सीतेला अयोध्या दाखविली. विमानारूढ असल्यामुळें दिसली असावी; नाहीं तर प्रयाग व अयोध्या यांत ५०।६० कोसांचें अंतर आहे. ४. सधन लोकांचे शुभ्र उत्तम वाडे व पुष्कळ उंच असे राजवाडे यांच्या रांगांनीं शोभायमान झालेली. ५. पंचमी तिथीला. वनवासाचीं चवदा वर्षें पूर्ण झाल्यावर आश्विन वद्य पंचमीस राम भरद्वाजाश्रमांत परत आला. हा भरद्वाजाश्रम गंगातीरीं आहे. भरद्वाजाश्रम, शृंगवेरपुर व नंदिग्राम हीं तीनही स्थळें प्रयागाच्या जवळ आहेत असें समजतें. [सर्ग १२४ श्लोक १ पहा.] ६. बद्धांजलिः. ७. अयोध्येपर्यंत सर्व द्रुमांना भरपूर फळें वानरांच्या खाण्याकरितां असावीं असा वर रामानें भरद्वाजाला मागितला.

मारुतिं च त्व **रा** युक्तं भरतं प्रति राघवः ।
प्रेषयामास कुशलागमं[1] कथयितुं प्रभुः. ॥ १०२६

स [2]श्रृंगवेर **म** गमन्नररूपोऽवदद्द्रुहम् ।
कुशली ते सखा, श्वस्त्वं द्रक्ष्यस्यत्रैव राघवम्. ॥ १०२७

ततः स तूर्णं **श्री** मंतं भरतं जटिलं कृशम् ।
'आगतः प्रभु'रित्युक्त्या चकार मुदितं भृशम्. ॥ १०२८

स [3]प्रहर्षभ **रा** द्भूमौ पपात भरतस्तदा ।
उत्थाय कपिमालिंग्य तं सिषेचाश्रुबिंदुभिः. ॥ १०२९

अथाब्रवी'त्व **म** मरो नरो वा [4]करुणागतः ।
[5]प्रियाख्यानस्य ते सौम्य ! ददामि [6]ब्रुवतः प्रियम्. ॥ १०३०

कन्या धन्याः [7]कं **ज** नेत्र्यः षोडश स्वर्णभूषिताः ।
गवां शतसहस्रं च ग्रामाणां च शतं [8]मतम्. ॥ १०३१

बहून्यहो ! हा **यं** नानि गतस्य सुमहद्वनम् ।
शृणोम्यहं प्रीतिकरं मम [10]नाथस्य कीर्तनम्. ॥ १०३२

कल्याणीयं प **रा** गाथा लौकिकी प्रतिभाति मे ।
एति जीवंतमानंदो नरं [9][11][8]वर्षशतादपि.' ॥ १०३३

कुशलं वृत्त **म** खिलं संपृष्टो भरतेन सः ।
कथयामास मुदितो [12]बृस्यां समुपवेशितः. ॥ १०३४

'सलक्ष्मणं वि **ज** यिनं सदारं सखिसंयुतम् ।
अविघ्नं [13]पुष्ययोगेन श्रीरामं द्रष्टुमर्हसि.' ॥ १०३५

प्रहृष्टहृद **यः** स्तुत्वा मारुतिं भरतोऽब्रवीत्, ।
'चिरस्य खलु मे पूर्णो हृदि रूढो मनोरथः.' ॥ १०३६

---

१. कुशलागमनं सुखरूप पोहोंचणें. २. रामायणें—भाग १—मंत्ररामायण—युद्धकांड—गी० ८००-८०९ पृ० १६० पहा. ३. अत्यानंदाच्या भरांत. ४. करुणया आगतः. ५. प्रियगोष्ट कळविणाराला. आ+ख्या+कर्तरि ल्युट्. आख्याति इति आख्यानः । प्रियस्य आख्यानः. ६. हर्षातिशयामुळें द्विरुक्ति. 'विषादे विस्मये हर्षे द्विस्त्रिरुक्तं न दूष्यते.' ७. कमललोचनाः. ८. सर्ग १२५ श्लो० ४२-४६ पहा. ९. वर्षाणि. १०. रामस्य. ११. जगणाऱ्या मनुष्याला शंभर वर्षांनीं एकदां तरी आनंद प्राप्त होतो, हीच लौकिकी गाथा. [सर्ग १२६ श्लो० १-४.] १२. दर्भासनावर. १३. आश्विन शुक्ल चतुर्दश्यामश्विनी तद्गेष इति षष्ठ्यां पुष्यस्य संभवः । पूर्णिमायामश्विन्यामप्येकर्क्षक्षयेण वा.'

प्रहृष्टं सोऽनुं[1] **ज** मथ **भ**रतः सत्य[2]संगरः ।
स्वयमाज्ञापयामास पुरमार्गाद्यलंक्रियाम्. ॥ १०३७

[3]जयंतो विज **य** स्तद्वत्सिद्धार्थश्चार्थसाधकः ।
अशोको मंत्रपालश्च सुमंत्रो धृष्टिरष्टमः. ॥ १०३८

ते प्रधानास्त्व **रा** युक्ताः पौराः सूर्योदये द्विजाः ।
निर्ययू राजदाराश्च **रा**मं द्रष्टुं समुत्सुकाः. ॥ १०३९

द्वि[4]जातिनैग **म** श्रेष्ठैः सचिवैर्**भ**रतो वृतः ।
धर्मज्ञः शिरसा भव्ये गृहीत्वा **राम**पादुके. ॥ १०४०

छत्रं च रा[5]ज **श्री** चिन्हं पुरस्कृत्य श[6]शिप्रभम् ।
शुभ्रे च बालव्यजने शंखभेरिशतस्वनैः ॥ १०४१

प्र[7]त्युद्ययौ न **रा** धीशं **रा**मं चीराजिनांबरः ।
उपवासकृशो दीनः प्रेमाश्रुभिरभिप्लुतः. ॥ १०४२

तदा तुरंग **म** खुरै[8]र्रथचक्रैश्च तद्रवैः ।
[9]बृंहितैर्[10]दंतिनां वाद्यैः संचचालेव मेदिनी. ॥ १०४३

[11]अदृष्ट्वा तद्रा **ज** यानमपृच्छन्**मा**रुतिं पुनः, ।
'कच्चि[12]न्नानुगतस्तात कपिरीतिं त्वमात्मनः. ॥ १०४४

गर्जंति हर **य** स्तेषां नादः संश्रूयते महान् ।
अयमागत एवार्य' इत्युवाच स तं कपिः. ॥ १०४५

अथ तद्राज **रा** जस्य विमानं **पु**ष्पकं महत् ।
आराददृश्यत व्योम्नि शशिसूर्यसमप्रभम्. ॥ १०४६

दृष्ट्वा हर्षेण **म** हता **रा**मोऽयमिति कीर्तिते ।
स्त्रीबालयुववृद्धानां निःस्वनो दिवमस्पृशत्. ॥ १०४७

स्यंदनेभ्यः कुं **ज** रेभ्यस्तुरगेभ्योऽवतीर्य ते ।

---

१. शत्रुघ्नम्. २. सत्यः संगरः (प्रतिज्ञा) यस्य सः. ३. हीं अष्टप्रधानांचीं नांवें. [सर्ग १२७ श्लोक ११.] ४. द्विजातिश्रेष्ठैः नैगमश्रेष्ठैः (मोठमोठ्या व्यापाऱ्यांनीं) च वृत्तः. ५. राज्ञः श्रीः (राजलक्ष्मीः) तस्याश्चिह्नम्. ६. शशिन इव प्रभा यस्य तत्. ७. सामोरा गेला. ८. रथचक्रांच्या शब्दांनीं. ९. (हत्तीच्या) शब्दांनीं. बृंहित=The trumpet of an elephant. १०. गजांच्या. ११. 'क्त्वा'चे जागीं 'ल्यप्' न होण्याला कारण 'समासेऽनञ्पूर्वे क्त्वो ल्यप् ७।१।३७. १२. माकडचेष्टा तूं करीत नाहींस असें आम्हाला वाटतें. कच्चिन्न खलु कापेयी सेव्यते चलचित्तता.

महीं गतास्तं ददृशुर्नराः सोममिवांबरे. ॥ १०४८

प्रांजलिः प्रण[1] **य** प्रव्हो भरतो राघवोन्मुखः ।

ववंदे पुष्पकस्थं तं मेरुस्थमिव भास्करम्. ॥ १०४९

ततो विमानं **ज** गतीं पपात प्रभुकामतः[2] ।

ववंदे भरतो रामं बाष्पकंठः[3] पुनःपुनः. ॥ १०५०

अंके तमादा **य** मुदा श्रीरामः परिषष्वजे ।

अथो ववंदे भरतः सीतां स्वं नाम चाब्रवीत्. ॥ १०५१

लक्ष्मणं च प **रा** क्रांतं वंदमानं महामतिम्. ।

प्रहृष्टं भरतश्चक्रे संभाव्यालिंगनादिना. ॥ १०५२

ततः प्लवंग **म** श्रेष्ठं जांबवंतं तथांगदम् ।

अन्यांश्च नलनीलादीन्यूथपान्परिषस्वजे. ॥ १०५३

'भ्राता चतुर्णा **श्री** मंस्त्वमस्माकमसि पंचमः'[4] ।

इत्यब्रवीत्परिष्वज्य भरतो वानरेश्वरम. ॥ १०५४

परिष्वज्याह **रा** जेंद्रनंदनस्तं बिभीषणम्, ।

'दिष्टया त्वया सहायेन कृतं कर्म सुदुष्करम्. ॥ १०५५

शत्रुघ्नोऽपि न **म** स्कारं चकार प्रभुपादयोः ।

जानक्याश्च महादेव्याः कीर्तयन्नात्मनो[5]ऽभिधाम्. ॥ १०५६

रामो ननाम **ज** ननीं कौसल्यामतिवत्सलाम् ।

सुमित्रां सत्वसंपन्नां कैकेयीं च यशस्विनीम्[6]. ॥ १०५७

वसिष्ठं स्वान्व **य** स्याद्यं ब्रह्मणा सदृशं गुरुम् ।

ऋत्विजः पितुरन्यांश्च ववंदे स सतां गतिः. ॥ १०५८

सचिवान्पितु **रा** तांस्तान्पौरान्सर्वान्यथार्हतः[7] ।

हर्षयामास धर्मात्मा चकोरानिव चंद्रमाः. ॥ १०५९

पादुके ते तु **म** हिते गृहीत्वा भरतः स्वयम् ।

चरणाभ्यां नरेंद्रस्य योजयामास धर्मवित्. ॥ १०६०

अब्रवीच्च प्रां **ज** लिस्तं 'सफलो मे मनोरथः ।

---

१. प्रणयनम्रः । विनयावनतः. २. प्रभु+काम+तस् प्रत्यय. प्रभूच्या इच्छेनें. ३. प्रेमाश्रुमुळें ज्याचा गळा भरून आला असा. ४. सर्ग १२७ श्लोक ४६ पहा. ५. अभिधा=नाम. ६. अस्या मनोदार्ढ्यॆन राजा नरकात्तारितः । देवा ब्रह्मर्षयश्च परमं सुखं प्राप्ताः । रामस्य च यशो जातम् अत एषा यशस्विन्येव. ७. योग्य आदरसत्कार करून.

एतत्ते सकलं राज्यं [1]न्यासं प्रत्यर्पितं मया. ॥ १०६१
पश्य नाथ! प्र **य** त्नेन धनं धान्यं गृहं बलम् ।
भवतस्तेजसा सर्वं कृतं दशगुणं मया.' ॥ १०६२
तथा ब्रुवाणं [2]**जं** न्मीड्यं दृष्ट्वा तं भ्रातृवत्सलम् ।
मुमुचुर्वानरा बाष्पं राक्षसश्च **बि**भीषणः. ॥ १०६३
रामस्तं विन **य** स्यैकमालयं **भ**रतं नतम् ।
अंकमारोप्य यानेन ययौ तेन तदाश्रमम्. ॥ १०६४
[3]व्योमयानव **रा** त्तस्मादवतीर्य **र**घूद्वहः, ।
'कुबेरं वह गच्छे'ति तदाज्ञापयदीश्वरः. ॥ १०६५
आज्ञतमग **म** च्छ्रीदं विमानं तदनंतरम् ।
भरतः प्रार्थयामास, 'राज्यं स्वीकुर्वि'ति प्रभुम्. ॥ १०६६
भ्रातुस्तथेति **श्री रा**मः प्रतिजग्राह तद्वचः ।
शत्रुघ्नवचनात्प्राप्ता निपुणाः [4]श्मश्रुवर्धनाः ॥ १०६७
पूर्वं भ्रातृषु **रा** जेंद्रः स्नातेषु **भ**रतादिषु ।
सुग्रीवे राक्षसेंद्रे च स्नानं चक्रे ततः स्वयम्. ॥ १०६८
शत्रुघ्नः पर **म** प्रेम्णा [5]विश्वालंकारमग्रजम् ।
अलंकारैरलंचक्रे सद्गुणैरप्यलंकृतम्. ॥ १०६९
[6]प्रतिकर्माथ **ज** गतीपुत्र्या **द**शरथस्त्रियः ।
चक्रुर्वानरपत्नीनां **कौ**[7]सल्या पुत्रवत्सला. ॥ १०७०
सुमंत्रोऽथ ह **य** श्रेष्ठैर्युक्तं रथमुपानयत् ।
तमारुरोह श्री**रा**मः प्रभुः परपुरंजयः. ॥ १०७१
[8]रश्मीन्जग्राह **रा** जीवलोचनो **भ**रतः स्वयम् ।

---

१. न्यासभूतं मयि स्थितम्. २. जन्मिभिः (प्राणिभिः) ईड्यं (स्तुत्यम्). जन्मिन्+ईड्य+द्वि० प्र०. ३. विमानश्रेष्ठात्. ४. श्मश्रु वर्धयंति इति । नापिताः. 'वृध्' धातूचा प्रयोग 'कांपणें' या अर्थीं केला आहे. अशा प्रकारचे प्रयोग स्त्रिया करतात. जसें, कुंकूं वाढविणें, कांकणें वाढविणें, जाण्याचे वेळीं येतों हो असा प्रयोग, इत्यादि. [सर्ग १२८ श्लो० १३-२५.] ५. सकल विश्वाला शोभविणारा. ६. अलंक्रिया. ७. वानरांनीं आपल्या रामाला साहाय्य केलें म्हणून कौसल्येनें स्वतः वानरस्त्रियांना अलंकार वगैरे घातले. 'कौसल्येनें सारा वानरकांताजन प्रमोदानें । स्नातोत्तर भूषविला नानालंकारसत्क्रियादानें. ॥' [मोरोपंत—मंत्ररामायण—भाग १—गीति ८३१ पृष्ठ १६२.] ८. 'बाग्दोर' लगाम.

छत्रं पूर्णशरश्चंद्रप्रभं[1] शत्रुघ्न आददे. ॥ १०७२
बिभीषणोऽथ म तिमान्बालव्यजनमुत्तमम् ।
लक्ष्मणो व्यजनं तस्य तालवृंतमयं तदा. ॥ १०७३
शत्रुंजयं कुं ज रेंद्रं चलत्पर्वतसंनिभम् ।
आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः. ॥ १०७४
ययुः समास्था य बहून्वारणान्वानरोत्तमाः ।
मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः. ॥ १०७५
रामं सुरा द्वि ज श्रेष्ठा द्रष्टुं व्योम्नि समागताः ।
प्रहृष्टाः पूजयामासुः स्तुतिभिः पुष्पवृष्टिभिः. ॥ १०७६
साकेतं, शम य न्कृत्स्नं संतापं, प्रविवेश सः ।
तृषार्तं चातककुलं घर्मांत इव वारिदः. ॥ १०७७
शुश्राव मधु रा रामो गिरः स्वगुणपूरिताः ।
प्रजाः प्रापुः सुखं दृष्ट्वा मुखं रामस्य भूरि[3] ताः. ॥ १०७८
ददृशू रॅाम म हिषीमयोध्यामहिलास्तथा ।
यथा कल्पलतां[6] प्राप्तामर्थिनां चित्तवृत्तयः. ॥ १०७९
ततः स रामः श्री मत्तत्प्राप मुख्यं पितुर्गृहम् ।
अथाह भरतं 'भक्तं हनूमंतं बिभीषणम्. ॥ १०८०
सुग्रीवं वान रा धीशं जांबवंतं तथांगदम् ।
यूथपैः सह मातॄणां वंदनार्थं शनैर्नय. ॥ १०८१
वानरेंद्राय म द्गेहं समृद्धं त्वं निवेदय.' ।
भरतस्तत्तथा कृत्वा वानरेश्वरमब्रवीत्. ॥ १०८२
'दूतांस्त्वमद्य ज वनान्काकुत्स्थस्य महात्मनः ।
आज्ञापयाभिषेकाय जलमाहर्तुमंबुधीन्.' ॥ १०८३
तदाज्ञया तो य माशु स्वर्णकुंभेन वानरः ।
सुषेण आनिनायासौ पूर्वात्सिंधोर्महाबलः. ॥ १०८४
ऋषभः साग रा दंभो दक्षिणाद्वयः कपिः ।
पश्चिमादर्णवात्तूर्णं स्वयं मारुतिरुत्तरात्, ॥ १०८५
अन्ये प्लवंग म वरा जांबवांश्चर्क्षभूपतिः ।
नदीशतानां पंचानां जलं कुंभैरुपाहरन्. ॥ १०८६

---

१. पूर्णः शरत्कालिकः चंद्रः तस्येव प्रभा यस्य तत्. २. सर्ग १२८ श्लो० ३२ पहा. ३. पुष्कळ. ४. सीताम्. ५. अयोध्येंतील स्त्रिया. ६. इच्छापूरक कल्पवृक्षाच्या लतेला.

[1]**व**सिष्ठादिद्वि **ज** श्रेष्ठाः पीठे [2]रत्नमये प्रभुम् ।
सस**सी**तमभ्यषिंचंस्तैर्विधिना तीर्थवारिभिः[3]. ॥ १०८७

[4]कन्याभिश्च प्रि **य** परैः सचिवैः शस्त्रिभिस्तथा ।
नैगमैर्लोकपालैश्च श्री**रा**मं तेऽभ्यषेचयन्. ॥ १०८८

पूर्वं साक्षान्नि **ज** गतां कर्त्रा यन्निर्मितं वरम् ।
तत्किरीटं **व**सिष्ठेन स्थापितं **रा**ममस्तके. ॥ १०८९

ऋत्विग्भिश्चा[5]व्य **य** प्राज्यतेजोभि[6]र्मणिभूषणैः ।
सभायां हेम[7]क्लृप्तायां **रा**घवः समलंकृतः. ॥ १०९०

छत्रं च [8]द्विज **रा** जाभं तस्य **श**त्रुघ्न आददे. ।
बिभीषणः कपींद्रश्च बालव्यजनमुत्तमम्. ॥ १०९१

मुक्ताहारं [9]हे **म** पद्ममालां **रा**माय **मा**रुतः ।
ददौ सभायामागत्य [10]मूर्तः **श**क्रप्रचोदितः. ॥ १०९२

तत्राभिषेके [11]**श्री** जाये **रा**मस्यामिततेजसः ।
प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः. ॥ १०९३

[12]सस्यपूर्णा ध **रा** सर्वे फलवंतश्च पादपाः ।
गंधवंति च पुष्पाणि बभूवू **रा**घवोत्सवे. ॥ १०९४

सहस्रशत **म** श्वानां धेनूनां च गवां [13]शतम् ।
ददौ शतवृषान्पूर्वं द्विजेभ्यो [14]मनुजर्षभः. ॥ १०९५

---

१. वा० रा० युद्ध० स० १२८ श्लोक ६०. २. रत्नसिंहासने. ३. या प्रसंगाचें वर्णन प्राकृत मंत्ररामायणांत असेंच आहेः—कपिजन राजनिदेशें, शतपंचक सिंधुनीरसंपूर्ण; । ऋक्षेश वेगदर्शी, पवनात्मज कुंभ आणिती तूर्ण. ॥ ८३६ ॥ वासवदिक्तोयधिचें जल हेमघटें सुपेण तो आणी; । नल शातकुंभकुंभें, घेउनि ये उत्तराब्धिचें पाणी. ॥ ८३७ ॥ यमदिग्जल राशिजलें ऋषभानें आणिलीं प्रमोदानें; । पश्चिमसमुद्रनीरें गवयानेंही जशीं पयोदानें. ॥ ८३८ ॥ रघुसत्तम मस्तक मग, पुण्य मुहूर्ती स्वयें वसिष्ठानें । अभिषेकिलें विधीनें, हरिशिर जैसें जगद्वरिष्ठानें. ॥ ८३९ ॥ [काव्यसंग्रहग्रंथमाला—रामायणें—भाग १—मंत्ररामायण—युद्धकांड गी० ८३६-८३९ पृ० १६३ पहा.] ४. सोळा कुमारींनीं. ५. कधीं कमी न होणारें व पुष्कळ तेज ज्यांचें आहे अशा रत्नांच्या दागिन्यांनीं. अव्ययं प्राज्यं च तेजो येषां तैः. ६. मणिखचितैः भूषणैः. ७. सोन्याच्या वेलबुट्टीनें सुशोभित केलेल्या सभेंत. ८. द्विजानां (चकोराणां) राजा । तस्येव आभा यस्य तत्। शशिप्रभम्. ९. सुवर्णपद्ममालाम्. इंद्रानें वायुद्वारा कांचनमाला आणि मुक्ताहार असे अलंकार रामास दिले. (रामायण—युद्धकांड—स० १२८ श्लो० ७०-७१.) १०. मूर्तिमान्. ११. श्रीः जाया यस्य तस्य. जायाया निङ् ५।४।१३४. १२. पिकानें लादलेली. १३. शतशब्दोऽनंतवाची. १४. मनुज+ऋषभः=मनुजश्रेष्ठः.

त्रिंशत्कोटीः स [1]**ज** गतीसुरेभ्यो हेम्न ईश्वरः ।
नानाभरणवस्त्राणि महार्हाणि ददौ पुनः. ॥ १०९६
प्लवंगराजा **य** विभुः कांचनीं [2]मणिविग्रहाम् ।
[3]सूर्यरश्मिनिभां दिव्यां स्रजं प्रायच्छदीश्वरः. ॥ १०९७
[4]महार्हे रुचि **रा** कारे चंद्ररश्मिविभूषिते ।
सर्वरत्नमये श्रीमान**नं**गदा[5]यांगदे ददौ. ॥ १०९८
मुक्ताहारं स्वं **म** हार्हं **सी**तायै प्रददौ प्रभुः ।
तं कंठादवमुच्याथ देवी [6]**रा**ममुदैक्षत. ॥ १०९९
तामिंगित[7]ज्ञो **ज** गतीप्रभवामब्रवीत्प्रभुः, ।
'प्रदेहि सुभगे! हारं यस्य तुष्टासि भामिनि!' ॥ ११००
अथा**ञ्ज**नेया **य** ददौ तं हारं सा दयावती ।
[8]येयावतीत्य स **जग**न्नान्यै श्रीस्ते[9]न [10] यावती. ॥ ११०१
धृतिर्यशस्ते[11] **ज** सी च दाक्ष्यं सामर्थ्यमुत्तमम् ।
यस्मिन्बुद्धिर्विक्रमश्च पौरुषं विनयो नयः. ॥ ११०२
सोंऽजनातन **य** स्तेन हारेण शुशुभे तथा ।

---

१. ब्राह्मणेभ्यः. २. मणयो विग्रहे (विभागे) यस्यास्ताम् । मधून मधून रत्नांनीं गुंफली आहे अशी माळ. ३. सूर्यकिरणाप्रमाणें देदीप्यमान. सूर्यस्य रश्मिभिः तुल्याम् नित्य समास. ४. महार्घे, भारी किमतीचीं. ५. वलयें, कडीं. ६. आपल्या कंठांतून हार काढून मारुतीला द्यावयाच्या इच्छेनें रामचंद्राची अनुमति मिळविण्याकरितां सीता रामचंद्राच्या तोंडाकडे पाहूं लागली. "राम म्हणे, 'प्रमदे! या लोकीं जो योग्य हार हा देया । त्याला देतां राज्य, प्राणहि नाहींत सर्वथा प्राज्य. ॥ ८४५ ॥ जैसी तूं तैसी श्री, भरत जसा हा तसेचि हे प्राण; । ज्याणें मातें दिधले सीते! तो पूज्य सर्वथा जाण.' ॥ ८४६ ॥ एवं रघुवीराच्या वाक्यें झाली प्रहृष्टरूपा हे; । माता जशी सुतातें, तैसी ते मारुतीकडे पाहे. ॥ ८४७ ॥ शिर करकमलें चरणीं समर्पितां, मारुतीस ती सीता । देवी मणिहारासह, दे हृदयाभीष्ट भक्ति सुप्रीता. ॥ ८४८ ॥ 'तूं निर्मल निजगुणमणिभूषित वत्सा! सदैव परि हार । कंठीं' म्हणे 'असों दे, मद्विस्मृतिचा करील परिहार. ॥ ८४९ ॥ तुझिया हृदयसरोजीं स्मरण असो आणि हार हा कंठीं; । मुदितमनें कालातें आत्मज्ञानें पहा रहा कंठीं. ॥ ८५० ॥ आम्हां उपकाराचा सागर लंघावया नसे नाव; । धन्य वदान्यांमध्यें घ्यावें पहिलें सदा तुझें नांव.' ॥८५१॥" [काव्यसंग्रहग्रंथमाला–रामायणें–भाग १–मंत्ररामायण–युद्धकांड–गी० ८४५-८५१ पृ० १६४ पहा.] ७. हृद्गतभाव जाणणारा. ८. भूमिजा, सीता. ९. मारुतीनें सर्व जगाला आपल्या ऐश्वर्यानें मागें टाकलें. १०. यावती श्रीः तेन लब्धा तावती श्रीः अन्यैः न लभ्या. ११. यशश्च तेजश्च यशस्तेजसी.

मंदाकिन्याः प्रवाहेण सुमेरुः शैलराडिव.[1] ॥ ११०३

सुग्रीवो वान **रा** धीशो राक्षसेंद्रो **बि**भीषणः ।
हनूमान् **जां**बवानन्ये श्री**रा**मेण समर्चिताः ॥ ११०४

गतः प्लवंग **म** श्रेष्ठः **कि**ष्किंधां प्रभुसत्कृतः ।
लब्ध्वा कुलधनं **लं**कां हृष्टः प्रा[2]याद्विभीषणः. ॥ ११०५

स्वयौवराज्यं **श्री** रामो [3]लक्ष्मणानुमते ततः ।
भरताय ददौ प्रेम्णा [4]राघवो लाघवोज्झितः. ॥ ११०६

श्री**रा**मः प्राप्य **रा** ज्यं तद्वर्षाण्ययुतमे[5]कराट् ।
दशाश्वमेधानाजह्रे [6]सदश्वान्[7]भूरिदक्षिणान्. ॥ ११०७

आसन्प्रजाः स **म** स्तास्ता [8]वीतशोका नि[9]रामयाः ।
[10]बहुवर्षायुषो[11]ऽत्याढ्या बहुपुत्रा [12]बहुश्रुताः. ॥ ११०८

नि[13]कामवर्षी **ज** लदो नासी[14]द्व्यालकृतं भयम् ।
न [15]पर्यदेवन्[16]विधवा **रा**मे राज्यं [17]प्रशासति. ॥ ११०९

तेजो बलं व **य** स्तेषां जनानां नाभवच्चलम् ।
निर्द[18]स्युरभवल्लोको नानर्थः कंचिदस्पृशत्. ॥ १११०

---

१. 'शैलराज्' या हलन्त शब्दाची प्रथमा. इव=यथा. २. प्र+अ+या+लङ्त, गेला. ३. वनवासांत आपल्याबरोबर दुःखानुभव घेतल्यामुळें राज्यसुखाचा अनुभव लक्ष्मणानें यौवराज्य स्वीकारून घ्यावा म्हणून रामानें प्रार्थना केली, ती लक्ष्मणाला मान्य झाली नाहीं, कारण भरत ज्येष्ठ भ्राता हा त्या पदाचा अधिकारी होता. (वा० रा० युद्ध० स० १२८ श्लो० ९१-९३.) यास्तव लक्ष्मणाच्या अनुमतीनें भरताला रामानें आपला युवराज केला. ४. मनाचा हलकेपणा ज्याचे ठायीं नाहीं असा. लाघवेन उज्झितः (त्यक्तः), सापत्नभावाचा संबंध लक्ष्यांत आणला म्हणजे या हेतुगर्भ विशेषणाची युक्तता सहज दिसेल. ५. चक्रवर्ती, सार्वभौमः. ६. चांगल्या सुलक्षण अश्वांचा ज्यांत मेध केला होता असे हयमेध. [सर्ग १२८ श्लो० ९५.] ७. ज्यांत पुष्कळ दक्षिणा वांटली आहे. ८. वि+इत+शोक+प्र०प्र०=ज्यांचा शोक अगदीं नाहींसा झाला आहे. ९. निर्+आमय (रोग)+प्र०प्र०, नीरोगाः. १०. बहु वर्षें ज्यांचें आयुष्य आहे अशा. दीर्घकालजीविन्यः. ११. अतिसधन. १२. ज्यांचें ज्ञान फार आहे. १३. पूर्णपणें वर्षण करणारा. १४. दुष्ट जंतूपासून उत्पन्न होणारें. १५. परि+अ+देव+लङ् अन्. रडल्या. १६. मृतभर्तृकाः विगतो धवो यासां ताः । कोणाही स्त्रियेला वैधव्य आलें नाहीं व म्हणून तज्जन्य दुःखाचा अभाव रामराज्यांत होता. १७. प्र+शास+शतृ+सप्त० प्र०. १८. निर्गता दस्यवो यस्मादिति. ज्यांतून चोरटे नाहींसे झाले आहेत असा. [सर्ग १२८ श्लो० ९७-१०३.]

[1]लक्ष्मणानुच **रा** द्रा[2]मात्कामायुतशतोत्तमात् ।
सर्वान्मनोरथान्प्राप्ताः प्रजा मुमुदिरे भृशम्. ॥ ११११

समस्यातिस **म** र्थस्य तस्या[3]निशदयावतः ।
रामस्य मुमुदे विश्वं कीर्त्या वि[4]शदया[5]वतः. ॥ १११२

सर्वापि धन्या [6]**जं** न[7]ताजनताभूत्तदा[8]निशम् ।
भू [9]नंदनप्रभवना [10]भवनाशकरात्प्रभोः ॥ १११३

[11]साध्वसं नैव [12]**यं** मतो जातु जीवस्य कस्यचित् ।
सर्वेऽपि सुहृदः [13]स्वैरं, वैरं केवलमेन[14]सा. ॥ १११४

भर्ता सर्वस्य **ज** गतः श्यामो **रा**मो यथा घनः ।
भक्ता मयूरास्तं दृष्ट्वा यत्तेषां मुदितं मनः. ॥ १११५

सर्वेषामपि [15]**यं** न्नाम स्मरतां [16]भद्रसादरम् ।
श्रीमद्वाल्मीकिना गीतं चरितं स[17]द्रसादरम्. ॥ १११६

यशो वि[18]श्वाभि **रा** मस्य श्री**रा**मस्यातिपावनम् ।
गीतं वापि श्रुतं वापि यथामत्यनुमोदितम् ॥ १११७

रामनामैव **म** हितं सन्मनोऽनेन मोहितम् ।
यो हि तं प्राप्तुकामो द्राक्तस्यान्यत्खलु नो हितम्॥ १११८

---

१. लक्ष्मणोऽनुचरो (सहायो) यस्य तस्मात्. २. लक्षावधि मदनांहून उत्तम जो त्याजपासून. कामानां अयुतशतं तस्मात् उत्तमो यस्मात्. ३. अनिशं (सर्वदा) दयावान् (दयालुः) तस्य. ४. विशदा (निर्मला) तया. ५. अवतः=अव्+शतृ+प०म०=पालन करणाऱ्याच्या. ६. जनसमूहः. ७. अज म्हणजे विष्णु तत्पदीं नता म्हणजे लीन झालेली. ८. अनिशम्=अविरतम्, निरंतरम्. ९. नंदनं (इंद्रोद्यानं) प्रभवति (परिभवति) इति सा. इंद्रोद्यानाला देखील मागें टाकणारी. १०. भवस्य संसारस्य नाशं करोतीति तस्मात्. संसाराचा नाश करणाऱ्या प्रभूमुळें. ११. भयम्. १२. यमात्. १३. स्वेच्छेनें. १४. पापेन सह. पापाशींच काय तें वैर. १५. यत् नाम (निश्चयानें. हें अव्यय आहे.) १६. भद्रदायक, मंगलदायक. १७. मोठ्या प्रेमानें. सद्रसस्यादरो यस्मिन् कर्मणि यथा तथा. १८. सर्वप्रियस्य. शेवटीं दिलेल्या फलश्रुतिश्लोकांवरून असें दिसतें कीं, सिंहासनारूढ होईपर्यंत जेवढा रामायणाचा कथाभाग तेवढाच वाचीत असत व उत्तरकांडांत स्वर्गारोहण असल्यामुळें रघुवंशाच्या प्रथम सर्गाप्रमाणें त्याचा पाठ वर्ज्य मानला असावा. असें नसेल तर दोन ठिकाणीं फलश्रुति श्लोक देण्याचा अर्थ काय?

उत्तरकांडम्.[1]

प्राप्तराज्यो यदा **श्री** मान्**राम**ोऽयोध्यापतिस्तदा ।
आजग्मुर्मुनयः सर्वे प्रेम्णा तं प्रतिनंदितुम्. ॥ १

वि[2]श्वामित्रस्तपो **रा** शि[3]र्यवक्रीतोऽथ **गा**लवः ।
अगस्त्योऽत्रिश्च [4]भगवानन्ये च [5]मुनिसत्तमाः ॥ २

प्रत्युज्जगाम **रा म** स्तान्द्वारपालनिवेदितान् ।
पूजयामास संस्थाप्य [6]स्वासनेषु [7]यथार्हतः. ॥ ३

[8]कुशलं रघुरा **ज** स्तांस्ततोऽपृच्छत्सुसत्कृतान् ।
ते तमूचु‘र्महाबाहो! सर्वत्र कुशलं हि नः. ॥ ४

त्वां तु दिष्ट्या [9]स्वाल **य** स्थं वीरं कुशलिनं प्रभो! ।
सानुजं कीर्तिसंपन्नं पश्यामो [10]हतशात्रवम्. ॥ ५

दिष्ट्या त्वया हतो **रा** जन्! **रा**वणो लोकरावणः ।
[11]स भारस्ते न सधनु विजे[12]थास्त्वं जगत्रयम्. ॥ ६

लक्ष्मणेन च [13]सं **म** र्दे **श**क्रजित्प्रमुखाद्विषः ।
दिष्ट्या हता महाभाग! भ्रात्रा [14]त्वद्धितकारिणा. ॥ ७

कुंभकर्णोऽपि च **ज** गत्कालो दिष्ट्या हतो रणे ।
[15]यस्य प्रमाणाद्विपुलं [16]प्रमाणं नेह विद्यते.[17] ॥ ८

---

१. उत्तरकांड–स० १ श्लो० १. २. विश्वं मित्रं यस्य सः, मित्रे चर्षौ ६।३।१३० या नियमानें ‘विश्वं’ याचें ‘विश्वा’ असें रूप झालें. ३. यवक्रीत व गालव हीं मुनींचीं नांवें. ४. अत्रिमुनीला भगवत् हें विशिष्टपद लावण्याचें कारण, नारदाच्या चिथवणीवरून उमा, सावित्री व लक्ष्मी यांनीं आपआपल्या पतीस अनुसूयेच्या सत्वपरीक्षेकरितां पाठविले असतां त्यांच्या हास्यास्पद स्थितीवरून स्पष्ट आहे. ५. मुनिश्रेष्ठाः. ६. सु (शोभनानि) आसनानि तेषु. ७. यथार्ह+द्वितीयार्थे तस्=यथार्हम्, यथायोग्य, शास्त्रोक्तविधीनें. ८. रघुराजानें कुशलप्रश्न मुनींना केला. कारण ‘कुशलं ब्राह्मणं पृच्छेत् क्षत्रबंधुमनामयम्’ इत्यादि स्मृतिनियम आहे. ९. स्वस्य आलये (कुलधनें अयोध्यायां) तिष्ठतीति तम्. १०. शत्रूणां समूहः शात्रवम्, हतं शात्रवं येन तम्, किंवा शत्रुरेव शात्रवः, हतः शात्रवो येन तम्. ११. पुत्रपौत्रयुक्त असलेला देखील रावण तुला भारी नव्हता. तद्वधः तव ईषत्करः इत्यर्थः. १२. ‘विजेथास्त्वं’ हा पाठ चुकीचा दिसतो. त्याबद्दल ‘विजेता त्वं’ असा पाठ घ्यावा. किंवा ‘विजयेथा जगत्त्रयम्’ असें पाठांतर कल्पावें. [स० १ श्लो० १७-१८.] १३. लक्ष्मणाशीं झालेल्या झुंजेंत. १४. तव हितं करोतीति तेन. १५. ‘धनुःशतपरीणाहः स षट्शतसमुच्छ्रितः । रौद्रः शकटचक्राक्षो महापर्वतसंनिभः॥’ वा० रा० युद्ध०स०६५ श्लो० ४१. १६. आकारप्रमाण. १७. हें अर्ध मूळांत असेंच आहे. [स० १ श्लो० २२.]

सेंद्रा लोकेश्वरा **य** स्मात्रस्ताः सर्पादिवाखवः[1] ।
दिष्ट्या **द**शास्यो निहतो द्वंद्वयुद्धगतस्त्वया[2]. ॥ ९
वधो राक्षसरा **ज** स्य तव भारो न **रा**घव ! ।
द्वंद्वयुद्धमनुप्राप्तः स दिष्ट्या **रा**वणिर्हतः[3]. ॥ १०
रामास्माकं विस्म **य** स्तु श्रुत्वा **श**क्रजितं हतम् ।
अवध्यं सर्वभूतानां हंतुं कोऽपि क्षमो न तम्. ॥ ११
दिष्ट्या त्वं वर्धसे **रा**[4] कापतिस्वच्छमहायशाः ।
दत्वाद्य विपुलां **राम** ! विप्रेभ्योऽभयदक्षिणाम्[5].' ॥ १२
श्रुत्वा तद्विस्मये **म**[6] ग्नो **राम**ः प्रांजलिरब्रवीत्, ।
'अतिक्रम्य **द**शग्रीवं किं प्रशंसथ **रा**वणिम् ?' ॥ १३
अथ [7]**कुं**भोद्भवः **श्री** मानुवाच **र**घुनंदनम्, ।
"शृणु **राम** [8]पुरावृत्तं तस्य सर्वं ब्रवीमि ते. ॥ १४
प्रजापतिसुतो **रा** जन् ! **पु**लस्त्यो भगवान्मुनिः ।
[9]तृणबिंद्वाश्रमं गत्वा तपस्तेपे[10] महातपाः[11]. ॥ १५
विघ्नं [12]कुर्वंत्याश्र **म** स्थे मुनौ तस्मिंस्तु कन्यकाः ।
गायंत्यो वादयंत्यश्च लासयंत्यो[13] यथासुखम्. ॥ १६
रुष्टः स मुनिरा **ज** स्तास्तत्र प्रोवाच कन्यकाः[14], ।
'या मे दर्शनमागच्छेत्सा गर्भं धारयिष्यति[15].' ॥ १७
ताः कन्याः शापभ **य** तस्तं देशं नोपचक्रमुः ।
तृणबिंदोस्तु राजर्षेस्तनया[16] न[17] शृणोति तत्. ॥ १८
साश्रमे विचचा **रा** थ कांचिदभ्यागतां सखीम् ।

---

१. सर्पात् इव आखवः (उंदीर), आ (समंतात्) स्वनति इति आखुः. २. दोन दोन वीरांच्या लढण्याला द्वंद्वयुद्ध म्हणतात. द्वंद्वयुद्धं गतः, 'द्वितीया श्रितातीत–' इत्यादिना २।१।२४ 'द्वंद्वं रहस्यमर्यादा–' ८।१।१५ इत्यादिना द्विर्वचनादि निपात्यते. ३. इंद्रजित्. ४. राका+पति+स्वच्छ+महत् (महा)+यशस्=पूर्णिमाचंद्राप्रमाणें स्वच्छ आहे महायश ज्याचें असा. ५. अभयमेव दक्षिणा ताम्. ६. आश्चर्यांत बुडून गेलेला. (सर्ग १ श्लो० २९-३३.) ७. अगस्त्यः. ८. पूर्ववृत्तम्. हें सुप्‌समासाचें उदाहरण. 'सह सुपा' २।१।४. ९. तृणबिंदु+आश्रम=तृणबिंदूच्या आश्रमांत. १०. तप्+लिट् ए. ११. महत्तपो यस्य सः. १२. कुर्वंति आश्रमस्थे. १३. नृत्यंत्यः, क्रीडंत्यः. १४. हें द्वितीयानेकवचनाचें रूप. कन्यकांना. १५. सर्ग २ श्लो० १३ पहा. १६. हिचें नांव 'गौ' होतें. १७. न शुश्राव.

अदृष्ट्वा तं तदापश्यत्तस्य श्रुत्वा [1]श्रुतिध्वनिम्. ॥ १९
मुनेर्वचनसा **म** र्थ्यात्सहसा गर्भवत्यभूत् ।
पित्रा पृष्टाब्रवीद्धेतुं मुनेर्दर्शनमेव सा. ॥ २०
ध्यानं विवेश रा **ज** र्षिर्ज्ञात्वा शापं महात्मनः ।
तस्मै **पुलस्त्याय** ददौ कन्यां सोऽप्यग्रहीन्मुदा. ॥ २१
मुनेर्वरात्सा प्र **य** तासूत **वि**[2]**श्रवसं** सुतम् ।
पितेव तपसा युक्तः सोऽभवद्विश्रवा मुनिः. ॥ २२
तस्मै **विश्रवसे**[3]ऽ **ज** स्य पौत्रायाद्भुततेजसे ।
भरद्वाजो ददौ [4]कन्यां तस्या **वै**[5]**श्रवणः** सुतः. ॥ २३
तस्मै **ब्रह्माथ** द **य** या लोक[6]पालत्वमीप्सितम् ।
नि[7]धीनां रक्षणं [8]चादात्तपसाराधितश्चिरम्. ॥ २४
पुष्पकं च प्रचा **रा** य विमानं प्रददौ प्रभुः ।
विष्णोर्भीतैः परित्यक्तां राक्षसैस्त्वष्टृनिर्मिताम् ॥ २५
त्रिकूटस्थां हैम **म** यीं **लंकां** तस्मै पिताप्यदात्, ।
तां **विश्वकर्मरचितां** सोऽ[9]ध्यावसदुदारधीः.' ॥ २६
पप्रच्छ [10]**घटजं** **श्री** मान्**रामो** राजीवलोचनः, ।
'ये **लंकायां** स्थिताः पूर्वं राक्षसाः कथितास्त्वया. ॥ २७
भगवंस्ते तपो **रा** शे कस्माज्जाताः कथं स्थिताः ।
अपराधं कमुद्दिश्य निहता **विष्णुना** [11]रणे. ॥ २८
अगस्त्यः प्राह र **म** यन्मनो **रामस्य** सूक्तिभिः, ।
'प्रजापतिर[12]पः सृष्ट्वा तद्रक्षार्थं महातपाः. ॥ २९
व्यसृजद्वा[13]रिज **ज** निः स भूतानि पुरा प्रभुः ।

---

१. वेदध्वनिम्. २. 'यस्मात्तु विश्रुतो वेदस्त्वयेहाध्ययतो मम । तस्मात्स **विश्रवा** नाम भविष्यति न संशयः ॥' [वा० रा० उत्तर० स० २ श्लो० ३१.] ३. ब्रह्मणः ४. आपल्या देववर्णिनी नामक कन्येला. देववर्णिनी ही विश्रव्याची पहिली बायको. ५. कुबेर. हा ब्रह्मदेवाचा प्रपौत्र. 'अपत्यप्रत्ययसंनियोगेन विश्रवसो विश्रवणादेशः.' [स० ३ श्लो० ८ पहा.] ६. उत्तरदिक्पालत्वम्. ७. द्रव्याच्या नवनिधींचें. ८. अ+दा+लुङ्त्. ९. सः अध्यावसत् उदारधीः. १०. कुंभोद्भवम्, अगस्त्य. ११. सर्ग ४ श्लो० ३-७ पहा. १२. 'अपः' हें 'आप्'शब्दाचें द्वितीयानेकवचन. आप् शब्द स्त्रीलिंग आहे, ह्याचा प्रयोग नेहमीं अनेकवचनीं होतो. 'आपः सुमनसो वर्षा अप्सराः सिकता समा । एते स्त्रियां बहुत्वे स्युः एकत्वेऽप्युत्तरत्रयम् ॥.' १३. कमलोद्भवः, ब्रह्मा.

'अपो रक्षध्व'मित्याह तानि सत्वानि [1]भूतकृत्. ॥ ३०

[2]रक्षामेत्य[3]ब्जन **य** न! प्रोक्तं यैस्ते तु [4]राक्षसाः ।
[5]यक्षामेति च यैरुक्तं यक्षास्ते नामतोऽभवन्. ॥ ३१

[6]हेतिः **प्र**हेतिश्च **रा** जन्मुख्यौ तत्र बभूवतुः ।
प्रहेतिर्धार्मिको नित्यं तपोवनरतोऽभवत्. ॥ ३२

हेतिस्तु [7]संतान **म** तिः कालस्य [8]भगिनीं [9]**भ**याम् ।
[10]उपयेमे सुतस्तस्यां **वि**[11]द्युत्केशाभिधोऽभवत्. ॥ ३३

विद्युत्केशोऽतिते **ज** स्वी **सं**ध्यादुहितरं प्रियाम् ।
[12]उदावह**द्र**घूत्तंस! नाम्ना [13]**सा**लकटंकटाम्. ॥ ३४

गर्भं प्राप्ता सा प्रि **य** तो [14]**मं**दरे तं [15]घनस्वनम् ।
तत्याज [16]घनसंकाशं **वि**[17]द्युत्केशरतार्थिनी. ॥ ३५

तस्मिन्काले [18]गिरि **ज** या सहारुह्य वृषं **शि**वः ।
[19]गच्छन्मारुतमार्गेण शुश्राव रुदितं शिशोः. ॥ ३६

तत्र प्रसादं प्रि[20] **य** या प्रेरितः **शं**करोऽकरोत् ।
[21]सद्योऽमरत्वं तारुण्यं [22]पुरमाकाशगं ददौ. ॥ ३७

स [23]**सु**केशो [24]यातु **रा** जः प्रख्यातोऽभू**द्र**घूत्तम! ।

---

१. भूतानि करोतीति. २. रक्षाम व यक्षाम हीं लोट् लकाराच्या उत्तम बहुवचनाचीं रूपें. ३. हे कमललोचन. रक्षाम इति अब्जनयन. ४. 'राक्षस' शब्दाची व्युत्पत्ति इतरत्र अन्य प्रकारची दिली आहे. रक्ष्यते हविर्यस्मात्तत, रक्ष एव राक्षसः. ५. यक्ष्+लोट् उत्तम० अने०प्र०. परंतु यक्ष् हा धातु चुरादिगणीय असून आत्मनेपदी आहे तेव्हां 'यक्षाम' असें रूप दुर्घट आहे. यक्ष् भ्वादिगणीय आहे अशी कल्पना केली तर रूप सहज सिद्ध होतें. [सर्ग ४ श्लो० १२-१३.] ६. हेति व प्रहेति राक्षसांचे पूर्वपुरुष. ७. संताने मतिर्यस्य सः, पुत्रकामः. ८. भया नांवाची कालाची बहीण तिशीं. ९. भगः (भ्रात्रादेः द्रव्यादाने यत्नः अस्त्यस्याः इति ताम्.) १०. उप+यम्+लिट् ए=विवाह करिता झाला. ११. विद्युत्केश इति अभिधा (नाम) यस्य सः. १२. उद्+आ+अ+वह+लङ् त. १३. सालकटंकटा हें संध्यादुहितेचें नांव. १४. मंदर पर्वतावर. १५. घनस्येव स्वनो यस्य तम्. १६. कांत्या घनतुल्यम्. १७. विद्युत्केशेन सह रतं (क्रीडां) अर्थयते इति. १८. पार्वत्या. १९. मारुतस्य (वायोः) मार्गः आकाशं तेन । आकाश-मार्गानें. वायूला 'मातरिश्वन्' ही संज्ञा आहे. २०. प्रिया जी पार्वती तिच्या प्रेरणेवरून. २१. तत्क्षणीं अमरत्व व सद्यस्तारुण्य. २२. आकाशांत भ्रमण करणारें पुर. [स० ४ श्लो० ३०.] २३. हें सालकटंकटेपासून झालेल्या विद्युत्केशाच्या मुलाचें नांव. २४. राक्षसराजः.

गंधर्वो ग्रामणी[1]स्तस्मै ददौ देववतीं सुताम्. ॥ ३८
स पुत्रांस्त्रीन्प्रीत[2]म ना जनयामास राघव! ।
माल्यवंतं सुमालिं च मालिं च बलिनां[3] वरम्. ॥३९
तपस्तुष्टो[4] ददौ श्री मान्वरांस्तेभ्यः सुदुर्लभान् ।
अजेयाः[5] शत्रुहंतारो जातास्ते चिरजीविनः. ॥ ४०
देवा दैत्याश्च तै रा सन्पीडिता वरनिर्भयैः[6] ।
विश्वकर्मकृता लंका प्राप्ता शक्रपुरीसमा[7]. ॥ ४१
गंधर्वी नर्मदा म त्वा युक्तं कन्यात्रयं स्वयम् ।
अलंकृत्य ददौ तेभ्यो नक्षत्रे भगदैवते[8]. ॥ ४२
सुंदरी यातुरा ज स्य भार्या माल्यवतोऽभवत् ।
तत्सुता[9] वज्रमुष्टिश्च विरूपाक्ष[10]चतुर्मुखः. ॥ ४३
सुप्तघ्नश्च तथा य ज्ञकोपो मत्त[11]श्च राक्षसः ।
उन्मत्तनामा, कन्या च सुंदर्या[12]मनलाभिधा. ॥ ४४
भार्या सुमालिनो[13] रा म! नाम्ना केतुमती प्रिया ।
प्रहस्तोऽकंपनश्चैव विकटः कालिकामुखः. ॥ ४५
धूम्राक्षश्च तथा मं[14] र्त्यशत्रू दंडसुपार्श्वकौ ।
संह्रादिः प्रघसश्चैव भासकर्णश्च तत्सुताः. ॥ ४६
कन्या च रक्षोरा ज स्य राका[15] पुष्पोत्कटाभिधा ।
कैकस्यथ चतुर्थी सा नाम्ना कुंभीनसी प्रभो! ॥ ४७
मालेस्तु वसुदा[16] य स्यामनलानिलनामकौ ।
हरः[17] संपातिरित्येते विभीषणहिते रताः. ॥ ४८

---

१. ग्रामणि नामक गंधर्व. २. प्रीतं मनो यस्य सः. ३. सर्ग ५ श्लो० ६ पहा. ४. तपसा तुष्टः. ५. जेतुं न शक्याः. [स० ५ श्लो० १४.] ६. वरात् हेतोः नास्ति भयं एषां तैः. ७. अमरावतीतुल्या. ८. उत्तराफाल्गुनी नक्षत्रावर. या नक्षत्रावर केलेला विवाह वंशवृद्धिकर होतो. भगः दैवतं यस्य तत्. ९. माल्यवंताला सात पुत्र व एक कन्या अशीं अपत्यें होतीं. १०. याबद्दल वा० रामायणांत 'विरूपाक्षश्च दुर्मुखः' असा पाठ आहे. ११. मत्त व उन्मत्त हीं सुंदरीच्या मुलांपैकीं दोघांचीं नांवें. १२. अनला नांवाची कन्या. १३. सुमालिन् व मालिन् यांचीं सुमालि व मालि अशींही रूपें दिलीं आहेत. १४. मर्त्यांनां (मानवानां) शत्रू. १५. राका, पुष्पोत्कटा, कैकसी व कुंभीनसी ह्या चार मुली. १६. वसुदा ही मालीची स्त्री. [स० ५ श्लो० ४१.] १७. हे बिभीषणाचे अमात्य.

अथ तैर्बहुधा[1] **ज**स्य वरदानेन पीडिताः ।
त्रिदशाः शरणं जग्मुर्भगवन्तं **म**हेश्वरम्. ॥ ४९

तानुवाच त्रिन[2] **य**नो, '[3]मैमावध्या हि तेऽसुराः ।
[4]शरणं गच्छत **ह**रिं हनिष्यति स तान्प्रभुः.' ॥ ५०

प्राप्योपायं[5] शंक**रा**त्ते देवा राक्षसपीडिताः ।
[7]शरण्यं शरणं जग्मु**र्वि**ष्णुं [8]प्रणतवत्सलम्. ॥ ५१

दत्त्वाभयं तान्सोऽ**म**[6]र्त्यांञ्शंखचक्रगदाधरः ।
स्वस्थानं प्रेषयामास तज्ज्ञात्वोवाच **मा**ल्यवान्. ॥ ५२

'भ्रातरौ! प्रार्थितः **श्री**शः सुरैः सोऽस्मान्निशाचरान् ।
हंतुं प्रतिज्ञां कृतवान्किं कर्तव्यमतःपरम्?' ॥ ५३

सुमालि**मा**लिनौ **रा**म! मत्तावूचतुरग्रजम्, ।
'हंतव्यास्त्रिदशा यैर्नो घातार्थं प्रार्थितोऽच्युतः.' ॥ ५४

इति कृत्वा मतिं **म**त्ता देवान्हन्तुं समुद्यताः ।
चतुरंगबलोपेता **लं**कायास्ते विनिर्गताः. ॥ ५५

तज्ज्ञात्वा [9]द्विजेरा**ज**स्य पृष्ठमारुह्य [10]चक्रभृत् ।
तानाससाद दुर्वृत्तान्हंतुं [11]मंतुं स्मरन्प्रभुः. ॥ ५६

शस्त्रैर्जघ्नुः प्रभुं **य**त्ता युगपत्सर्व एव ते ।
ततः [12]शार्ङ्गधनुर्मुक्तैः शरै[13]स्तानवधी**द्ध**रिः. ॥ ५७

[14]पाँचजन्यं [15]महा**रा**वं [16]प्रदध्मौ **पु**रुषोत्तमः ।
[17]पेतुस्ते राक्षसा भग्ना वाहनेभ्यो भयार्दिताः. ॥ ५८

त्रासयामास स **म**हा[18]न्शंखराजरवः परान् ।

---

१. ब्रह्मणः. २. त्रीणि नयनानि यस्य सः. त्र्यंबकः. ३. मया वधानर्हाः. सुकेश किंवा त्याचे पुत्र यांचा नाश करणें मला अनुचित आहे कारण मीच सुकेश याला वाढविला. 'विषवृक्षोऽपि संवर्ध्य स्वयं च्छेत्तुमसांप्रतम्.' मोरो० सं० रामायण, उत्तर० श्लो० ३७. ४. रक्षिता. ५. सर्ग ६ श्लो० ११ पहा. ६. मंत्रम्, सलाह. ७. शरणे साधुः तम्. शरणागताचें रक्षण करण्याला योग्य त्याजपाशीं. ८. भक्तवत्सलम्. ९. गरुडस्य. १०. चक्रधरः विष्णुः. ११. अपराधम्. १२. 'शार्ङ्ग' हें विष्णूच्या धनुष्याचें नांव. प्रसिद्ध वीरांच्या आयुधांचीं विशिष्ट नांवें सर्वत्र आढळतात. उदाहरणार्थ, गांडीव, भवानी (तरवार), Caduccus. १३. अ+हन् (वध)+लुङ् त् हन्ते वध लुङि २।४।४३. १४. हें विष्णूच्या शंखाचें नांव. १५. महान् रावः (ध्वनिः, शब्दः) यस्य तम्. १६. प्र+ध्मा+लिट् औ. वाजविता झाला. १७. पत्+लिट् अतुः. पडते झाले. १८. शंखानां राजा तस्य रवः.

मृगराजो महारण्ये [१]समदानिव कुंजरान् ॥ ५९
सुमाली [२]प्राप्तवि **ज** यं विष्णुं हंतुं धनुर्धरः ।
[३]ररास राक्षसो हर्षात्[४]सतडित्तोयदो यथा. ॥ ६०
सुमालिनो निर्भ **य** स्य सारथेरिषुणा शिरः ।
चिच्छेद त्रि[५]जगन्नाथो भ्रांतास्ते तस्य [६]वाजिनः. ॥ ६१
अथ [७]**मा**लिशरा [८]**जं** न्ये [९]कार्तस्वरविभूषिताः ।
[१०]विविशुर्[११]हरिमासाद्य [१२]क्रौंचं [१३]पत्ररथा इव. ॥ ६२
सो[१४]ऽर्द्यमानोऽपि सु **य** शा बहुभिर्**मा**लिनः शरैः ।
न चुक्षुभे रणे विष्णु[१५]र्जितेंद्रिय इ[१६]वाधिभिः. ॥ ६३
मालिनं त्रिदशा **रा** तिं क्रूरं वि[१७]मुखमाशुगैः ।
चकार पातयन्[१८]मौलिं ध्वजं चापं तुरंगमान्. ॥ ६४
जघान गदया [१९]**मं** ध्येललाटं स [२०]खगेश्वरम् ।
[२१]गरुत्मान्विमुखश्चक्रे[२२]ऽजितमाजौ पराङ्मुखम्. ॥ ६५
पराङ्मुखोऽपि स **श्री** श[२३]स्तिर्यग्वलितकंधरः ।
मालिनोऽपातयच्छीर्षं चक्रेणातुलतेजसा. ॥ ६६
हते मालिनि तौ **रा** जन्! **सुमाली माल्य**वानुभौ ।

---

१. मदोन्मत्तान्. २. प्राप्तो विजयो येन तम् । विजय प्राप्त झालेल्याला. ३. रस+लिट् अ. शब्द करिता झाला. ४. तडिता (विद्युता) सहवर्तमानः तोयदः (अंबुदः, वारिदः मेघः). ५. त्रयाणां जगतां नाथः त्रैलोक्यपतिः. ६. घोडे. ७. मालीचे बाण. ८. युद्धांत. ९. सुवर्णपुंखविभूषिताः १०. शिरते झाले. ११. प्राप्य. १२. हें एका अतिविस्तृत पर्वतदरीचें नांव. या ठिकाणीं कार्तिकेयानें क्रौंचनामक दैत्याला मारलें, तेव्हांपासून त्या दैत्याचे नांवानेंच ती पर्वतदरी प्रसिद्ध आहे. [मेघदूत–श्लो० ६१.] १३. पत्रं (पंख) रथ इव (गमनसाधनं) एषां ते पक्षिणः हंसाः इत्यर्थः. १४. अर्द+कर्मणि शानच्. पीड्यमानः. १५. जितानि इंद्रियाणि येन सः वशीकृतेंद्रियः. १६. आधिः=मानसी व्यथा त्यांहीं. १७. रणपराङ्मुख केला. १८. किरीटम्. १९. ललाटस्य मध्यदेशे. हें अव्ययीभावसमासाचें उदाहरण. पारे मध्ये षष्ठ्या वा. २।१।१८. २०. गरुडम्. खे (आकाशे) गच्छन्ति ये तेषामीश्वरम्. २१. गरुडः. २२. लढाईंत ज्याला जिंकला नाहीं त्याला गरुड स्वतः पराङ्मुख झाल्यामुळें त्यानें विष्णूला देखील पराङ्मुख केलें. कारण विष्णु गरुडावर होता. अन्वयः–गरुत्मान् (स्वयं) विमुखः (सन्) आजौ अजितमपि (विष्णुं) पराङ्मुखं चक्रे. २३. तिर्यक्+वलित+कंधरा+प्र० प्र०=पाठीमागें वळविल्यानें ज्याची वांकडी मान झाली आहे असा. तिर्यक् यथा तथा वलिता कंधरा येन सः.

सबलौ शोकसंतप्तौ लंकामेव प्रधावितौ. ॥ ६७

स गरुत्मान्महा **म** न्युः पक्षवातेन राक्षसान् ।
द्रावयामास देवोऽपि मर्मदारिगदेषुभिः. ॥ ६८

पेतुर्हताः सिंधु **ज** ले राक्षसाश्छिन्नमस्तकाः ।
माल्यवान्**के**शवं प्राह क्रोधप्रस्फुरिताधरः. ॥ ६९

'**ना**रायण ! त्वं सु **य** शाः क्षत्रधर्मं पुरातनम् ।
न वेत्स्ययुद्धमनसो भीतान्हंसि यथेतरः.' ॥ ७०

उवाच तेजसां **रा** शिः, 'सुराणामभयं मया ।
उत्सादनेन भवतां तदेतदनुपाल्यते.' ॥ ७१

शक्त्या **वि**ष्णुं बाहु **म** ध्ये स बिभेदाशु **मा**ल्यवान् ।
हरेरुरसि सा रेजे मेघस्थेव शतन्हदा. ॥ ७२

तामेव शक्तिमं **ज** नः प्रभुरुत्कृष्य तेजसा ।
चिक्षेप, सा **मा**ल्यवंतं बिभेदोरसि दारुणा. ॥ ७३

मोहं प्राप्तोऽपि का **य** स्य क्षतं सोऽगणयन्बली ।
आश्वस्तोऽभ्यवधीद्देवं पुनः शूलेन वक्षसि. ॥ ७४

तथैव देवरा **ज** स्य **मा**ल्यवान्मुष्टिनानुजम् ।
ताडयित्वा धनुर्मात्रमपक्रान्तो निशाचरः. ॥ ७५

---

१. सर्ग ७ श्लो० ४५ पहा. २. महान् मन्युः (क्रोधः) यस्य सः अतिक्रुद्धः. ३. पंखांच्या वाऱ्यानें. ४. पळविता झाला. द्रु+णिच्+लिट् आन् आस. ५. मर्माणि दारयति इति मर्मदारी तद्विधो गदो (रोगः) येभ्यस्ते मर्मदारिगदा इषवस्तैः. ६. छिन्नानि मस्तकानि येषां ते. ७. क्रोधामुळें ज्याचा अधरोष्ठ स्फुरण पावूं लागला आहे असा. [सर्ग ८ श्लो० २-५ पहा.] ८. क्षत्रियांचा धर्म. ९. न युद्धे मनो येषां तान्. युद्ध करण्याची ज्यांची इच्छा नाहीं अशांना. १०. भ्यालेल्यांना. ११. यथा इतरः (प्राकृतजनः सामान्य लोक.) १२. नाशाच्या द्वारें, उच्छेद करून. १३. 'शक्ति' नामक अस्त्राच्या योगानें. १४. विद्युत्. शतं ऱ्हदाः (शब्दाः) यस्याः सा. पृषो० ह्रस्वत्वम्. १५. जनेभ्यो भिन्नः । 'तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥' देवो विष्णुः इत्यर्थः. १६. ओढून काढून. १७. न (अ)+गण+शतृ+प्र० प्र०=लक्ष्यांत न घेऊन. १८. अभि+अ+हन् (वध)+लुङ्त्=आघात करिता झाला. १९. देवराजस्य अनुजम्=गरुडम्. मोरो० आदिपर्व, अध्याय ४ गीति १२८-१३६. वासवानुजम् (उपेन्द्रम्, विष्णुम्) असा अर्थ पुढील संदर्भाशीं जुळत नाहीं हें तेव्हांच सुज्ञ वाचकांच्या लक्ष्यांत येईल. कश्यपापासून अदितीच्या पोटीं वामनरूपानें विष्णु प्रकटला म्हणून इंद्रावरज. २०. धनुष्याचे लांबीइतका दूर. धनुस्+प्रमाणे मात्रच्+द्वि० प्र०=धनुः प्रमाणं यस्य तत् यथा तथा. २१. पाठीमागें सरला. २२. नक्तंचराः राक्षसाः.

विष्णुं खगेशं च **य**दा राक्षसोऽताडयत्पुनः ।
गरुडः पक्षवातेन सुदूरं तं[1]मपोहयत्. ॥ ७६

दृष्ट्वैवाग्रजमा[2] **रा**त्तं द्रावितं पक्षिणा तथा ।
सुमाली स्वबलैः सार्धं **लं**कामभिमुखो ययौ. ॥ ७७

गरुत्मतः पक्ष[3] **म**रुद्बलोद्धूतः स **मा**ल्यवान् ।
स्वबलेन समागम्य ययौ **लं**कां ह्रिया वृतः. ॥ ७८

एवं भग्ना रणे **श्री**मन्**राम**! ते बहुशोऽरयः ।
त्यक्त्वा **लं**कां गता वस्तुं[4] पातालं स्वजनावृताः. ॥ ७९

ये त्वयाद्य हता **रा**जन्! **पौ**लस्त्या[5] रजनीचराः ।
माल्यवत्प्रमुखाः सर्वे एतेभ्यो बलवत्तराः. ॥ ८०

न[6] चान्योऽद्भुतसा **म**र्थ्यो हंता लोकेषु राक्षसान् ।
विना **ना**रायणं **राम**! शंखचक्रगदाधरम्. ॥ ८१

राम! **ना**रायणोऽ**ज**[7]य्यः साक्षात्त्वं प्रभुरव्ययः ।
राक्षसान्हंतुमुत्पन्नः शरणागतवत्सलः[8]. ॥ ८२

कृतस्त्वया वधो **य**स्य राक्षसस्य **र**घूत्तम! ।
जन्म **प्र**भावं तस्य त्वं **रा**वणस्य निबोध मे. ॥ ८३

स **सु**माली सुर **रा**तिर्यदा यातो रसातलम्[9] ।
तदा धनाधिपो[10] **लं**कामावसत्पुत्रपौत्रवान्[11]. ॥ ८४

अथैकदा प्रभो! **म**[12]र्त्यलोकमादाय कन्यकाम् ।
सुमाली व्यचरत्पश्यन्वरं दुहितुरात्मनः. ॥ ८५

तदा **वि**श्रवसं **ज**[13]न्मप्रदं द्रष्टुं धनेश्वरम्[14] ।
गच्छंतं पुष्पकेनेड्य[15]मपश्यंल्लोकनायकम्[16]. ॥ ८६

---

१. उडविला. (गरुडानें.) २. दृष्ट्वा एव अग्रजं आरात् तम्. [स० ८ श्लो० १९.] ३. पक्षयो मरुतो बलेन उद्धूतः. पंखांच्या वाऱ्याच्या वेगानें उडून गेलेला. ४. वस्ती करण्यासाठीं. ५. पौलस्त्यस्य गोत्रापत्यानि पुमांसः, पौलस्त्याच्या वंशांत झालेले. ६. न च अन्यः अद्भुतसामर्थ्यः (अद्भुतं सामर्थ्यं यस्य सः). ७. न जेतुं शक्यः 'क्षय्यजय्यौ शक्यार्थे' ६।१।८१. ८. शरणं आगतेषु वत्सलः. ९. पातालम्. १०. धनदः, कुबेरः. ११. पुत्राश्च पौत्राश्च ते विद्यंते यस्य सः. १२. मनुष्यलोकम्. १३. जनकम्. जन्म प्रददाति इति तम्. १४. वैश्रवणम्, कुबेरम्. १५. ईड्यम्=पूजनीयम्. १६. लोकपालम्.

[1]सविस्मयोऽचिंत **य** त्स रक्षसां [2]श्रेयमुत्तमम्, ।
'किं कृत्वेत्येवम[3]चिराद्वर्धेमहि कथं वयम्?' ॥ ८७

अथाब्रवी[4]दात्म **ज** निं कैकसीं स रसातले, ।
'पुत्रि! [5]प्रदानकालस्ते न च विज्ञायते वरः. ॥ ८८

तत्त्वं विश्रवसं **य** त्वात्सेवया वरय स्वयम् ।
ई[6]दृशास्ते भविष्यंति पुत्राः पुत्रि! न संशयः.' ॥ ८९

सा तच्छ्रुत्वा वचो [7]**रा** त्रिंचरकन्या स्वयं ययौ ।
उपसृत्य [8]प्रदोषे तं [9]चरणाधोमुखी स्थिता. ॥ ९०

[10]विलिखंतीमथ **म** हीमंगुष्ठाग्रेण सुंदरीम् ।
विश्रवा वीक्ष्य पप्रच्छ, 'का त्वं कार्यं च किं तव.' ॥ ९१

एवमुक्ता तु सा **श्री** म[11]न्कृतांजलिरथाब्रवीत्, ।
'[12]आत्मप्रभावेण मुने! ज्ञातुमर्हसि मे मतम्. ॥ ९२

विद्धि मां [13]तपसां **रा** शे! [14]शासनात्पितुरागताम् ।
ब्रह्मर्षे कैकसीं नाम शेषं त्वं ज्ञातुमर्हसि.' ॥ ९३

तां ध्यात्वोवाच स, '**म** या विज्ञातं ते [15]मनोगतम् ।
सुताभिलाषो [16]मत्तस्ते [17]मत्तमातंगगामिनि! ॥ ९४

उपस्थिता मां [18]रं **ज** नीमुखे त्वं दारुणे ततः ।
[19]सविष्यसे [20]पृथुश्रोणि! राक्षसान्[21]क्रूरकर्मणः.' ॥ ९५

---

१. विस्मयाविष्टः. २. 'श्रेयमुत्तमम्' हा पाठ चिंत्य आहे. 'श्रेय उत्तमं' असा पाठ कल्पिला तर तो व्याकरणाच्या नियमाला अनुसरून आहे. ३. थोडक्याच काळांत आमची वृद्धि कशी होईल. 'कन्यापितृत्वं दुःखं हि सर्वेषां मानकांक्षिणाम्' असेंही मूळांत आहे. [स० ९ श्लो०१०.] ४. आत्मनो जनिर्यस्यास्ताम्. पुत्रिकाम्. ५. विवाहांत तुझें दान करण्याचा काळ आला आहे. ६. कुबेरासारखे. ७. नक्तंचरपुत्री. ८. प्रारब्धा दोषा यस्मिन् काले तस्मिन्. 'प्रदोषो रजनीमुखम्'. ९. अधःकृतं मुखं अधोमुखं चरणयोः अधोमुखं यस्याः सा. 'स्वांगात्' ४।१।५४. खालीं मान घालून पायांकडे पहात उभी राहिलेली. १०. पायांच्या अंगुष्ठानें माती उकरीत उभी होती तिला. हें एक अनुरागेंगित आहे. 'अंगुष्ठाग्रेण लिखति ब्रूते प्रियमधोमुखी' साहित्य-दर्पण—तृ० परिच्छेद. ११. कृतोंऽजलिर्यया सा. १२. आपल्या तपःसामर्थ्यानें. १३. तपोराशे. १४. आज्ञेनें. १५. मनांतील हेतु जाणला. १६. मजपासून. १७. मत्तः मातंगः (गजः) इव गच्छतीति. माजलेल्या हत्तीप्रमाणें डुलत डुलत व मंद मंद पावलें टाकणारी. 'कर्तर्युपमाने' ३।२।७९. १८. प्रदोषसमये संधिवेला सर्व कामांला वर्ज्य मानिली आहे. १९. सू+लुट् स्यसे. प्रसवशील. २०. हे नितंबवति. २१. द्वितीयानेकवचन.

साब्रवीत्सा[1]श्रुन **य** ना, 'भगवन्! [2]ब्रह्मवादिनः ।
त्वत्तः कुपुत्रान्नेच्छामि प्रसादं कर्तुमर्हसि.' ॥ ९६

सोऽब्रवीत्तां [3]पुष्क **रा** क्षीं [4]पश्चिमो यः सुतस्तव ।
[5]मम वंशानुरूपः स भविष्यति [6]शुभानने!' ॥ ९७

एवमुक्ता तु [7]स **म** ये [8]नीलांजनचयोपमम् ।
[9]दशास्यं [10]विंशतिभुजं जनयामास सा सुतम्. ॥ ९८

तस्य **राम**! यदा **ज** न्म तदोत्पाताः सुदारुणाः ।
बभूवुर्भूमिकंपाद्याः सर्वलोकभयप्रदाः. ॥ ९९

[11]कृतस्तथाव्हयो **य** त्स प्रसूतो **द**शकंधरः ।
[12]द्विर्बाहुरे[13]कवक्त्रश्च [14]कामरूपोऽपि सोऽभवत्. ॥ १००

तस्य त्वनंतरं [15]**ज** ज्ञे [16]कुंभकर्णो महाबलः ।
ततः [17]शूर्पणखा राम! धर्मात्मा स **बि**भीषणः. ॥ १०१

जातो **बि**भीषणो [18]**य** र्हि पुष्पवर्षं तदापतत् ।
[19]नभस्थाने दुंदुभयो देवानां [20]प्रणदंस्तथा. ॥ १०२

तावरण्ये महा **रा** ज [21]ववृधाते [22]महौजसौ ।
कुंभकर्ण**द**शग्रीवौ लोकोद्वेगकरौ तदा. ॥ १०३

---

१. अश्रुसहिते (साश्रुणी) नयने यस्याः सा. २. ब्रह्मवेत्त्यापासून. ब्रह्म (वेदं) वदतीति तस्मात्. ३. कमलाक्षीम्. पुष्करे इव अक्षिणी यस्यास्ताम्. ४. शेवटचा पश्चात् भवः. ५. मद्वंशानुरूप=माझ्या वंशाला शोभणारा. ६. शुभं आननं यस्यास्तत्संबुद्धौ हे शुभानने. [स० ९ श्लो० २७.] प्राकृत मंत्ररामायणांत माल्यवान् सुमालि इत्यादिकांचा कथाभाग **पं**तांनीं गाळिला आहे. ७. योग्यवेळीं. ८. काळ्या काजळाच्या ढिगाची उपमा ज्याला शोभते त्याला. ९. दश आस्यानि (मुखानि) यस्य तम्. १०. विंशतिः भुजाः यस्य तम्. ११. ज्या अर्थी तो दशग्रीवायुक्त जन्मला म्हणून त्याला तशा प्रकारचें नांव म्हणजे दशग्रीव असें नांव ठेवलें. तथा (दशकंधर इति) आह्वयो यस्य सः. १२. द्वौ बाहू यस्य सः. १३. एकं वक्त्रं यस्य सः. १४. इच्छाधीनविग्रहः कामतः रूपं यस्य सः. १५. जन्+लिट् ए 'गमहनजन–'इत्यादिना उपधालोपः ६।४।९८. १६.कुंभवत् कर्णौ यस्य सः. १७.शूर्पवत् (सुपाप्रमाणें) नखानि यस्याः सा 'नखमुखात्संज्ञायाम्' ४।१।५८ व 'पूर्वपदात्संज्ञायाम्'८।४।३. १८. यदा, ज्याकाळीं. [स० ९ श्लो० ३५.] १९. आकाशे. 'नभस्' शब्दाचीं तीन रूपें आकाश या अर्थी आढळतात:–नभ, नभस् व नभस्. २०. प्र+नद्+लङ् अन् 'अट्कुप्वाङ्नुम्व्यवायेऽपि' ८।४।२. 'संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥'. २१. वृध्+लिट् आते. वाढूं लागले. २२. महत् ओजः (बलं) ययोस्तौ.

[1]कुंभकर्णः प्र **म** त्तस्तु महर्षीन्धर्मवत्सलान् ।
भक्षयन्विचचारोग्रो [2]नैसंतुष्टो जगत्त्रये. ॥ १०४

बिभीषणः शुचिः **श्री** मान्नित्यं धर्मे व्यवस्थितः ।
[3]स्वाध्यायाहारनियतो बुद्धिमान्विजितेंद्रियः. ॥ १०५

अथ राजन्[4]राज **रा** ज[5]स्तत्र कालेन केनचित् ।
आगतः पितरं द्रष्टुं पुष्पकेण धनेश्वरः. ॥ १०६

तं दृष्ट्वा **कै**कसी **म** ग्ना दुःखे पुत्रं **द**शाननम् ।
प्राह, 'पश्य **द**शग्रीव! भ्रातरं [6]भाग्यशालिनम्. ॥ १०७

भ्रातृभावे समेऽ **ज** स्रं पश्यात्मानं [7]त्वमीदृशम् ।
तथा यत्नं कुरु यथा [8]भवे [9]**वै**श्रवणोपमः." ॥ १०८

स प्राह मातरं, '**य** त्नाच्छ्रीद[10]तुल्योऽधिकोऽपि वा ।
भविष्याम्योजसा मातः! संतापं त्यज [11]हृद्गतम्.' ॥ १०९

[12]स इत्युक्त्वांभोध[13] **रा** भ! तपोर्थे कृतनिश्चयः ।
दशग्रीवो ययौ **राम गो**[14]**कर्णं** [15]सानुजो [16]वशी. ॥ ११०

स **कुं**भकर्णः सु **म** हत्तपश्चक्रे महातपाः ।
[17]शीतवृष्टिसहो, ग्रीष्मे [18]पंचाग्नीन्परितः स्थितः. ॥ १११

---

१. 'कुंभकर्णस्तु प्रमत्तः' हा पाठ चुकीचा आहे. २. 'नसंतुष्टो' हें समस्तपद, असंतुष्टः हें सुप्समासाचें उदाहरण. ३. स्वाध्यायनियतः नियताहारश्च. नियमानें वेदपठन करणारा व नेमस्त जेवणारा. स्वाध्यायश्च आहारश्च तयोर्नियतः. वा० रामायणांत 'स्वाध्यायनियताहारः' असा पाठ आहे. ४. यक्षपतिः, कुबेर. ५. पितुराश्रमे. ६. भाग्येन शालते (शोभते) इति तम्. ७. कुबेरवद्दिव्यवैभवरहितम् प्राकृतरक्षोरूपमित्यर्थः. ८. भू+अ+ईः विधिलिङ्. ९. वैश्रवण उपमा यस्य सः. [स० ९ श्लो० ४३.] १०. धनदसमः कुबेरतुल्यः ११. हृदयांतील, मनांतील. हृदयं गतम्= हृदि स्थितम्. १२. रावणः, दशग्रीवः. १३. हे मेघनील. १४. वा० रामायणांत 'गोकर्णस्याश्रमम्' असा पाठ आहे. या गोकर्णाश्रमांत गोकर्णमहाबलेश्वर नांवाच्या शिवलिंगाची स्थापना कशी झाली ती कथा शिवलीलामृत–अध्याय ३ ओव्या ८४-१४३ यांत दिली आहे. याच आश्रमांत रावणादिकांनीं तपस्या केली व ब्रह्मदेवापासून अनेक वर प्राप्त करून घेतले. या संबंधानें श्रीधरस्वामींची कथा किंचित् भिन्न आहे, सेतु बांधण्याचे वेळीं रामानें स्थापिलेलें रामेश्वर नांवाचें शिवलिंग गोकर्णमहाबलेश्वराहून भिन्न आहे. १५. अनुजाभ्यां. सहितः १६. जितेंद्रियः. १७. शीतं वृष्टिं च सहते इति. थंडी व पर्जन्यवृष्टि यांतें सहन करणारा. १८. चार बाजूंला चार अग्नि व डोक्यावर सूर्य असे पांच अग्नि आपल्या सभोंवती स्थापून तपस्या करीत असे. पंचाग्नीन् परितः स्थापयित्वा. चार अग्नींसह सूर्य पांचवा असे पांच अग्नि, सूर्यसहित पंचाग्नि अथवा सूर्य ज्यांत पंचम आहे असे पंचाग्नि–असा अर्थ टीकेंत दिला आहे. [स० १० श्लो० ३ टीका पहा.]

तस्य साधुः सो[1]ऽनु **ज** न्मा नित्यं धर्मरतः शुचिः ।
पंच वर्षसहस्राणि पादेनैकेन [2]तस्थिवान्. ॥ ११२

तावतीश्च [3]समा **र्य** [4]त्तः स्वाध्याये [5]धृतमानसः ।
तस्था[6]वूर्ध्वशिरोबाहुः [7]सहस्रांशुं विलोकयन्. ॥ ११३

दशकंठोऽपि सोऽ **ज** स्रं [8]निराहारो [9]दृढासनः ।
पूर्णे वर्षसहस्रे स्वं शिरो वन्हौ जुहाव [10]ह. ॥ ११४

[11]छेत्तुकामोऽभूत्स **य** दा **द**शास्यो **द**शमं शिरः ।
[12]वरदस्त्रिदशैः सार्धं प्राप्तस्तत्र [13]पितामहः. ॥ ११५

अब्रवीत्तं [14]सुरा **रा** ध्यो, 'वरं [15]वरय [16]वांछितम् ।
[17]महासत्व! **द**शग्रीव! [18]सफलस्ते परिश्रमः.' ॥ ११६

पंचाग्निसाधन,' 'पंचाग्निसेवन' अथवा 'पंचाग्निधूम्रपान' हा एक तपश्चर्येचा प्रकार आहे. यांत साधकाच्या चार बाजूंला चार अग्नि पेटविलेले असून त्यांचा धूर सेवन त्यानें करावा असें आहे. या अग्नींचीं नांवें:—दक्षिणाग्नि, गार्हपत्य, आहवनीय, प्रणीत (संस्कृतअनल) आणि पांचवा अग्नि तपन. [स्तुतिकुसुमांजलि—स्तोत्र २० श्लोक २१ टीका.] रघुवंशाच्या तेराव्या सर्गांत सुतीक्ष्ण नामक ऋषीच्या पंचाग्निसाधनाचें वर्णन आहे तें असें:—"चोहींकडे ज्वलन पेटवुनी दुपारी, माथ्यावरी तपतसे जंव 'सूर्य भारी। बैसोनियां मुनि सुतीक्ष्ण म्हणोनि हा कीं, पंचाग्निसाधन करी अबले! विलोकीं ॥.' कुमारसंभवाच्या पांचव्या सर्गांत **पा**र्वतीच्या तपाचें वर्णन आहे. त्यांतही ग्रीष्मऋतूंत पार्वती चोहों बाजूस चार अग्नी पेटवून त्यामध्यें बसून सूर्याकडे एकसारखी टक लाऊन पाहात होती असा उल्लेख आहे. श्लोक २० पहा.] या 'पंचाग्निसाधन'रूप तपोविशेषांत सूर्य हाच पंचम अग्नि होय. [पंचमः पंचतपस्तपनो जातवेदसाम्' शिशुपालवध—सर्ग २ श्लोक ५१.]

१. सः (बिभीषणः) अनुजन्मा (अनुजः). २. हें तस्थिवस् शब्दाचें प्रथमा एकवचन. स्था+क्वसु. 'क्वसुश्च' ३।२।१०७ या सूत्रावरील भट्टोजीची वृत्ति पहा. ३. समाः=वर्षाणि. ह्या शब्दाचा बहुतकरून अनेकवचनीं प्रयोग होतो. हा शब्द स्त्रीलिंग आहे. तितकींच (५०००) वर्षें. ४. यत्नवान्, गुंतलेला. ५. नियतात्मा. धृतं मानसं येन सः. ६. ऊर्ध्वं स्थितं शिरो बाहू च यस्य सः. ७. सहस्ररश्मिम्, सूर्य. ८. नास्ति आहारो यस्य सः. ९. दृढं आसनं यस्य सः. एकदां बसला तो हजार वर्षें पर्यंत उठला नाहीं. १०. ह=ही गोष्ट सुप्रसिद्ध आहे. ११. छेत्तुं कामो यस्य सः, छेत्तुमनाः. १२. वर देणारा. १३. ब्रह्मदेव. १४. सुरैः (देवैः) आराध्यः (पूजनीयः). १५. वांछितम्=अभिकांक्षितम्, इष्टम्. १६. हें 'वृ' या चुरादिगणीय धातूचें लोट्लकाराचें रूप 'वृकचाथ वृञ संभक्तौ' इति कविकल्पद्रुमे. १७. महत् सत्वं (व्यवसायः) यस्य सः तत्संबुद्धौ हे महासत्व. १८. 'सफलोऽस्तु परिश्रमः' असा पाठ घेतला तर तो विशेष चांगला आहे. [स० १० श्लो० १४.]

हृष्टः स तस्मिन्स **म** ये प्रबद्धांजलिरब्रवीत्, ।
'नास्ति मृत्युसमः शत्रुरमरत्वमहं [1]वृणे.' ॥ ११७

ततः प्रोवाच तं **श्री** मान्भगवां[2]श्चतुराननः, ।
'नास्ति [3]सर्वामरत्वं ते, वरमन्यं वृणीष्व [4]मे.' ॥ ११८

एवमुक्ते तदा **रा** म! ब्रह्मणा लो[5]ककारिणा ।
दशग्रीव उवाचेदं कृतांजलिरथाग्रतः. ॥ ११९

'[6]सुपर्णयक्षाह्य **म** रदैत्यदानवरक्षसाम् ।
अवध्योऽहं [7]प्रजाध्यक्ष! भवेयं त्वत्प्रसादतः. ॥ १२०

अन्येषु चिंता त्व **ज**! मे नास्त्येवामरपूजित! ।
[9]तृणभूता हि मे सर्वे प्राणिनो मानुषादयः.' ॥ १२१

इत्थमुक्त[10]स्तत्प्रि **य** कृत्तमुवाच पितामहः, ।
'भविष्यत्येवमेतत्ते वचो [11]राक्षसपुंगव! ॥ १२२

हुतानि यानि [12]धी **रा** ग्नौ मस्तकानि त्वया पुरा ।
पुनस्तानि भविष्यंति तथैव तव राक्षस! ॥ १२३

कामरूपश्च स **म** ये भविष्यसि **द**शानन!' ।
एवमुक्तस्योत्थितानि तानि शीर्षाणि रक्षसः. ॥ १२४

अथाब्रवीत्**प**द्म **ज** स्तं [13]साध्वाचारं **बि**भीषणम्, ।
'परितुष्टोऽस्मि धर्मात्मन्! वरं वरय सुव्रत!' ॥ १२५

कृतांजलिः स प्र **य** तः प्राह लो[14]कगुरुः स्वयम्, ।
'प्रीतस्त्वं कृतकृत्योऽस्मि वृतः [15]सर्वगुणैरहम्. ॥ १२६

दातव्यश्चे[16]त्कंज **ज**! मे वरस्तच्छृणु वत्सल! ।

---

१. 'वृणे' हें 'वृ' या क्र्यादिगणीय धातूचें लट्लकाराचें रूप. मूळांत हें अर्थ असेंच आहे. [स० १० श्लो० १६.] २. चत्वारि आननानि (मुखानि) यस्य सः चतुर्मुखः ब्रह्मा. ३. सर्वतो निमित्तात् सर्वस्मिन्नपि काले मरणराहित्यम्. ४. मत्तः=मजपासून. हें अर्थ वा० रामायणांत आहे. [स० १० श्लो० १७ पहा.] ५. विश्वसृजा. हा श्लोक वा० रामायणांत आहे. [स० १० श्लो० १८.] ६. सुपर्ण+यक्ष+अहि+अमर+दैत्य+दानव+रक्षस्+ष० प्र०. ७. हे प्रजापते. ८. तु अज (हे ब्रह्मन्). ९. तृणतुल्याः. १०. तत्+प्रिय+कृत्=त्याचें प्रिय करणारा. ११. हे राक्षसश्रेष्ठ. १२. (हे) धीर! अग्नौ. १३. साधुः आचारः यस्य तम्. १४. लोकपितामहः. १५. सर्वैः पुरुषार्थैः त्वत्प्रीतेरेव सर्वपुरुषार्थसाधनत्वात्. १६. हे कंजज=हे कमलयोने.

परमापद्गतस्यापि[1] धर्मे[2] भवतु मे मतिः. ॥ १२७

अस्त्रेषु प्रवरं[3] **य** त्त्प्रसादात्तव वत्सल! ।
अशिक्षितं[4] च ब्रह्मास्त्रं[5] भगवन्! प्रतिभातु मे. ॥ १२८

सदा धर्मनया[6] **रा** मा धर्मपालनसादरा ।
सर्वत्र बुद्धिर्मे देव! भवतु त्वत्प्रसादतः.' ॥ १२९

तमाह देवः स **म** हान्, 'सर्वमेतद्भविष्यति ।
राक्षसोऽप्यसि साधुस्त्वममरत्वं ददामि ते.' ॥ १३०

कुंभकर्णाय च **श्री** मान्वरं दातुमवस्थितः ।
तं देवं परमत्रस्ताः प्राहुः प्रांजलयः सुराः. ॥ १३१

'कुंभकर्णेनाम **रा** घ! महेंद्रानुचरा दश ।
नंदने[8]प्सरसः सप्त भक्षिता ऋषयोऽप्यज! ॥ १३२

भक्षिता बहवोऽ **म** र्त्या एवंवीर्यो[9] वरादृते[10], ।
एष लब्धवरः[11] स्याच्चेद्भक्षयेद्भुवनत्रयम्. ॥ १३३

वरव्याजेना[12][13]ब्ज **ज** ने! मोहोऽस्मै[14] दीयतां प्रभो! ।
लोकानां स्वस्ति[15] चैवं स्याद्भवेदस्य च संमतिः[16].'॥ १३४

एवमुक्तोऽचिंत **य** त्स ब्रह्मा देवहिते रतः ।
चिंतिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती. ॥ १३५

विधिस्तामाह धी **रा** णां भवतामिष्टकारिणीम्, ।
'वाणि! त्वं राक्षसेंद्रस्य भव वाग्देवतेप्सिता[17].' ॥ १३६

तथेत्युक्त्वा हृष्ट[18] **म** तिः प्रविष्टा सा सरस्वती ।
धाता तमाह, 'वत्स! त्वं वरं वरय यो मतः.' ॥ १३७

---

१. मोठ्या आपत्तींत पडलेल्याची देखील. २. नारायणे रामो विग्रहवान् धर्मः. ३. श्रेष्ठम्. ४. सद्गुरूपदेशं विना. ५. ब्रह्मविद्या. ६. धर्म व नीति हींच जिचीं विहार करण्याचीं स्थलें (आराम) आहेत अशी (बुद्धि). धर्मश्च नयश्च तावेव आरामो यस्याः सा. ७. अमर+आद्य. हें संबोधनपद आहे. ८. हें इंद्राच्या उपवनाचें नांव. ९. एवं वीर्यं यस्य सः. १०. वरात् ऋते=वराशिवाय. ११. लब्धो वरो येन सः. १२. वराच्या मिषानें. १३. हे अब्जजने=हे कमलयोने. १४. अज्ञानम्. १५. स्वस्ति हें क्षेम या अर्थी अव्यय आहे. १६. संमाननम्. १७. याचतः कुंभकर्णस्य वदनात् देवानुकूला निःसर. १८. हृष्टा मतिर्यस्याः सा.

स कैकस्या आत्म **ज** स्तं प्रभुं तन्मोहितोऽब्रवीत्[1], ।
'[1]स्वप्तुं वर्षाण्यनेकानि देवदेव! ममेप्सितम्.' ॥ १३८

'तथे'ति [2]कृतमा **य** स्तं प्रोक्त्वा प्रायात्पितामहः ।
सरस्वती जहौ कृत्वा देवकार्यं निशाचरम्. ॥ १३९

दशकंठस्यानु **ज** श्च चिंतयामास दुःखितः, ।
'ईदृशं किमिदं वाक्यं ममाद्य वदनाच्च्युतम्? ॥ १४०

[3]हंताहं मोहितो **य** त्नाद्देवैर्मन्ये समागतैः ।
एवं गते किं कर्तव्यं वंचितेन मयारिभिः?' ॥ १४१

लब्ध्वा वरान्[4]खेचरै **रा** स्ते न्यवसन्पितुराश्रमे ।
तदाकर्ण्य प्रहृष्टात्मा [5]सुमाली [6]तानुपागतः. ॥ १४२

मातामहः स कु **म** तिस्तं दशग्रीवमब्रवीत्, ।
'दिष्ट्या वत्स! त्वया प्राप्तश्चिंतितोऽयं मनोरथः. ॥ १४३

त्यक्त्वा लंकां वयं [7]**श्री** शात्त्रस्ताः प्राप्ता रसातलम् ।
[8]तद्गतं नो महाबाहो! महद्विष्णुकृतं भयम्. ॥ १४४

लंकायां रक्षसां **रा** जा भव त्वमधुना बली, ।
[9]त्वया राक्षसवंशोऽयं निमग्नोऽपि समुद्धृतः. ॥ १४५

धनेश्वराल्[10]लब्ध **म** हा लंकामाच्छिद्य तेजसा ।
अस्माभिः सचिवैर्युक्तो राज्यं त्वं भोक्तुमर्हसि.' ॥ १४६

उवाच [11]विश्रवो **ज** स्तं [12]मातुस्तातं सुमालिनम्, ।
'वित्तेशो गुरुरस्माकं वक्तुमर्हसि नेदृशम्.' ॥ १४७

---

१. हें अर्ध वा० रामायणांत आहे. [स० १० श्लो० ४५.] २. कृता माया (छद्म, कापट्यं) येन सः. ३. हंत=अरेरे, अहह. ४. खे (आकाशे) चरंति ये ते देवाः=पूर्वदेवाः=असुराः, राक्षसाः किंवा देव व राक्षस आकाशमार्गानें गमन करूं शकतात म्हणून येथें खेचर म्हणजे राक्षस असा अर्थ घ्यावा, किंवा आई राक्षसी व बाप महामुनि असल्यामुळें ही संतति खेचरासारखी होती असें गमतीनें म्हटल्यास काय बाध आहे? ५. हें रावणाच्या मातामहाचें नांव. [सर्ग ११ श्लो० १-९.] ६. उपागतवान्. 'गत्यर्थाकर्मक–'इत्यादिना ३।४।७२. ७. श्रीशात् त्रस्ताः. 'भीत्रार्थानां भयहेतुः' १-४-२५. ८. तत् (विष्णुकृतं भयं) गतम्. ९. हें अर्ध वा० रामायणांत आहे. १०. लब्धं महः (तेजः) येन सः. ११. विश्रवस्+जः=विश्रवा यापासून जन्मलेला, दशानन. १२. मातामहम्.

ततः **प्र**हस्तो [1]न **य** वि[2]द्दैत्यादित्यात्मजन्मनाम् ।
[3]भ्रातृद्रोहात्मकं वृत्तं [4]कथयामास विस्तरात्. ॥ १४८
चिंतयित्वा तद्दु **रा** त्मा **प्र**हस्तस्य वचस्ततः ।
दशास्यो [5]बाढमित्युक्त्वा स [6]लंकोपवनं गतः. ॥ १४९
तं **प्र**हस्तं दूत **म** र्थमुक्त्वा [7]वैश्रवणांतिकम् ।
प्रेषयामास [8]साम्ना मे **लं**कां [9]देहीति भाषितुम्. ॥ १५०
स गत्वा [10]राजरा **ज** स्य समीपं तमथाब्रवीत्, ।
'प्रेषितोऽहं तव भ्रात्रा **द**शग्रीवेण सुव्रत ! ॥ १५१
भ्राता ब्रवीति ते **य** त्स [11]तत्त्वं मम मुखाच्छृणु, ।
सुमालिप्रमुखैर्लंका [12]भुक्तपूर्वा निशाचरैः. ॥ १५२
लंका [13]तदेषा र **ज** नीचराणां साधु दीयताम्, ।
तमाह धनदः, 'पित्रा दत्ता शून्या निशाचरैः ॥ १५३
निवेशिता मया **य** त्नादानमानादिभिर्गुणैः ।
गच्छ ब्रूहि **द**शग्रीवं प्रहस्त ! त्वं वचो मम. ॥ १५४
लंकापुरी तथा **रा** ज्यं यच्च द्रव्यमुपार्जितम् ।
तवाप्येतन्महाबाहो ! भुंक्ष्वेदं त्वम[14]कंटकम्. ॥ १५५
[15]अविभक्तं वसु **म** म राज्यं चेदं त्वया सह.' ।
एवमुक्त्वा धनाध्यक्षो जगाम पितुरंतिकम्. ॥ १५६
अभिवाद्य गुरुं **श्री** दः प्राह भ्रातुर्यदीप्सितम्. ।
स प्रांजलिं सुतं प्राह, 'शृणु पुत्र ! वचो मम. ॥ १५७

---

१. राजनीतिनिपुण. २. दैत्य+अदिति+आत्म जन्मन् प्र० दैत्यांची व अदितीच्या मुलांची कथा. 'दित्यदित्यात्मजन्मनाम्' हा कल्पित पाठ विशेष चांगला आहे. ३. भ्रातॄणां द्रोहः आत्मा यस्य तत्. 'शेषाद्विभाषा' ५।४।१५४. ४. वा० रा० उत्तर० स० ११ श्लो० १४ 'सौभ्रात्रं नास्तिशूराणाम्.' ५. ठीक आहे. ६. लंकेच्या उपवनांत. ७. कुबेराकडे. ८. सामोपायानें. साम, दान, दंड व भेद या राजनीतींत सांगितलेल्या चार उपायांची योजना शत्रूला हस्तगत करण्यासाठीं करावी, एकदम दंडोपायाचीच योजना करूं नये, असें सांगितलें आहे तें व्यवहारोचितच आहे. म्हणून प्रथमतः सामोपायाची योजना रावणानें केली. ९. दा+लोट् हि, देहि=दे. १०. यक्षाधिपस्य, कुबेरस्य. ११. तत् त्वं. १२. पूर्वं भुक्ता. 'पूर्वं भूतपूर्वे' ६।२।२२. १३. तत्=तस्मात्. १४. निःसपत्नम्, ज्यांत कंटकाप्रमाणें दुःख देणारा शत्रु नाहीं असें. १५. तुझें आणि माझें कांहीं वांटलेलें नाहीं, जें माझें तें तुझें व तुझें तें माझें.

[1]लंकापुरापहा **रा** र्थमुक्तवान्मम संनिधौ ।
मया निर्भर्त्सितश्चासौ बहुशो न शमं गतः. ॥ १५८

[2]वरप्रदानसं **म** त्तो [3]मान्यामान्यं न वेत्ति सः ।
क्रूरात्मा मम [4]शापाच्च दारुणां प्रकृतिं गतः. ॥ १५९

कैलासं राजरा **ज** ! त्वं गच्छ तात ! सहानुगः ।
निवेशय पुरं तत्र निवासार्थं सुखी भव.' ॥ १६०

पित्रैवमुक्तः सु **य** शाः कैलासं गिरि[5]शालयम् ।
सदारपुत्रसचिवः सधनः सानुगो गतः. ॥ १६१

प्रहस्तोऽथ [6]मुदा **रा** त्रिचराधीशं दशाननम् ।
प्राह, 'लंकापुरी शून्या त्यक्त्वैनां धनदो गतः.'॥ १६२

दशाननः [7]प्राप्त **म** हः सानुजः सबलस्तदा ।
विवेश स सुहृत्त्यक्त्वा शंकां लंकां [8]महामहाः. ॥ १६३

तत्राभिषिक्तः स्व **ज** नैरवसद्दशकंधरः. ।
[9]अलकायां च कैलासे रचितायां धनेश्वरः. ॥ १६४

वि[10]द्युंज्जिव्हाभिधा **य** स्वां [11]स्वसारं दानवाय सः ।
ददौ शूर्पणखां प्रीत्या कालकेयाय [12]राक्षसः. ॥ १६५

[13]मंदोदरीं [14]मय **ज** निं [15]वृवृवान्दशकंधरः ।
[16]मायाविदुंदुभ्यनुजां हे[17]माकुक्षिसमुद्भवाम् ॥ १६६

---

१. लंकापुराचा अपहार करण्याविषयीं. २. वरप्रदानाच्या योगानें अति मातलेला. ३. या पाठाचे जागीं 'ऽमान्यं मान्यं' असा कल्पित पाठ विशेष चांगला आहे, कारण जेथें इतरेतरद्वंद्व पाहिजे तेथें समाहारद्वंद्व करणें हें अर्थाला बाधक आहे. ४. तन्मातृदर्शनकालकृतात्. वा० रा० उत्तर० स० ९ श्लो० १५-२३. गिरौ शेते इति गिरिशः (शिवः) तस्य आलयः तम्. गिरौ 'डश्छन्दसि' इति वार्तिकम् ३।२।१५ अथवा गिरिः अस्य अस्ति इति लोमादित्वात् शः. ६. मुद् या हलन्त स्त्रीलिंग शब्दाचें तृतीयैकवचन. हर्षानें. ७. प्राप्तः महः (उत्सवः आनंदः) येन सः. ८. महत् महः. (हा हलंत नपुंसकलिंग शब्द आहे. बलम् यस्य सः महाबलः. ९. अलका हें कुबेराच्या पुरीचें नांव. १०. विद्युजिव्ह इति अभिधा यस्य तस्मै. [प्राकृत मंत्ररामायण—उत्तरकांड—गीति ५५-५७ पहा.] ११. ही स्वसृ शब्दाची द्वितीया. भगिनीला. १२. रावणः. १३. मंदं (कृशं) उदरं यस्याः ताम् मंदोदरी किंवा मंदोदरी (मंडनभूतं उदरं यस्याः सा). ही राक्षसांचा शिल्पी जो मय त्याची कन्या. १४. मयात् जनिः (उत्पत्तिः) यस्याः ताम्. १५. परिणीतवान्. वृ+क्तवतु+प्र० प्र० वा० रा० उत्तर० स० १२ श्लो० ३-२१. १६. मायाविन् व दुंदुभि यांची धाकटी बहीण. ही हेमा नांवाच्या अप्सरेपासून जन्मली होती. १७. हेमायाः कुक्षौ समुद्भवो यस्यास्ताम्. [सर्ग १२.]

वैरोचनस्य[1] प्र **थ** तां दौहित्रीं[2] समकल्पयत् ।
वज्रज्वालाभिधां भार्यां **कुं**भकर्णस्य **रा**वणः. ॥ १६७
गंधर्वाणां तथा **रा** ज्ञः शैलूषस्य[3] महात्मनः ।
सरमां[4] नाम धर्मज्ञां भार्यां लेभे **बि**भीषणः. ॥ १६८
मंदोदरीयशो[5] **म** त्रं द्योः पाथोदमिवातुलम्[6] ।
पुत्रं महेंद्रजेतारं **मे**घनाद[7]मजीजनत्[8]. ॥ १६९
जातमात्रेण[9] हि **श्री** मंस्तेन **रा**वणसूनुना ।
रुदता[10] सुमहान्मुक्तो नादो घनरवोपमः[11]. ॥ १७०
स मत्तो रक्षसां **रा** जा जगत्पीडामथाकरोत्[12] ।
तच्छ्रुत्वा धनदो[13] दूतं प्रेषयामास कोविदम्[14]. ॥ १७१
तत्संदेशं स सु **म** तिः कथयामास तद्धितम्[15], ।
'मैवं कुरु जगत्पीडां धर्म[16] एव स्थितिर्हिता. ॥ १७२
निराकृतोऽस्म्यग्र[17] **ज** स्ते बहुशो राक्षसाधिप ! ।
सापराधोऽपि बालो हि रक्षितव्यः स्वबांधवैः. ॥ १७३
कैलासे वसतो[18] **य** न्मे वृत्तं शृणु **द**शानन ! ।

---

१. विरोचनपुत्र जो बली राजा त्याची. २. दुहितुः पुत्रीम्. ३. शैलूष नामक गंधर्वाची कन्या. हिची आई मानससरोवरासमीप प्रसूत झाली असतां, जलदागमामुळें पाणी वाढून तें ह्या मुलीपर्यंत आलें. तेंव्हां मूल भय पावून रडूं लागली; तें ऐकून आई कन्यास्नेहानें म्हणाली, 'सरो मा वर्धत' (सरोवरा! वाढूं नको), मग पाणी कमी झालें. 'सरो मा' या शब्दांवरून सरमा असें हिचें नांव पडलें. (उत्तरकांड, स० ७ श्लो० २४-२६.) ४. सरो मा वर्धतेत्युक्तं ततः सा सरमाभवत्. वा०रा० उत्तर०स०१२ श्लो० २५-२७. ५. मंदोदरी+यशस्+अमत्र+द्वि० प्र०=मंदोदरी यशाचें ताट (अमत्र=भांडें, भोजनपात्र, भाजन). ६. पाथः (हलन्त नपुंसकलिंग जलवाची शब्द) ददाति इति तम्. जलदम्. ७. 'जातमात्रेण हि पुरा तेन रावणसूनुना । रुदता सुमहान् मुक्तो नादो जलधरोपमः ॥ पिता तस्याकरोन्नाम मेघनाद इति स्वयम् ॥' वा० रा० उत्तर० स० १२ श्लो० २९-३१. ८. जन्+णिच्+लुङ् त्. ९. जातेन एव केवलार्थे मात्रच् प्रत्ययः. १०. 'रुदता' याचे जागीं मूळांत 'स दत्तो' असा पाठ होता तो लेखकाच्या प्रमादामुळें असावा. ११. घनस्य रवः (गर्जितं) उपमा यस्य सः. १२. अथ=अनंतरम्. १३. धनं दयते (रक्षति) इति वैश्रवणः. १४. पंडितं दूतं सौभ्रात्रदर्शनार्थं प्रेषयामास. १५. तस्मै (रावणाय) हितं (हितकरम्). १६. धर्मे. १७. अनेक प्रकारांनीं जरी मला त्वां दूर केलें आहेस. १८. वस्+शतृ+ष०प्र०.

तत्र देवो मया दृष्ट उमया[1] सहितः प्रभुः[2]. ॥ १७४
सव्यं[3] चक्षुर्मया **रा** जन्! दैवाद्देव्यां निपातितम् ।
को[5] न्वेषेत्येव सहजं न खल्वन्येन हेतुना. ॥ १७५
जगद्धात्र्यास्तु[6] सु **म** हत्तेजो निरुपमं हि तत् ।
देव्या दिव्यप्रभावेण दग्धं सव्यं ममेक्षणम्. ॥ १७६
भगवत्यास्तु ते **ज** स्तद्द्रष्टुं चक्षुर्न मे क्षमम् ।
रेणुध्वस्तमिव ज्योतिः पिंगलत्वमुपागतम्. ॥ १७७
ततो गतोऽहं नि[9] **य** तस्तटं तस्य गिरेः परम् ।
तूष्णीं वर्षशतान्यष्टौ सुव्रतं समधारयम्[10]. ॥ १७८
समाप्ते नियमेऽ[11] **ज** न्मा तत्र देवो महेश्वरः ।
ततः प्रीतेन मनसा प्राह वाक्यमिदं प्रभुः, ॥ १७९
'प्रीतोऽस्मि जनिता[12] **य** त्वत्तपसानेन सुव्रत! ।
मया चैतद्व्रतं चीर्णं त्वया[13] चापि मदुत्थितम्[14]. ॥ १८०
व्रतादस्माद्दुष्क **रा** त्वं सखा भव ममानघ! ।
पिंगलत्वमवाप्तं यच्चक्षुर्देव्या[15] निरीक्षणात्. ॥ १८१

---

१. 'उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम' याप्रमाणें उमा शब्दाचें निर्वचन कालिदासानें कुमारसंभवांत (सर्ग १) केलें आहे. उमया=पार्वत्या. २. कर्तुमकर्तुमन्यथाकर्तुं समर्थः. ३. डावा डोळा. ४. दैवगतीनें. ५. कोण बरें ही असावी अशी जिज्ञासा झाल्यामुळें दिव्यरूप घेऊन रुद्राणी त्या स्थळीं संचार करीत असे, हें जिज्ञासेला कारण. ६. जगत्+धातृ+ङीष्+ष० प्र०=जगाचें पालन करणारीचें, जगत्+धात्री (माता)+ष० प्र० जगन्मातुः. ७. सव्येतरत्तु रेणुध्वस्तं रेणुस्पर्शकलुषीकृतम्, यद्वा कलुषितज्योतिरिव. ८. 'ज्योतिःपिङ्गलत्वं' असें समस्तपद घेऊन 'ज्योतिषा (तेजसा) पिङ्गलं तस्य भावस्तत्त्वम्' असा अर्थ करावा, किंवा 'रेणुध्वस्तं ज्योतिरिव' असा अन्वय करावा. कुबेराच्या दोनही डोळ्यांना विकार झाला होता ही कल्पना टीकाकारानें वा० रामायणाच्या आधारानें केली आहे असें दिसतें. 'एकाक्षिपिङ्गलीत्येव नाम स्थास्यति शाश्वतम्.' आम्हांला तर वाटतें कीं कुबेराच्या सव्य नेत्रालाच पिङ्गत्व आलें, म्हणून त्याला 'एकपिङ्ग' असें नांव पडलें. वा० रामायणांतील 'एकाक्षिपिङ्गली' या कुबेररूप सामासिक पदाचा वरीलप्रमाणें अर्थ करतां येईल. ही कुबेराची कथा प्राकृत मंत्ररामायणांत पंतांनीं वर्णिली नाहीं. ९. वशीकृतेंद्रियः- १०. सर्ग १३ श्लो० २१-२४ पहा. ११. न जन्म यस्य सः. १२. जनितोऽयः (शुभं) येन तत् । तव तपः त्वत्तपः । जनितायं त्वत्तपः तेन हें हेतुगर्भपद भाविमंगलसंपत्तिसूचक आहे हें संदर्भावरून स्पष्ट आहे. १३. आचरितं: चर+नक पृषोदरादित्वात् अत ईत्वम्. १४. मया उत्पादितम्. अशा प्रकारचें दुष्कर व्रत त्वां व म्यां च काय तें केलें. [स० १३ श्लो० २७-२८.] १५. 'देव्या' ही कर्मणि षष्ठी. 'कर्तृकर्मणोः कृति' २।३।६५.

ऐकपिंगेति[1] ना **म** त्वं प्राप्य ख्यातो भविष्यसि ।
एवं प्राप्तप्रसादेन लब्ध्वानुज्ञां च **शंकरात्** ॥ १८२

आगतेन मया **श्री** मन्! श्रुतस्ते पापनिश्चयः ।
तदधर्मान्निवर्तस्व मृत्युदात्[2]कुलदूषणात्. ॥ १८३

संनियम्य मनो **रा** जन्! पुण्यां कीर्तिमुपार्जय, ।
चिंत्यते हि वधोपायः सर्षिसंघैः सुरैस्तव.' ॥ १८४

एवमुक्तः क्रूर **म** तिः कोपसंरक्तलोचनः ।
हस्तान्दंतांश्च[3] संपिष्य **द**शास्यो वाक्यमब्रवीत्. ॥ १८५

'ज्ञातं वचस्ते सु[4] **ज** ड! ब्रूहि मा पुनरीदृशम् ।
नैवं[5] त्वमसि नैवासौ भ्राता येनासि चोदितः. ॥ १८६

रुद्रसख्यं श्राव[6] **य** ते मूढो ब्रूते न मे हितम् ।
तन्नैव क्षमणीयं मे यदेतद्भाषितं त्वया. ॥ १८७

न हंतव्यो राज **रा** जो ज्येष्ठो भ्रातेति मर्षितम् ।
त्रींल्लोकानपि जेष्यामि तस्यैकस्य कृतेऽचिरात्. ॥ १८८

तेन सार्धं तान्यै[7] **म** स्य क्षयं नेष्यामि लोकपान्[8].' ।
इत्युक्त्वात्तुं[9] ददौ हत्वा दूतमाज्ञां स रक्षसाम्. ॥ १८९

भंक्त्वाज्ञां राजरा **ज** स्य वरसंपन्मदोद्धतः[10] ।
सेनामाज्ञापयामास रक्षसां कामरूपिणाम्. ॥ १९०

ततः कृतस्वस्त्य[11] **य** नो रथमारुह्य **रा**वणः ।
त्रैलोक्य[12]विजयाकांक्षी ययौ यत्र धनेश्वरः. ॥ १९१

---

१. एकं (नेत्रं) पिङ्गं यस्य सः । एकपिङ्गः इति नाम यस्य सः तस्य भावः तत्वम्. किंवा 'एकपिङ्गेतिनाम त्वं' असा पदच्छेद करावा. (किंवा 'एकपिङ्गः इति नाम त्वं' असा पदच्छेद सर्वांत उत्तम आहे, परंतु 'संधिसूत्रेण लुपि न संधिः' या नियमानें पुनः संधि करतां येत नाहीं. 'एकपिङ्ग इति' असें पाहिजे. आर्षप्रयोग मानावा म्हणजे चुकला त्रास. 'सिद्धस्य गतिश्चिंतनीया' या न्यायानें या अपप्रयोगाबद्दल कसा तरी मार्ग काढावा लागला. २. मृत्युं ददाति इति तस्मात्. ३. हात चोळून व दांत चावून. [स० १३ श्लो० ३४-३९.] ४. हे महामूर्खा. ५. येन भ्रात्रा चोदितः असि, असौ (भ्राता) त्वं च न एव असि (=भविष्यसि) असा अन्वय. भ्राता जिवंत राहणार नाहीं व तूंही जिवंत राहणार नाहींस. ६. शिवाशीं मैत्री आहे असें मूर्ख मला कळवीत आहे. ७. यमाच्या आलयाला. ८. लोकान् पांतीति तान् लोकपालान्. ९. स इत्युक्त्वा दूतं हत्वा (तं) अत्तुं रक्षसां आज्ञां ददौ—असा अन्वय. १०. वराच्या ऐश्वर्यमदानें उन्मत्त झालेला. ११. प्रास्थानिक मंगलकृत्यें ज्यानें केलीं आहेत असा. १२. त्रयाणां लोकानां समाहारः त्रिलोकी, त्रिलोकी एव त्रैलोक्यम् तस्य विजयमाकांक्षते इति. 'द्विगोः' ४।१।२१.

बलेन यक्षान **ज** यन्[१]माणिभद्रमुखान्रणे ।
जहार पुष्पकं जित्वा माययास्त्रैश्च सोऽग्रजम्. ॥ १९२

वार्यमाणो मया, '**य** त्त्वं नावगच्छसि दुर्मते! ।
पश्चादस्य फलं प्राप्य त[२]प्स्यसे नि[३]रयं गतः.' ॥ १९३

इति शप्त्वा [४]राज **रा** जो युद्धं तेन सहाकरोत् ।
पपात मूर्च्छितो नीतः स यक्षैर्नंदनं वनम्. ॥ १९४

आरुह्य पुष्पक **म** थ प्रहृष्टः स **द**शाननः ।
जितं त्रि[५]भुवनं मेने [६]गर्वोत्सेकात्सुदुर्मतिः. ॥ १९५

ततः [७]शरवणे **श्री** मत्पुष्पकं ब्रह्मनिर्मितम् ।
दिव्यं नि[८]रुद्धसंचारमभवत्सहसाद्भुतम्. ॥ १९६

'[९]कुतो नु स्तंभितं **[१०]रा** जव्योमयान'मिति स्वकैः ।
[११]मीमांसमाने सचिवैः सह तस्मिन्**द**शानने. ॥ १९७

नंदीश्वरो[१२]ऽमित **म** हा आजगाम त्रि[१३]शूलभृत् ।
उवाच स त[१४]मुत्सिक्तं राक्षसेंद्रमशंकितः. ॥ १९८

'निवर्तस्वाशु र **ज** नीचर! क्रीडति **शं**करः ।
प्रभुणा सर्वभूतानामगम्योऽयं कृतो गिरिः.' ॥ १९९

तच्छ्रुत्वा रक्तन **य** नः पुष्पकादवरुह्य सः ।
'कोऽयं **शं**कर' इत्युक्त्वा तं दृष्ट्वा [१५]वानराननम् ॥ २००

---

१. माणिभद्रो मुखं (प्रधानः श्रेष्ठः) येषां तान्. [सर्ग १५ श्लो० १-१५.] २. संताप पावशील. तप+लृट् स्यसे. ३. नरकम्. ४. राज्ञां यक्षाणां राजा=राजराजः=कुबेरः. [राजा=यक्षः. 'राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः । 'राजराजो धनाधिपः' इत्यमरः.] ५. त्रयाणां भुवनानां समाहारः=त्रिभुवनम्. ६. गर्वोद्रेकात्. गर्वानें फुगल्यामुळें. [सर्ग१५ श्लो० ३९-४०.] रावणकुबेरसंग्रामाची कथा पंतांनीं प्राकृत मंत्ररामायणांत सांगितली नाहीं. प्राकृत मंत्ररामायणांत अनेक कथाभागांचा संक्षेप केला आहे आणि कोठें कोठें तर ते भाग अजीबाद गाळले आहेत. ७. शराणां वनम्. 'प्रनिरंतःशर–' इत्यादि ८।४।५. ८. निरुद्धः संचारो यस्य तत्, कुंठितगति. ९. कोणत्या कारणामुळें बरें. १०. व्योम्नि संचारकं यानं, तेषां राजा 'राजदंतादिषु परम्' २।२।३१ या नियमानें व्योमयान शब्दाचा परनिपात झाला. राजदंतादि हा आकृतिगण आहे. ११. मान्+स्वार्थे सन्+शानच्+सप्त० प्र०, विचार करीत असतां. १२. अमितं महो यस्य सः. १३. त्रीणि शूलानि यत्र तत् बिभर्ति इति. त्रिशूलम्=Trident. १४. गर्वितम्. १५. वानरस्येव आननं यस्य तम्, नंदीश्वरम्.

अवज्ञाय समा **रा** ध्यं द्वितीयमिव **शं**करम् ।
श्रीमदांधो जहासोच्चैर्नंदीश्वरमसत्तमः. ॥ २०१
नंदी तमाह सा **म** र्षो, 'यस्मान्मां [1]कपिरूपिणम् ।
अवज्ञाय प्रहासं त्वं कृतवान्बलदर्पितः. ॥ २०२
तस्मान्म[2]द्रूपते **ज** स्का [3]मनःसंपातरंहसः ।
उत्पत्स्यंति वधार्थं हि कुलस्य तव **वा**नराः.' ॥ २०३
एवं शप्ते तत्क्ष **य** स्य निश्च[4]योत्थप्रहर्षतः ।
देवदुंदुभयो नेदुः[5] पुष्पवृष्टिश्च [6]खाच्युता. ॥ २०४
अचिंतयित्वा स **जं**[7] गत्पतिप्रतिनिधेर्वचः ।
पर्वतं तं समासाद्य वाक्यमाह **द**शाननः. ॥ २०५
'[8]क्रीडातो गोपते[9]! **य** त्र **पु**ष्पकस्य गतिस्त्वया ।
यतश्छिन्ना तं तवेमं [10]समुन्मूलं करो[11]म्यगम्. ॥ २०६
केनौ[12]जसात्र [13]मा **रा** रिर्नित्यं क्रीडति राजवत् ।
विज्ञातव्यं न जानीते [14]भयस्थानमुपस्थितम्.' ॥ २०७
एवमुक्त्वा स सा **म** र्थ्याद्विक्षिप्याधो गिरेर्भुजान्[15] ।
तो[16]लयामास तं शीघ्रं स शैलः समकंपत. ॥ २०८

---

१. कपेः रूपं अस्य अस्ति इति तम्, वानराननम्. २. ममेव रूपं तेजश्च येषां ते. 'शेषात् विभाषा' ५।४।१५४. ३. मनसः संपातः (वेगः) इव रंहः (वेगः) येषां ते. ४. निश्चयात् उत्थः (उत्पन्नः) प्रहर्षस्तस्मात्. 'तत्क्षयस्य निश्चयोत्थप्रहर्षतः' अत्र सापेक्षत्वेऽपि गमकत्वात् समासः. ५. नद+लिट् उस्=वाजूं लागले. ६. खात्=आकाशांतून. ७. जगताचा स्वामी जो महेश्वर त्याचा प्रतिनिधि (त्याच्याच योग्यतेचा, महेश्वरकल्प, representative) जो नंदिकेश्वर त्याचें. म्हणूनच वर 'द्वितीयमिव शंकरम्' असें म्हटलें आहे. ८. 'क्रीडातो' याचे ठिकाणीं 'क्रीडा ते' असा चुकीचा पाठ होता. क्रीडा+तस्=यदाश्रयक्रीडानिमित्तम्. ९. हे वृष, हे नंदे, नंदि व नंदिन् असे दोन शब्द आहेत. नंदी हा कामधेनूचा पुत्र आणि शिवाच्या गणांतील एक. याची आकृति मनुष्यासारखी असून मुख मात्र वानरासारखें होतें. १०. समूळ उपडून टाकतों. सम्यक् उद्धृतं मूलं यस्य तम्. [स० १६ श्लो० २१-२५.] ११. अगम्=पर्वतम्, नगम्. १२. ओजसा=सामर्थ्यानें, बळानें. १३. मार+अरि+प्र०प्र०=मदनारिः त्र्यंबकः. १४. भयकारणम्, भयहेतुम्. १५. 'भुज'शब्दाचें द्वि० अनेकवचन. दुसरें रूप 'भुजा' असें आहे. १६. तोलून धरला.

गिरेश्चालनतः **श्री** मत्युमा सा [1]भगवत्यपि ।
चचालालिंगितवती [2]मानिन्यपि महेश्वरम्. ॥ २०९
ततो **राम**! पुरा **रा** तिर्देवानां [3]प्रभवो हरः ।
पादांगुष्ठेन तं शैलं पीडयामास लीलया. ॥ २१०
पीडितास्तद्भुजा **[4]म** ध्येमूलं **राम**! महागिरेः ।
विस्मिताश्चाभवंस्तत्र सचिवास्तस्य रक्षसः. ॥ २११
तेनातिरोषाद्भु[5] **ज** गप्रभबाव्हतिपीडनात् ।
[6]मुक्तो विरावः सहसा त्रैलोक्यं येन कंपितम्. ॥ २१२
'महादेवं तोषं[7] **य** स्व **नी**लकंठ**मु**मापतिम् ।
[8]तमृते [9]शरणं नान्यं पश्यामोऽत्र **द**शानन!' ॥ २१३
इत्युक्तो रक्षसां **रा** जा सचिवैः स तथाकरोत्, ।
संवत्सरसहस्रं तु रुदतो रक्षसो गतम्. ॥ २१४
ततः प्रणम्य स **म** नः [10]स्थिरीकृत्य **म**हेश्वरम् ।
तुष्टाव सामभिः [11]स्तोत्रैर्विविधैः करुणार्णवम्. ॥ २१५
ततः प्रीतः प्राह **[12]ज** गत्पतिर्मुक्त्वा [13]भुजान्नतम्, ।
'शैलक्रांतेन यो मुक्तस्त्वयारावः सुदारुणः. ॥ २१६

---

१. षडैश्वर्यसंपन्ना अपि. २. मानः (स्वाभीष्टश्लेषवीक्षादिविरोधी अनुरक्तदंपत्योः अवस्थाविशेषः) अस्ति अस्याः इति. मान+इन्+ङीप्. ३. वा० रामायणांत 'प्रवरो' असा पाठ आहे तो चांगला आहे. उत्तरार्ध वा० रामायणांतील आहे. [स० १६ श्लो० २७.] ४. महागिरेर्मध्येमूलं असा अन्वय. मूलस्य मध्ये मध्येमूलम्. 'पारेमध्ये षष्ठ्या वा' २।१।१८ या नियमानें अव्ययीभाव समास. तस्य पर्वताधोभागगता भुजाः. ५. भुजग+प्रभा+बाहु+अतिपीडन+पंचमी प्र० सर्पतुल्य बाहूंच्या हिमाचलाच्या तळीं दबल्यामुळें. ६. जोरानें 'शंख' केला. हें अर्ध वा० रामायणांत आहे. [स० १६ श्लो० २९.] ७. तोषय. तुष् प्रीतौ परस्मैपदी किंवा कर्तृगामिनि क्रियाफले आत्मनेपदम् या नियमानें आत्मनेपद मानून घ्यावें. महादेव, नीलकंठ, व उमापति या पदांची हेतुगर्भता स्पष्ट करून दाखविण्याची आवश्यकता दिसत नाहीं. ८. तम्+ऋते=त्याच्या शिवाय. ९. रक्षितारम्. हा श्लोक वा० रामायणांत आहे. [स० १६ श्लो० ३२.] १०. स्थिर करून, एकाग्र करून. नौस्थकाकवत् मनाला एकाधार करून. अस्थिरं स्थिरं कृत्वा. 'अभूततद्भावे च्विः.' ११. स्तोत्रैः सामभिः=स्तुतिसंपादकैः वाक्यैः. एथें स्तोत्र शब्दाचा विशेषणासारखा प्रयोग केला आहे. 'स्तोत्रं कस्य न तुष्टये'. १२. महादेवः. १३. भुजान् नतं (प्रणतम्). उत्तरार्ध वा० रामायणांत आहे. [स० १६ श्लो० ३६].

भीतं च [1]शब्दितं **य** स्मादेतल्लोकत्रयं भृशम् ।
तस्मात्त्वं **रा**वणो नाम्ना ख्यातो राजन्! भविष्यसि. ॥ २१७
अनुज्ञातोऽद्य व्र **ज** त्वमि'त्युक्तो **रा**वणोऽब्रवीत्, ।
'यदि देव! प्रसन्नोऽसि वरं मे देहि [2]याचतः. ॥ २१८
अवध्यत्वं मया **य** त्नात्प्राप्तं देव! **च**तुर्मुखात् ।
नि[3]र्विघ्नमायुषः शेषं शस्त्रं च त्वं प्रयच्छ मे.' ॥ २१९
एवमुक्तः स्मरा **रा** तिश्चं[4]द्रहासमसिं वरम् ।
[5]शापाद्यनाश्यं च ददावायुषः शेषमीश्वरः. ॥ २२०
आज्ञामवाप्य न **म** नं कृत्वाथारुह्य पुष्पकम् ।
ततो महीतलं **राम**! पर्यक्रामत्स [6]**रा**वणः. ॥ २२१
क्षत्रियान्बलिनः **श्री** मान्बाधमानश्चरन्भुवि ।
[7]कन्यामपश्यद्धिमवद्वनेऽजिनजटाधराम्. ॥ २२२
तामपृच्छत्स स्म **रा** तः 'का त्वं कस्ये'ति सा सती ।
विधिना तस्य चातिथ्यं कृत्वोवाच तपस्विनी. ॥ २२३
'**कु**शध्वजो नाम **म** म ब्रह्मर्षिरमितप्रभः ।
[8]बृहस्पतिसुतस्तातो बुद्ध्या यो [9]गुरुणा समः. ॥ २२४
[10]तस्याहं कुर्वतोऽ **ज** स्त्रं वेदाभ्यासं महात्मनः ।
संभूता वाङ्मयी कन्या नाम्ना **वे**दवती स्मृता. ॥ २२५

---

१. रावितम्. आपल्या आक्रंदनध्वनीनें दुमदुमून टाकलें. उत्तरार्ध वा० रामायणांत आहे. (श्लो० ३७.) २. याचतः=याचते. संबंधसामान्ये षष्ठी. तूं जर प्रसन्न झाला आहेस, आणि वर देत आहेस, तर मी मागतों तो वर दे. ३. दुष्कर्मभिर्यथा विनष्टं न भवति तथा प्रयच्छ. तस्मिंश्चायुषि सर्वजयाय शस्त्रं च दिव्यं प्रयच्छ. ४. 'चंद्रहास' नांवाची तरवार. ५. शापादिकाच्या योगानें नाश न पावणारें. ६. सर्ग १६ श्लो० ४६ पहा. ७. वेदवतीम्. रावणानें विचारल्यामुळें आपलें वृत्त स्वतःच वेदवतीनें त्याला सांगितलें तें पुढें दिलें आहे. [स० १७ श्लो० २-४.] 'कन्या' हा शब्द फार प्राचीन वेदांत आढळतो, व त्याचा अर्थ 'अविवाहित मुलगी' असा आहे. उत्कल प्रदेशांत 'कन्या' म्हणजे 'बायको' असा अर्थ मानतात. ८. बृहस्पतिसुतः=वाचस्पतिसुतः 'तत्बृहतोः करपत्योः चौरदेवतयोः सुट्' या नियमानें बृहत् शब्दांतील 'त्' च्या जागीं 'स्' झाला. ९. मत्पितामहेन देवगुरुणा. १०. महात्मनस्तस्य सकाशात् वाङ्मयी (वाङ्मयवेदमूर्तिः) कन्याहं संभूता. 'भगवतः शक्तिर्लक्ष्मीरेव रावणवधाय रावणं शप्तुमत्रावतीर्णा' इति तिलके. [स० १७ श्लो० ९ टीका.]

सुरादिभिः[1] कृतो **य**[2] त्नो मदर्थं रा[3]क्षसेश्वर! ।
विष्णुरेवात्यभिप्रेतो जा[4]माता मत्[5]पितुः प्रभुः. ॥ २२६

दैत्येन शंभुना **रा** त्रौ सुतस्तातो हतस्ततः ।
तनुं तस्य परिष्वज्य प्रविष्टाग्निं प्रसूर्[6]मम. ॥ २२७

पितुर्मनोरथ **म** हं सत्यं कर्तुं निरंतरम् ।
तमेव जगतां नाथं हृदयेन समुद्वहे. ॥ २२८

कर्तुं स्वं सफलं **ज** न्म चरामि विपुलं तपः ।
कथितं वृत्तमेतन्मे गच्छ पौ[7]लस्त्यनंदन!' ॥ २२९

श्रुत्वाब्रवीत्स भू **य** स्तां, 'यौवनं तेऽतिवर्तते[8], ।
त्रैलोक्यसुंदरि! त्वं मे भव भार्या शुचिस्मिते!॥ २३०

कष्टै[9]रलं, न वि **ज** ने वने वस्तुं त्वमर्हसि ।
वीर्येण तपसा भोगैर्न स विष्णुर्मया समः.' ॥ २३१

प्रोवाच तं सा प्र **य** ता, 'मा[10] मैवं जगदीश्वरम् ।
त्वदृते[11] राक्षसेंद्रान्यः कोऽवमन्येत बुद्धिमान्? ॥' २३२

एवमुक्तस्त[12] या **रा**[13] जन्! कन्यां तां मूर्धजेषु[14] सः ।
बलाज्जग्राह कामांधः, सा चुकोप तपस्विनी. ॥ २३३

केशान्परात्तान्[15]स **म** लान्कन्या वेदवती तदा ।
कराग्रेणाच्छिन्न[16]त्खड्ग[17]भावं नीतेन तेजसा[18]. ॥ २३४

---

१. 'सुरादिभिः' या परिवर्तित पाठाचे जागीं 'सुरारिभिः' असा पाठ होता तो वा० रामायणाशीं जुळत नाहीं. वा० रा० उत्तर० स०१७ श्लो०१०पहा. २. मला वरण्याबद्दल प्रयत्न. ३. राक्षसेश्वर हें संबोधन मोठा धिप्पाड राक्षस पाहूनच दिलें, नाहीं तर तिला तपोबलानें सर्व माहीत होतें. वा० रा० उत्तर० स० १७ श्लो० १८. ४. जायां माति इति. 'पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥' ५. 'मत्पितुः' ही कर्तरि षष्ठी. 'क्तस्य च वर्तमाने' २।३।६७ 'मतिबुद्धिपूजार्थेभ्यश्च वर्तमाने क्तः' ३।२।१८८. ६. मम जननी. ७. हें पद हेतुगर्भ आहे हें सहृदय जाणतीलच.८.जात आहे, नष्ट होत आहे. ९. क्लेशदायिनी तपश्चर्या पुरी झाली. १०. नको नको असें बोलूं. मा मा एवम्. ११. त्वत्+ऋते=तुझ्याशिवाय. ऋतेयोगे पंचमी. हें अर्ध वा० रामायणांत आहे. [स० १७ श्लो० २५.] १२. 'एवमुक्तस्तया' याचे जागीं 'एवमुक्ते' असा चुकीचा पाठ होता. १३. रामचंद्र. १४. केशेपु शिरोरुहेपु. ही अवच्छेदे सप्तमी. १५. पर+आत्त+द्वि० प्र०=परपुरुषानें स्पर्श केलेल्यांना. आत्त =आ+दा+क्त. १६. अ+ छिद+(रुधादिः)+त. कापून टाकले. १७. खड्गतां प्रापितेन. १८. तपस्तेजसा, तपोबलानें. [तेज=प्रभाव. 'तेजो दीप्तौ प्रभावे च स्यात्पराक्रमरेतसोः' इति विश्वः.]

मर्तुं[1] कृतत्वरा **श्री**[2] मनुवाच तमघाचलम्[3], ।
'धर्षितायास्[4]त्वयानार्य! न मे जीवनमिष्यते.[5] ॥ २३५
वधार्थं ते पुना[6] **रा** त्रिचरोत्पत्स्ये[7] तपोऽस्ति चेत् ।
प्रख्यातायोनिजा साध्वी भवेयं धर्मिणः[8] सुता.' ॥ २३६
इत्युक्त्वा सा तप्त[9] **म** नाः प्रविष्टा जातवेदसम्[10] ।
सैषा **श्रीजा**नकी भार्या तव त्वं **वि**ष्णुरव्ययः. ॥ २३७
प्रायाद्[11] उशीरबी[12] **ज** स्थं **म**रुत्तं **रा**वणस्ततः ।
भयान्महेंद्रः संवृत्तो मयूरस्तस्य[13] रक्षसः. ॥ २३८
वायसोऽभूत्तत्र[14] **य** मः कृकलासो[15] धनेश्वरः ।
संवृत्तो वरुणो हंसस्तिर्यग्योनिं गताः[16] सुराः. ॥ २३९
तमासाद्य महा **रा** जं **म**रुत्तं **रा**क्षसाधिपः ।
प्राह, 'युद्धं प्रयच्छेति निर्जितोऽस्मीति वा वद.' ॥ २४०
स द्विषन्नीरद[17] **म** रुन्**म**रुत्तः प्राह, 'को भवान्?' ।
अवहासं[18] ततो मुक्त्वा रक्षसां पतिरब्रवीत्. ॥ २४१
'अविस्मयेन[19] रा[20] **ज** न्य! भृशं प्रीतोऽस्म्यहं तव ।

---

१. मर्तुं कृता त्वरा यया सा. २. रामभद्र. ३. तम् अघाचलम्=त्या पापाच्या पर्वताला. ४. केशस्पर्शेन स्त्रीभावं प्रापितायाः. ५. हें अर्ध वा० रामायणांत आहे. [स० १७ श्लो०२९.] ६. पुनः. 'रो रि' ८।३।१४. ७. उत्पन्न होईन. वेदवतीला माहीत होतें कीं ब्रह्मदेवाच्या वरामुळें त्या काळीं शाप दिला असतांही रावणाला मरण प्राप्त व्हावयाचें नाहीं. म्हणूनच शाप देऊन व्यर्थ तपःक्षय केला नाहीं. अयोनिजा होऊन अन्यजन्मीं तुझा नाश करीन असें म्हणाली. ८. धर्मिष्ठस्य. ९. तप्तं मनः यस्याः सा. १०. अग्निम्. 'जातवेदस्' शब्दाची व्युत्पत्ति अनंतकृत काव्यें—पृ० १४५ यांत पहा. ११. प्र+अ+या+लङ् त्, गेला. १२. उशीरबीज देशांत असलेल्या मरुत्त राजाकडे गेला. उशीरबीजमिति देशनाम इति तिलके. मरुत्त राजा त्या स्थलीं यज्ञ करीत होता. रावणाच्या भीतीमुळें यज्ञांत आलेल्या देवांनीं नाना रूपें धारण केलीं व तेथून पोबारा केला हें पुढें दिलेंच आहे. १३. हा राक्षस रावण आपलें धर्षण करील या भयानें. [स० १८ श्लो० ४.] १४. कावळा. १५. सरडा. १६. देवांनीं पशुपक्ष्यांचीं रूपें घेतलीं. १७. द्विषत्+नीरद+मरुत्=शत्रुरूप मेघांचा वायूप्रमाणें नाश करणारा. १८. माझी बलैश्वर्यसंपत्ति विश्वविश्रुत असतांही हा मरुत्त राजा मला सामान्य पुरुषाप्रमाणें प्रश्न करीत आहे ही त्याची केवढी तरी अज्ञता, असें मनांत समजून रावणराजे यांना भारीच विस्मय वाटला व ती स्वारी खदखदां हासली. १९. मजसारख्या ऐश्वर्यशाली पुरुषाला पाहून यत्किंचित्‌ही आश्चर्य तुला वाटलें नाहीं, उलट निर्धास्तपणें व अनादरपूर्वक मला प्रश्न करीत आहेस हें पाहून. २०. हे क्षत्रिय, किंवा वृद्ध रावणरावाच्या तोंडीं मरुत्त राजाला 'हे

धनदस्यानुजं यो मां नावगच्छसि **रा**वणम्. ॥ २४२
लोके कोऽन्योऽस्त्यहो **य**स्त्वं मां न जानाति विश्रुतम् ।
[1]भ्रातरं येन निर्जित्य विमानमिदमाहृतम्. ॥ २४३
तं **द**शास्यं मनु **ज**राट् स **म**रुत्तस्तदाब्रवीत्, ।
'[2]धन्यः खलु भवान्येन ज्येष्ठो भ्राता रणे जितः.॥ २४४
श्लाघ्यो जगत्सु सु **य**शास्त्वादृशोऽन्यो न विद्यते, ।
कं त्वं [3]प्राक्केवलं धर्मं चरित्वा लब्धवान् वरम्. ॥ २४५
[4]श्रुतपूर्वं न मे **रा**जन्! [5]यादृशं भाषसे स्वयम् ।
तिष्ठेदानीं न मे[6] जीवन्प्रतियास्यसि दुर्मते! ॥ २४६
प्रेषयामि त्वां य **म**स्य [7]क्षयं तीक्ष्णैः शरैरहम् ।
[8]इत्युक्त्वेषुधनुष्पाणिः [9]संगराय स निर्ययौ. ॥ २४७
बृहस्पत्यनुजः **श्री**मान्संवर्तो [10]दीक्षितं नृपम् ।
[11]वारयामास [12]सत्रस्थं, स निर्वृत्तो गुरोर्गिरा. ॥ २४८
तं मत्वा निर्जितं **रा**जन्! राक्षसः **शु**कनामकः ।
'**रा**वणो जयती'त्युच्चैर्घोषयामास हर्षितः. ॥ २४९
भक्षयित्वा तत्र **म**त्तो [13]यज्ञवाटस्थितानृषीन् ।
गतो **द**शाननोऽन्यत्र नृपानन्याञ्जयन्भुवि. ॥ २५०
शक्रो [14]मयूरं भु**ज**गान्न भयं तव सर्वथा ।

राजपुत्र' असें संबोधनपद योग्यच आहे, कारण मरुत्त राजा त्याच्या मागून झाला. उत्तरार्ध वा० रामायणांत आहे. [स० १८ श्लो० ९.]

१. या व पुढील तीन श्लोकांचीं उत्तरार्धें वा०रामायणांत आहेत. [स०१८ श्लो०१०-१२.] २. ही व्याजस्तुति आहे. धन्यः=अधन्यः असा मरुत्त राजाचा अभिप्राय. ३. पूज्यपूजारहितम्. ४. 'राजन्' शब्द खेरीज करून पूर्वार्ध वा० रामायणांत आहे. ५. ज्येष्ठपीडारूपं समाचारम्. ६. मजपासून. ७. आलयम्. [क्षय=सदन, निलय. 'क्षयो निलयकल्पांतरोगापचयमृत्युषु' इति मंखः । युधिष्ठिरविजयम्—आश्वास २ श्लो० ४७ टीका—काव्यमाला—अंक ११६.] ८. इति उक्त्वा इषुधनुष्पाणिः, इषवः (बाणाः) धनुश्च पाणौ यस्य सः, व्यधिकरणपदघटितो बहुव्रीहिः. ९. रणाय, लढाई करण्यासाठीं. १०. दीक्षा अस्ति अस्येति तम्, यज्ञदीक्षा घेतलेल्याला. ११. 'माहेश्वरमिदं सत्रमसमाप्तं कुलं दहेत् । दीक्षितस्य कुतो युद्धं क्रोधित्वं दीक्षिते कुतः ॥ संशयश्च जये नित्यं राक्षसश्च सुदुर्जयः.' वा० रा० उत्तर० स० १८ श्लो० १६-१७. १२. द्वादशवार्षिकयज्ञविशेष करण्यांत गुंतलेल्या राजाला. १३. यज्ञस्थानीं असलेल्या ऋषींना. १४. रावणाच्या भीतीमुळें नाना पशुपक्ष्यांचीं रूपें यज्ञास आलेल्या देवांनीं घेतलीं होतीं तीं रावण गेल्यानंतर टाकून त्या त्या पशुपक्ष्यांला कांहीं विशिष्ट वर दिले.

इदं नेत्रसहस्रं मे त्वद्बर्हेषु[1] भविष्यति. ॥ २९१
वर्षमाणे[2]ऽतिश[3] **य** तो मयि त्वं प्राप्स्यसे मुदम् ।
इत्यब्रवीद्[4]धर्मराजो[5] वायसं 'त्वमरोगभाक्[6]. ॥ २९२
स्वतो[7] मृत्युर्मद्व **रा** त्ते न भविष्यति सर्वथा, ।
त्वयि तृप्ते संतु तृप्ता ये च मद्विषये स्थिताः.' ॥ २९३
'वर्णस्तवास्तु वि **म** लश्[9]चंद्रमंडलसंनिभः' ।
हंसमित्यब्रवीद्राजा यादसां[10] वरदस्तदा. ॥ २९४
प्रसन्नो राजरा **ज** श्च कृकलासं तदाब्रवीत्, ।
'स्वर्णवर्णं तव शिरो मम प्रीत्या भवत्विति.' ॥ २९५
एवं दत्तवरा[11] **य** ज्ञे समाप्ते भूभुजा[12] सह ।
देवाः स्वं[13] भवनं याताः सर्वे शक्रपुरोगमाः[14]. ॥ २९६
केचिद्धतास्तेन[15] **ज** [16]गत्यधिपाः शासनातिगाः[17] ।
निर्जिताः स्मेत्यभाषंत केचिन्नीतिविशारदाः[18]. ॥ २९७

१. तव बर्हेषु (पिच्छेषु). २. वर्षति, वृष भ्वादिपरस्मैपदी. म्हणून 'वर्षमाणे' हा शानच् प्रयोग अशुद्ध आहे. ३. अतिशयेन. तसिल् प्रत्यय येथें तृतीयेच्या अर्थीं लावला आहे. इंद्र हा पर्जन्याची देवता आहे म्हणून इंद्राला पर्जन्य असा पर्याय शब्द लावतात. इंद्राच्या आज्ञेनें मेघ पृथ्वीवर वृष्टि करितात अशी पौराणिकी कथा आहे. ४. 'देहलीदीप'न्यायेन अब्रवीत् याचा संबंध मागें 'शक्रः' याशीं व पुढें 'धर्मराजः' याशीं आहे. ५. ध्रियते विश्वमनेन इति धर्मः, धर्मेण राजते इति धर्मराजः किंवा धर्मस्य राजा यमः, यमासारखा, सर्वांचें योग्य शासन करणारा, दुसरा कोणी नाहीं अशी सर्व देशांतील विद्वानांची कल्पना आहे. ६. रोगं भजतीति रोगभाक्, न रोगभाक् इति नञ् समासः. ७. आपोआप. वा० रा० उत्तर० स० १८ श्लो० २६. कावळा अमर आहे अशी लोकांची समज आहे त्या गोष्टीला अनुलक्षून लिहिलें आहे. 'काव्यं व्यवहारविदे' ही उक्ति सर्वथैव खरी आहे. मात्र लोकव्यवहारापासून होणारें ज्ञान यथार्थ किंवा अयथार्थ आहे ही गोष्ट अगदीं निराळी. ८. हंसस्य. ९. चंद्रबिंबवत् शुभ्रः. १०. जलजंतूंचा राजा वरुण. 'यादांसि जलजंतवः' इति अमरः. ११. दत्ताः वराः यैः ते. १२. राज्ञा मरुत्तेन सह. १३. स्वर्गम्. १४. शक्रः पुरोगमः (अग्रेसरः) येषां ते. [स० १८ श्लो० २१-३४.] इंद्र, कुबेर, वरुण यांनीं कावळा, हंस आणि सरडा यांस यथानुक्रम दिलेले वर लक्ष्यांत ठेवण्यासारखे आहेत. हा कथाभाग प्राकृत मंत्ररामायणांत गाळला आहे. १५. रावणेन. १६. जगती+अधिप+प्र०प्र०=भूमिपाः. १७. 'निर्जिताः स्म' इति शासनमतिगच्छति ये ते. 'हारलों' या रावणाच्या वाक्याचें अतिक्रमण ज्या राजांनीं केलें ते. १८. नीतिनिपुण. कारण ते जाणत होते कीं हा राक्षस ब्रह्मवरामुळें दुर्जय आहे.

धीमान्[1]दुष्यंतो **ग** **य** श्च **गा**धिश्च **सु**रथस्तथा ।
पुरूरवाश्चोचुरेते 'वयं तात[2] त्वया जिताः.' ॥ २५८

अयोध्याधिपती **रा** जा योऽनरण्याभिधो[3] महान् ।
निर्जिता **रा**क्षसास्तेन हरिणा[4] हरिणा[5] इव. ॥ २५९

पातयामास तं **म** ह्यां तलेनाहत्य **रा**वणः ।
उपहासं[6] **द**शग्रीवश्चक्रे वरमदोद्धतः. ॥ २६०

सोऽनरण्यो नृपः **श्री** मानब्रवीत्तं **द**शाननम्, ।
'यदि सम्यक् कृतो धर्मस्तर्हि सत्यं वचोऽस्तु मे. ॥ २६१

उत्पत्स्यते कुले **रा** ज्ञामिक्ष्वाकूणां सतामिह ।
रामो **दा**शरथिर्नाम यस्ते प्राणान्हरिष्यति[7].' ॥ २६२

महानादः[8] प्राप्त[9] **म** हैस्ताडितो देवदुंदुभिः ।
तस्मिन्नुदाहृते शापे पुष्पवृष्टिश्च खाच्च्युता. ॥ २६३

ततोऽनरण्यो रा **ज** न्यश्रेष्ठः प्राप्तस्त्रिविष्टपम्[10] ।
ददर्श घन[11]पृष्ठस्थं नारदं[12] राक्षसेश्वरः. ॥ २६४

कृताभिवादनं[13] **यं**[14] त्तं विजये **द**शकंधरम् ।
देवर्षिरब्रवी, 'युक्तं नेदं ते मृत[15]मारणम्. ॥ २६५

हत एव ह्ययं **रा** जन्! लोको मृत्युवशो यतः ।
किमयं बाध्यते तात! त्वयावध्येन दैवतैः. ॥ २६६

---

१. वा० रामायणांतील पाठ 'दुष्कंत' असा आहे. 'भिन्नभिन्नकालवर्तिनो दुष्कंतादयः स्वस्वकाले रावणं प्रति जितत्ववादं वरदानादुक्तवंतः' इति तिलके. [स० १९ श्लो० ५ टीका.] २. प्रतापशाली राजांनीं रावणाला 'तात' हें संबोधन लावलें त्यावरून 'बखत पडा बांका तो गद्धेको कहे काका' या लौकिकव्यवहाराची आठवण झाल्यावांचून रहावयाची नाहीं. 'पुत्रे पितरि पूज्ये च तातशब्दः प्रयुज्यते'. ३. अनरण्य हें ज्याचें नांव आहे तो. अनरण्य इति अभिधा यस्य सः. हा इक्ष्वाकुपासून पांचवा राजा. वा० रा० अयो० स० ११०. ४. सिंहेन. ५. मृगाः. ६. 'शंके प्रसक्तो भोगेषु न श्रृणोषि बलं मम' असा उपहास. [स० १९ श्लो० २५.] ७. स० १९ श्लो० २८ पहा. ८. महान् नादो यस्य सः. ९. प्राप्तो महो यैस्तैः आनंदितैः. १०. स्वर्गं गतः. रावणाच्या थप्पडीनें राजा गतासुकल्प होऊन कांहीं वेळानें स्वर्गवासी झाला. ११. मेघावर बसून आलेल्या नारदाला. ग्रीक लोकांचे देखील देव मेघावर बसून येत असत असें वर्णन आहे. १२. देवर्षिश्रेष्ठ. हा स्वेच्छाचारी असून कलहप्रिय अशी याची ख्याति पुराणांत वर्णिली आहे. हा परमभागवत होता. १३. कृतं अभिवादनं यस्मै तम्. १४. त्रैलोक्यविजयप्राप्तीसाठीं झटत असलेल्याला. १५. मेलेले त्यांना मारणें. 'किमयं वध्यते तात त्वयावध्येन दैवतैः । हत एव ह्ययं लोको यदा मृत्युवशं गतः ॥.' [स० २० श्लो० ७.]

जित एव त्वया **म** र्त्यलोकोऽयं नात्र संशयः. ।
[1]अवश्यमेभिः सर्वैश्च गंतव्यं **य**मसादनम्. ॥ २६७
तन्नि[2]गृण्हीष्व ते **ज** स्विन्! **यमं** [3]परपुरंजयम् ।
तस्मिञ्जिते जितं सर्वं भवत्येव न संशयः.' ॥ २६८
जगाम जेतुं स **य** मं **दे**वर्षिप्रेरितो बली ।
[4]तत्पूर्वं **नार**दो गत्वा स्वय**मं**तकमब्रवीत् . ॥ २६९
'विजेता राजरा **ज** स्य ससैन्यो **द**शकंधरः ।
उपयाति वशं नेतुं विक्रमैस्त्वां सुदुर्जयम्.' ॥ २७०
अत्रांतरे तद्वि[5] **य** द्गं पुष्पकं दर्शनं गतम् ।
प्राणिनो [6]मोचितास्तेन बलिना निरयं [7]गताः. ॥ २७१
प्रेतसंरक्षका [8]**रा** ज्ञः पितॄणां सचिवास्तथा ।
मंत्रिणो **द**शकंठस्य युयुधुस्ते परस्परम्. ॥ २७२
भग्ना वीरास्ते य **म** स्य रौद्रे[9]णास्त्रेण रक्षसा ।
ततः स्वयं [10]धर्मराजो युयुधे तेन शत्रुणाम्. ॥ २७३
[11]सप्तरात्रं रणः **श्री** दभ्रात्रा तेना[12]मितौजसा ।
कृतः स्वयं कृतांतेन सार्धं परमदारुणः. ॥ २७४
यमराक्षसयो **रा** सीत्तद्युद्धं तुमुलं प्रभो! ।
[13]प्रजापतिं पुरस्कृत्य द्रष्टुं तत्रागताः सुराः. ॥ २७५
राक्षसेंद्रोऽपि स **म** रे [14]धर्मराजोऽपि **रा**घव! ।
आत्मनो जयमाकांक्षन्परं चक्रे परिश्रमम्. ॥ २७६
[15]मृत्युराह यमं **ज** न्ये, 'मुंच त्वं धर्मराज! माम् ।

---

१. हें अर्ध वा० रामायणांत आहे. २. नि+ग्रह (क्र्यादिः उभयपदी)+लोट् स्व. यमाला बांधून टाक. ३. परेषां पुराणि (देहान्) जयतीति तम्. परांचे प्राण हरण करणाऱ्याला. वा० रामायणांत व मोरोपंताच्या रामायणांत 'परपुरंजय' असा संबोधनवाचक पाठ असूनही या स्थलीं पाठपरिवर्तन केलें, तें अर्थविशेषलाभामुळें. हें सहृदयवाचकाच्या लक्ष्यांत येईलच. सेवाधनाच्या पाठाचा विग्रह परपुराणि (शत्रुनगराणि) जयतीति तत्संबुद्धौ हे परपुरंजय रावण असा करावा. ४. रावणाच्या अगोदर. ५. वियता (आकाशमार्गेण) गच्छतीति वियद्गम्. ६. सोडविले. मुच्+णिच्+क्तः. ७. नरकांत असलेले. ८. पितृराजस्य यमस्य. ९. रुद्र ज्याची देवता आहे अशा अस्त्रानें. १०. यमः. ११. सप्तानां रात्रीणां समाहारः. 'संख्यापूर्वं रात्रं तु क्लीबम्' 'रात्राह्नाहाः पुंसि' २।४।२९ या सूत्राखालीं पहा. १२. अमित+ओजस्+तृ०प्र०=अपरिमेय ज्याचें बल आहे अशानें. १३. ब्रह्मदेवम्. १४. यमः. १५. मृत्यु हा संहारमूर्तिविशेष.

नहि कश्चिन्मया दृष्टो बलवानपि जीवति[१]. ॥ २७७
शंभुर्[२]विरोचनो[३] **य**श्च नमुचिः[४] शंबरः[५] स च ।
हतो हिरण्यकशिपुः[६] किमुतायं[७] निशाचरः.' ॥ २७८
उवाच तं धर्म**रा**ज, 'त्वं तिष्ठैनं निहन्म्यहम्.' ।
इत्युक्त्वा कालदंडं स तोलयामास पाणिना. ॥ २७९
प्रहर्तुकामे[८] श[९]**म**ने तेन दंडेन रावणम् ।
पितामहः[१०] प्रभुः साक्षाद्[११]दर्शयित्वा तमब्रवीत्. ॥ २८०
'कुरूक्तमर्कात्म[१२]**ज**! मे न खल्वमितविक्रम! ।
न हंतव्यस्त्वयानेन दंडेनैष निशाचरः. ॥ २८१
मया प्रसन्नेन **य**म! प्रदत्तोऽस्मै वरः खलु ।
स त्वया नानृतः कार्यो दंडं मा मुंच रक्षसि.' ॥ २८२
इत्युक्तो धर्मरा**ज**स्तं चतुर्वदनमब्रवीत्[१३], ।
'एष व्यावर्तितो[१४] दंडः प्रभविष्णुर्हि[१५] नो भवान्.' ॥ २८३
एवमुक्त्वाथ स **य**मस्तत्रैवांतर्हितोऽभवत्[१६] ।
रावणो नाम[१७] विश्राव्य निर्गतः कालसादनात्. ॥ २८४
ततो रसातलं **रा**जा राक्षसानां जगाम सः ।
तत्र भोगवतीं[१८] जित्वा पुरीं वासुकिपालिताम्[१९]. ॥ २८५
ययौ पुरीं मणि[२०]**म**यीं निवातकवचैः सह ।
चक्रे युद्धं राक्षसेंद्रस्तत्र संवत्सरो गतः. ॥ २८६
आजगाम विधिः **श्री**मान्दैत्यांस्तानित्युवाच सः, ।

---

१. सर्ग २२ श्लो० २३-३० पहा. २. कुशध्वजब्रह्मर्षिहंता दैत्यः. ३. वा० रामायणांतील पाठ 'वैरोचन' असा आहे. विरोचन हा प्रसिद्ध दानशूर बलि याचा बाप आणि परमभागवत प्रह्लाद याचा मुलगा. ४. नमुचि शुंभनिशुंभ यांचा धाकटा भाऊ. ५. शंबर ह्या प्रसिद्ध दैत्याचा वध प्रद्युम्न (मदन) रुक्मिणीपुत्र यानें केला. प्रद्युम्नाख्यान हें फार सुरस आहे. ६. परमभागवत जो प्रह्लाद त्याचा बाप हिरण्यकशिपु याचा श्रीविष्णूनें नृसिंहाचा अवतार घेऊन नाश केला. ७. तर मग हा निशाचर काय वस्तु आहे. ८. प्रहर्तुं कामो यस्य तस्मिन्. ९. यमे. १०. विधिः. ११. प्रत्यक्ष प्रकट होऊन. १२. कुरु+उक्तम्+अर्कात्मज. यम हा सूर्यपुत्र आहे म्हणून 'अर्कात्मज' हें संबोधन. १३. प्रजापतिम्. १४. मागें घेतला आहे. १५. सर्व गोष्टींच्या संबंधानें आपण आमचे स्वामी आहांत. [स० २२ श्लो० ४६.] १६. गुप्त झाला. १७. रावणाचा जय झाला अशी घोषणा करून. १८. पाताळलोकांतील नागांची पुरी ही भोगवती. १९. वासुकि हा सर्पांचा राजा, भोगवतीचें रक्षण करीत असे. २०. मणिमयी ही निवातकवचांची पुरी.

'न ह्ययं रावणो युद्धे शक्यो जेतुं सुरासुरैः. ॥ २८७
भवंतोऽपि प्रवी **रा** [1]नो शक्या जेतुं सुरादिभिः ।
रावणस्य सखित्वं मे[2] भवद्भिः सह रोचते.' ॥ २८८
ब्रह्माज्ञया ते स **म** रान्निवृत्ताः स च रावणः ।
सख्यं निवातकवचैः सार्धं चक्रे[3]ऽग्निसाक्षिकम्. ॥ २८९
[4]तत्रोष्य वर्षं र **ज** नीचरेंद्रो [5]हततापसः ।
असुरेभ्यः सखित्वेन [6]मायानां शतमाप सः. ॥ २९०
गत्वाश्म[7]नगरं **य** त्तः कालकेयान्[8]बलोत्कटान् ।
जघ्ने, शूर्पणखायाश्च [9]भर्तारमसि[10]नाच्छिनत्. ॥ २९१
वरुणस्यालयं **रा** ज्ञः कैलासमिव [11]भास्वरम् ।
अपश्यत्सुरभिं तत्र [12]क्षीरोदो [13]यत्पयोभवः. ॥ २९२
संपूज्य तां प्रीत **म** तिः सोऽजयद्वरुणात्मजान् ।
श्रुत्वा [14]प्रचेतसं ब्रह्मलोकस्थं निर्गतस्ततः. ॥ २९३
निवृत्तो राक्षसो **जं** [15]न्हे मार्गे राजर्षिकन्यकाः ।
देवपन्नगगंधर्वयक्षासुरवरात्मजाः. ॥ २९४
दर्शनीयां हि यां **य** त्र सोऽपश्यद्दशकंधरः ।
[16]हत्वा बंधुजनं तस्या विमाने तां रुरोध सः. ॥ २९५
[17]ताः सर्वा योषितोऽ **ज** स्रं मुमुचुर्बाष्पजं जलम् ।

---

१. नो=न. २. मह्यम्. ३. अग्नि ज्यामध्यें साक्षी आहे असें. पूर्वकालीं अनुलंघ्य अशी कांहीं गोष्ट करावयाची झाली तर त्या वेळीं अग्नीला साक्षी करीत असत. उदाहरणार्थ, विवाहविधि वगैरे संस्कार. ४. तत्र+उष्य=त्या ठिकाणीं राहून. वस् (संप्रसारण)+ल्यप् 'उष्य' हा आर्ष प्रयोग आहे, 'उषित्वा' असा प्रयोग पाहिजे. समासेऽनञ्पूर्वे क्त्वो ल्यप् ७।१।३७. ५. हताः तापसा येन सः. हें पद रावण हा सज्जनांचा शत्रु होता एवढेंच दाखविण्याकरितां योजलें आहे. या वेळीं रावणानें तापसांचा वध केला नव्हता, हें वा० रामायणावरून स्पष्ट आहे. ६. कापट्यविद्येचे शंभर प्रकार. ७. 'अश्मनगर' ही कालकेय नांवाच्या असुरांची नगरी. ८. बलोद्धतान्. ९. विद्युज्जिह्वम्. [स० २३ श्लो० १८.] १०. छिद्+लङ् त्. छाटून टाकला. ११. दीप्तियुक्तम्. १२. क्षीरसमुद्र. क्षीरमुदकमस्येति क्षीरोदकः, 'उदकस्योदः संज्ञायाम्' ६।३।५७ उत्तरपदस्य चेति वक्तव्यम्. १३. यत्+पयस्+भव+प्र०प्र०=ज्याची सुरभीच्या दुधापासून उत्पत्ति झाली आहे. यस्याः पयः तस्मात् भवः (उत्पत्तिः) यस्य सः. सर्ग ३३ श्लो० ३०-५३ पहा. १४. प्रचेतस्+द्वि०प्र०=वरुणम्. १५. हरण करिता झाला. 'हृ'धातूचा आत्मनेपदी लिट् प्रयोग. १६. हें अर्ध वा० रामायणांत आहे. १७. 'ताः' या परिवर्तित पाठाबद्दल छापील पुस्तकांत 'तां' असा चुकीचा पाठ होता.

अलं निनिंदुः शोकार्ताः शपंत्यस्तं महाखलम्. ॥ २९६
निनिंदुस्ताः [1]स्वनि **य** तिं कन्यकाश्च [2]सभर्तृकाः ।
विलेपुः सुभृशं स्मृत्वा पितॄन्मातॄः पतीन्सुतान्. ॥ २९७
क्रोधादूचुः समं [3]**रा** मा, 'यस्मात्[4]परवधूरतः ।
तस्मात्प्राप्स्यत्ययं मृत्युं [5]स्त्रीकृतेनैव दुर्मतिः.' ॥ २९८
सतीभिः [6]परमा **म** र्षादेवं वाक्येऽभ्युदीरिते ।
दिव्या दुंदुभयो नेदुः पुष्पवृष्टिः पपात च. ॥ २९९
स **बभूव** [7]गत **श्री** कः सतीभिः शप्त उद्धतः ।
[8]शुद्धतस्तद्गतात्तस्य तेजोहानिर्न [9]युद्धतः. ॥ ३००
प्रविवेश पुरीं **रा** जा पूज्यमानो निशाचरैः ।
एतस्मिन्नंतरे घोरा [10]तत्स्वसा विललाप सा. ॥ ३०१
शोके **शूर्पणखां** **म** ग्नां सांत्वयन्नाह **रावणः**, ।
'[11]सुखं मातुः स्वसुः [12]सूनोः **खरस्य** वसु संनिधौ.॥३०२
खरोऽयं यातुरा **ज** स्ते करिष्यति वचः सदा.' ।
इत्युक्त्वा **दंडकारण्यं** प्रेषयामास तां तदा. ॥ ३०३
निकुंभिला नाम **य** त्तल्लंकोपवनमुत्तमम् ।
[13]कर्मसिद्धेर्हेतुभूतं प्रविवेश **दशाननः**. ॥ ३०४
तत्रापश्यत्[14]सुरा **रा** तिर्मेघनादं स [15]दीक्षितम् ।

---

१. आपलें दैव. २. विवाह न झालेल्या कुमारी आणि विवाहित स्त्रिया. ३. अंगनाः. ४. पर+वधू+रतः=दुसऱ्याचे स्त्रीचे ठायीं लंपट झालेला. ५. स्त्रीसंबंधानेंच. [सर्ग २४ श्लो० १९-२२.] ६. परम+अमर्ष+पं० प्र०=मोठ्या क्रोधानें. ७. गता (नष्टा) श्रीर्यस्य सः. 'शेषाद्विभाषा' इति नियमात् कप् (५।४।१५४). ८. हें अर्ध अशुद्ध असल्यामुळें दुर्बोध झालें आहे. करितां 'शुद्धात्तस्माद्गतात्तस्य' असें पाठांतर कल्पावें, म्हणजे कांहीं अर्थ तरी जुळवितां येतो. त्याच्या त्या जगत्प्रसिद्ध तपश्चर्येमुळें त्याची युद्धकालीं तेजोहानि होत नसे ती आतां मात्र सतीच्या शापामुळें झाली—असा भाव. ९. युद्ध+तसिल् सप्तम्यर्थे युद्धे. १०. तस्य स्वसा (भगिनी)=शूर्पणखा. स्वसा ही स्वसृ शब्दाची प्रथमा. पातालजयासाठीं रावण गेला, तेव्हां अश्मनगरांत कालकेयांशीं युद्ध झालें. त्यांत विद्युजिह्व शूर्पणखेचा नवराही मारला गेला म्हणून शूर्पणखा रावणाच्या सभेंत विलाप करूं लागली. वा० रा० उत्तर० स० २३ श्लो० १७।१८. ११. सुखानें. १२. मातृष्वसेयस्य. मावशीच्या मुलाच्या. १३. निकुंभिला ही अभिचारकर्मभूमि होय. या ठिकाणीं शत्रुनाशास्तव मेघनाद वगैरे उग्रतपश्चर्या करीत असत. १४. सुरांचा अराति (शत्रु) रावण. १५. शत्रुनाशास्तव यज्ञ करण्याची ज्यानें दीक्षा घेतली आहे अशाला.

कृष्णाजिनधरं मूर्तं[1] तेजोराशिमिव स्थितम्. ॥ ३०५
तमालिंग्योत्सुक **म** ना [2]ब्रह्मचारिणमात्मजम् ।
पप्रच्छ विस्मितो राजा स्वयं किमिदमित्यथ. ॥ ३०६
तमाह शु[3]क्रो, 'य **ज** ने रतोऽयं तव नंदनः ।
[4]अग्निष्टोमादयो यज्ञाः सप्तानेन कृताः प्रभो ! ॥ ३०७
सत्रं माहेश्वरं **य**[5] ज्वा कृत्वा प[6]शुपतेः प्रभो ! ।
वरान्सुदुर्लभान्प्राप्तो घननादो महायशाः.' ॥ ३०८
अब्रवीद्धीं[7]तुरा **ज** स्तं, 'न शोभनमिदं कृतम् ।
पूजिताः शत्रवो यस्माद्द्रव्यैरिं[8]द्रपुरोगमाः. ॥ ३०९
ऐ[9]हीदानीं कृतं **य** द्धि सुकृतं तन्न संशयः ।
आगच्छ सौम्य ! गच्छामः स्वमेव भवनं प्रति.' ॥ ३१०
ततो गत्वा गृहं **रा** जा सपुत्रः सबिभीषणः ।
[10]स्त्रियोऽवतारयामास विमानाद्बा[11]ष्पगद्गदाः. ॥ ३११
बिभीषणोऽथ सु **म** ति,'माल्यवत्तन[12]यानला ।
तस्याः कुंभीनसी कन्या सास्माकं धर्मतः स्वसा.॥३१२
[13]मधुना सा हृता **श्री** मन्नेतस्य परयोषिताम् ।
हरणस्य फलं मन्ये स्वसुर्धर्षणमल्पतः. ॥ ३१३
आसक्तेऽस्मिन्नध्व **रा** णां कर्मण्येतदभूत्प्रभो ! ।

---

१. मूर्तिमंतम् सूर्यम् इव. २. स्त्रीसेवनादि वर्ज्य करून व्रत धारण करणारा त्याला. ३. शु-
क्राचार्यांनें उत्तर देण्याचें कारण तिलकटीकाकार खालीं लिहिल्याप्रमाणें देतातः—पुत्रस्ययजमा-
नत्वेन मौनित्वात् सोऽवदत् यज्ञसमृद्धये यजमानस्य मौनत्यागेन तत्समृद्धिर्न भवति.४ .अग्निष्टोम,
अश्वमेध, बहुसुवर्णक, राजसूय, गोमेध, वैष्णव व माहेश्वर असे सात यज्ञ. ५. याग करणारा.
यज्वन् या पुंलिंग शब्दाचें प्रथमैकवचन यज्वा. ६. पशुपति=शिव. पशूनां (जीवानां) पतिः=
शिवः ['अयं च सर्वविद्यानां पतिराद्यः सनातनः । अहं वै पतितो येन पशुमध्ये (जीवमध्यें) व्यव-
स्थितः ॥ अतः पशुपतिर्नाम त्वं लोक ख्यातिमेष्यसि' (वराहपुराण) 'पशुपतिराणवमायीवकार्मी-
ख्यपाशत्रयबद्धाः पंचकलाकलिता जनाः पशवस्तेषामीशः' (स्तुतिकुसुमांजलि—स्तोत्र ११श्लो०९७
टीका.)] ७. निशाचरपतिः. ८. इंद्रादयः ९. एहि=आ+इ+हि लोट्=ये. १०.स्त्रिय=स्त्रीः=
स्त्रियांना. ११. शोकामुळें ज्यांचा कंठ दाटून आला आहे अशांना.१२. माल्यवत्+तनया+
अनला. माल्यवान् हा रावणाचा मातामह. त्याची अनला नांवाची मुलगी होती. तिच्यापासून
कुंभीनसी नांवाची मुलगी झाली. ही कुंभीनसी रावणाच्या मावशीहून निराळी हें उघड आहे.
१३. मधुनांवाच्या दैत्यानें.

कुंभकर्णेऽपि संसुप्ते उदवासं[1] गते मयि.' ॥ ३१४

इत्याह रावणोऽ[2] **म** र्षी निर्जगाम पुराद्द्रुतम् ।
चत्वार्यक्षौहिणीनां स सहस्राणि[3] गृहीतवान्. ॥ ३१५

पृष्ठगोपोऽ[4]स्यानु **ज** न्मा कुंभकर्णो महाबलः ।
अग्रतो मेघनादोऽभूद्दशकंठस्य गच्छतः. ॥ ३१६

बिभीषणः स न **य** विल्लंकायां रक्षणे स्थितः ।
गतो मधुपुरं दैत्यैर्दानवैः सह रावणः. ॥ ३१७

न ददर्श मधुं **रा** म! भगिनीं तत्र दृष्टवान् ।
भीता कुंभीनसी भ्रातुः शिरसा चरणौ गता. ॥ ३१८

व्याकुलां पतितां **म** ह्यां दृष्ट्वा स दशकंधरः ।
तां समुत्थापयामास 'न भेतव्य'मिति ब्रुवन्. ॥ ३१९

साब्रवी, 'यदि रा **ज** न्! मे प्रसन्नस्त्वं महाभुज! ।
भर्तारं न ममेहाद्य[5] हंतुमर्हसि मानद.' ॥ ३२०

स तामाह, 'क्व प्रि **य** स्ते मम शीघ्रं निवेद्यताम् ।
सह तेन गमिष्यामि सुरलोकं जयोद्यतः. ॥ ३२१

तच्छ्रुत्वा यातुरा **ज** स्य वचः कुंभीनसी मधुम् ।
सुप्तमुत्थाप्य तं भ्रात्रे दर्शयामास सादरा. ॥ ३२२

तस्याः स्वसुः स प्रि **य** कृन्मधुना पूजितः सुखम् ।
तत्रैकां रजनीं प्रोष्य ततः कैलासमागतः. ॥ ३२३

तत्र चंद्रोदये **रा** त्रौ कायार्तो रम्यकानने ।
दैवाद्[6]ददर्श रंभां तां करे[7] जग्राह रावणः. ॥ ३२४

नत्वा तमाह सा, '**म** ह्यमनुज्ञां दातुमर्हसि ।
स्नुषास्मि तव धर्मेण[8] नलकूबरभोगदा.' ॥ ३२५

तामाह रावणः **श्री** मान्, 'मर्यादेयं सुरैः कृता ।

---

१. जलांत बुडी मारून तपश्चर्या करीत असतां. उदके वासः उदवासः. 'तेषवासवाहनधिषु च' ६।३।५८ या नियमानें 'उद' असा आदेश झाला. २. अपमान सहन न करणारा. ३. अक्षौहिणीसहस्राणि चत्वारि. ४. पृष्ठं गोपायति इति पृष्ठगोपः, पाठीराखा. ५. मम इह अद्य. ६. दैवात्=हठात्=जबरदस्तीनें. ७. करे जग्राह=हात धरला. ८. धर्मेण=संकेतधर्मेण. रंभेनें कुबेरपुत्र नलकूबर याच्याशीं रतिसंकेत केला होता यास्तव तुझी स्नुषा झाली असें तिनें उत्तर दिलें.

[1]पतिरप्सरसां नास्ति न चैकस्त्रीपरिग्रहः.' ॥ ३२६
इत्युक्त्वा तां स स्म **रा** र्तो बलाद्भुक्त्वा महाबलः ।
मुमोच सा पपातार्ता **न**लकूबरपादयोः. ॥ ३२७
श्रुत्वा तयोक्तं सोऽ **म** र्षादशपन्नलकूबरः, ।
'धर्षयिष्यत्यकामां चेत्कामार्तः परयोषितम्. ॥ ३२८
मत्तस्य मोहाद्र **ज** तो मार्गेणानेन दुर्मतेः ।
मूर्धा तु [2]सप्तधा तस्य [3]शकलीभविता ध्रुवम्.' ॥ ३२९
एवं **द**शास्यः स **य** दा शप्तस्तेन महात्मना ।
देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात खात्. ॥ ३३०
श्रुताच्छापात्सुघो **रा** त्स त्रस्तो रात्रिंचराधमः. ।
नारीषु मैथुनीभावं नाकामास्वभ्यरोचयत्. ॥ ३३१
ततः स जेतुम **म** रान्प्रययावमरावतीम् ।
विष्णोः समीपमागत्य सुदीनो **[4]जि**ष्णुरब्रवीत्. ॥ ३३२
विष्णो! **[5]नारायणा ज**! त्वमुपायं वद मे प्रभो! ।
वरदत्तो **द**शमुखः समरार्थं समागतः.' ॥ ३३३
तमाह [6]देवोऽति **य** शाश्चक्री **श**क्रं भयाकुलम्, ।
'परित्रासो न कर्तव्यः श्रूयतामिंद्र! मे वचः. ॥ ३३४
न नैष **रा**वणो **[7]जँ** य्यस्त्रिदशेंद्र! सुरासुरैः ।
[8]काल एनं हनिष्यामि नंदयिष्यामि वश्चिरम्. ॥ ३३५
देवैः सह स्वयं **य** त्तो भव युध्यस्व निर्भयः.' ।
इत्युक्तो **वि**ष्णुना **जि**ष्णुर्युयुधे रक्षसा समम्. ॥ ३३६
राक्षसा युधि शू **रा** स्ते सुराश्च सुमहाबलाः ।
चक्रुरत्यद्भुतं कर्म [9]प्राज्यनानोद्यतायुधाः. ॥ ३३७
सुमालिना ते स **म** रे हन्यमाना महौजसा ।
न व्यतिष्ठंत जलदा वातेनेव निपीडिताः. ॥ ३३८

१. अप्सरसां नियतः पतिर्नास्ति, सुराणामप्येकाप्सरःपरिग्रहो भार्यात्वेन नास्तीत्यर्थः. [सर्ग २६ श्लो० ४०.] २. सप्तधातुवशात् सप्तप्रकारेण. ३. शकल+अभूततद्भावे च्विः+भू=लुट् ता. [स० २६ श्लो० ५३-५६.] ४. शक्रः. ५. हे नारायण, हे अज. ६. देवः अतियशाः चक्री. ७. जेतुं शक्यः. 'क्षय्यजय्यौ शक्यार्थे' ६।१।८१. ८. काले=योग्यकाले. ९. पुष्कळ तऱ्हतऱ्हेचीं आयुधें हातांत तयार ठेविलीं आहेत.

रावणेन यथा **श्री** दः पूर्वं युद्धे निपातितः ।
तथैव मेघनादेन **जयंतः शक्रनंदनः**. ॥ ३३९

[1]दौहित्रो मूर्छितो **रा** जन्! [2]पुलोम्नाश्वपवाहितः ।
स तं [3]जयंतं संगृह्य प्रविष्टोऽब्धिं महासुरः. ॥ ३४०

कुंभकर्णोऽपि स **म** रं चकार परमाद्भुतम् ।
प्राप्ताः पराभवं देवाः सर्वे [4]तस्माद्यथांतकात्. ॥ ३४१

रावणो देवरा **ज** श्च चक्रतुस्तुमुलं रणम् ।
तत्र ये प्रेक्षकास्ते खे [5]चित्रतां भेजिरे क्षणम्. ॥ ३४२

शक्रः सुरानाह, **'य** न्मे रोचते शृणुतामराः! ।
अवध्योऽयं **द**शग्रीवो जीवन्नेव निगृह्यताम्. ॥ ३४३

त्रैलोक्यं भुज्यतेऽ **रा** तौ संनिरुद्धे [6]बलौ मया ।
एवमे[7]तस्य पापस्य निरोधो रोचते [8]मम.' ॥ ३४४

[9]मंत्रं कृत्वैवम **म** रैः सार्धं त्यक्त्वा **द**शाननम् ।
तं ग्रहीतुमना **राम**! सोऽकरोद्रक्षसां क्षयम्. ॥ ३४५

मेघनादस्तदा **ज** न्ये प्राप्तां पशुपतेर्वरात् ।
वि[10]तत्य तामसीं मायां **शक्रं** जग्राह मोहितम्. ॥ ३४६

स्वताताग्रहणे **य** त्तं गृहीत्वाजौ **शत**क्रतुम् ।
बद्ध्वा स्थाप्य स्वसेनायां स्वयं **रा**वणमब्रवीत्. ॥ ३४७

'तात! जातोऽद्य वि **ज** यो गृहीतो मघवा मया ।
विजितो मायया कामी [11]ना [12]य[13]थानघवामया.' ॥ ३४८

[14]रोमांचितोऽतिप्रि **य** वाक्श्रवणा**द्रा**वणस्तु तम् ।
सुतं धन्यस्त्वमित्याह मंत्रिबंदिशतैः स्तुतम्. ॥ ३४९

---

१. दुहितुः पुत्रः, नातु. २. पुलोम्ना आशु अपवाहितः=पुलोमजा शची तिच्या बापानें जयंताला जलदी एकीकडे नेऊन लपविला. पुलोम्ना=पुलोमन्+तृ०प्र०. ३. 'सतं जयं' ह्या छापील पुस्तकांतील अशुद्ध पाठाचे जागीं 'स तं जयंतं' असा पाठ घातला. जयंताबद्दल 'जय' शब्दाचा प्रयोग कोठें केला नाहीं व श्लोकपादांत एक अक्षर कमी पडतें. ४. तस्मात् यथा अंतकात्. ५. आकाशांत चित्राप्रमाणें ते क्षणभर निश्चल राहिले. ६. बलि दैत्य जो आमचा शत्रु त्याचा निरोध करून. ७. या निशाचराचा. ८. सर्ग २९ श्लो० १४ पहा. ९. मंत्र=मसलत. ['मंत्रो वेदविशेषे स्याद्देवतानां च साधने । गुह्यवादेऽपि च पुमान्' इति मेदिनीकारः.] १०. पसरून. ११. नरः, नृशब्दाचें प्रथमैकवचन ना. १२. इव. १३. निष्कलंक अशा सुंदरी-प्रमाणें. [वामा=सुंदरी.] १४. अति प्रिय असे शब्द ऐकल्यामुळें आनंदानें केंस उभे राहिले.

पुनराह सुरा **रा** तिः 'पृष्ठतस्त्वा[1]नुयाम्यहम्, ।
शतां[2]गमधिरोप्य त्वं नय **लं**कां **श**तक्रतुम्.' ॥ ३५०

नीते पुरीं शत **म** खे **घ**ननादेन तेज[3]सा ।
प्रजापतिं पुरस्कृत्य ययु**र्लं**कां सुरास्तदा. ॥ ३५१

आसाद्य **रा**क्षसं **श्री** मानब्रवीत्तं पितामहः, ।
'वत्स ! **रा**वण ! तुष्टोऽस्मि पुत्रस्य तव विक्रमात्.॥ ३५२

जितो यतो देव **रा** जो **मे**घनादेन संगरे ।
जगतींद्रजिदित्येवमेष ख्यातो भविष्यति. ॥ ३५३

उन्मुच्यतां शत **म** खो महाबाहो ! **द**शानन ! ।
किं चास्य मोक्षणार्थाय प्रयच्छंतु दिवौ[5]कसः' ॥ ३५४

अथाह तत्काय **ज** स्त**मिं**द्रजित्समितिंजयः, ।
'अमरत्वमहं **दे**व वृणे यद्येष मु[6]च्यते.' ॥ ३५५

ततोऽब्रवीद्भूरि **य** शा **मे**घनादं प्रजापतिः, ।
'नास्ति स[7]र्वामरत्वं हि प्राणिनः कस्यचिद्भुवि.' ॥ ३५६

स तमाह सुरा **रा** ध्यं, 'स्यंदनेऽग्नेः समुत्थिते ।
तिष्ठतोऽमरता मे स्याद्वर एष वृतो मया.' ॥ ३५७

'एवमस्त्वि'ति सा[8] **म** ज्ञस्तमुवाच प्रजापतिः ।
मुक्त**श्चें**द्रजिता **श**क्रः सुराश्च त्रिदिवं गताः. ॥ ३५८

दीनोऽभूद्देवरा **ज** स्तं **ब्र**ह्मोवाच, '**श**तक्रतो ! ।
अ[9]हल्याधर्षणस्यैतत्फलं प्राप्तं खलु त्वया. ॥ ३५९

प्रजानां प[10]रमं **य** त्तन्मया रूपं समुद्धृतम् ।
ततः स्त्री निर्मिता पूर्वं रत्नभूता जगत्त्रये. ॥ ३६०

हलं वैरूप्यमो **ज** स्विन्! हल्यं तत्प्रभवं तु यत् ।

---

१. त्वाम्. २. रथावर बसवून. ३. शौर्यानें. ४. सर्ग ३० श्लो० २-७ पहा. ५. दिवं ओको येषां ते. दिव शब्द अदंत ही आहे. देवाः. ६. प्राकृत मंत्ररामायण—उत्तरकांड—गीति १६४-१७१ पृ० १८२ पहा. [रामायणें—भाग १ काव्यसंग्रहग्रंथमाला.] ७. सर्वतो निमित्तात् सर्वस्मिन्नपि काले मरणराहित्यं मत्सृष्टप्राणिनां नास्ति. ८. साम (शत्रुवशीकरणोपायं) जानाति इति. ९. अहल्या शब्दाचें निर्वचन व तन्निर्माणकथा वा० रा० उत्तर० स० ३० श्लो० २१-२३. 'यद्यत्प्रजानां प्रत्यंगविशिष्टं तत्तदुद्धृतम् । ततो मया रूपगुणैरहल्या स्त्री विनिर्मिता। हलं नामेह वैरूप्यं हल्यं तत्प्रभवं भवेत् । यस्या न विद्यते हल्यं तेनाहल्येति विश्रुता ॥' तत्प्रभवं=वैरूप्यप्रभवम् हल्यं=निंद्यत्वम्. १०. उत्कृष्ट.

तन्निंद्यत्वं न यस्याः सा **नाम्नाहल्येति** कीर्तिता. ॥३६१

कस्य भार्या म[1]हा **य** स्य भ[2]वित्रीयं जगत्स्विति ।
मम चिंताभवद्रत्नभूतां निर्माय तां भृशम्. ॥ ३६२

[3]स्थानाधिकतया **रॆं[4]रा** मां त्वं जानीषे ममेति ताम् ।
गोतमे सा मया न्यस्ता [5]न्यासभूतावसच्चिरम्. ॥ ३६३

तेन प्रत्यर्[6]पिता **म** ह्यमविकारेण चेतसा ।
मुनेर्ज्ञात्वा महाधैर्यं तस्मै सा [7]स्पर्शिता मया. ॥ ३६४

सा त्वया धर्षिता **श्री** मन्! कामार्तेन समन्युना ।
दृष्टस्त्वं **गो**तमेनासि शप्तश्चात्युग्रतेजसा. ॥ ३६५

धर्षणान्मम दा **रा** णां शत्रुहस्तं [8]गमिष्यसि ।
गोतमेनैवमुक्तस्त्वं तस्यैतत्फलमागतम्. ॥ ३६६

अहल्यां चार्ध्यति **म** हा **गो**तमः स तदाब्रवीत् ।
दुर्विनीतेऽधुना ध्वंस ममाश्रमसमीपतः. ॥ ३६७

यस्मात्सु[9]रूपता **ज** न्याद्गर्वात्त्वमम[10]नवस्थिता ।
तस्माद्रूपवती लोके न त्वमेका भविष्यसि. ॥ ३६८

इत्युक्ता सा विन[11] **य** तः प्रांजलिर्मुनिमब्रवीत्, ।
'वंचितास्मि मुने! तेन त्व[12]द्रूपेण दिवौकसा. ॥ ३६९

नाहं दुष्टा तपो **रा** शे! प्रसादं कर्तुमर्हसि.' ।
तथैवं प्रार्थितः शांतक्रोधस्तामाह **गो**तमः. ॥ ३७०

'उत्पत्स्यतेऽद्भुत[13] **म** हा इक्ष्वाकूणां महारथः ।
आतिथ्यं तस्य कृत्वा त्वं पूता मां पुनराप्स्यसि.' ॥३७१

स्मर तद्देवरा **ज** त्वं दुष्कृतं यत्त्वया कृतम् ।

---

१. महान् अयः (प्राक्तनं शुभकर्म) यस्य तस्य महाभागस्य, एति सुखमनेन इति अयः. हा पुंलिंग अकारांत शब्द आहे. २. भवित्री इयम्. ३. देवाधिपतित्वरूपाधिकस्थानप्राप्त्या हेतुना विनापि मदनुमतिं ममैषा पत्नीति जानीषे. ४. तां लावण्यवतीम् अहल्याम्. ५. न्यासभूता अवसत् चिरम्. ६. दत्ता अर्पिता. ७. वा० रा० बालकांड स० ४८ श्लोक २७ 'मम रूपं समास्थाय कृतवानसि दुर्मते । अकर्तव्यमिदं यस्मात् विफलस्त्वं भविष्यसि ॥' या स्थलीं 'शत्रुहस्तं गमिष्यसि' असा शाप सांगितला नाहीं. तथापि सतीच्या धर्षणामुळें अशी फजिती झाली असें म्हणण्यास प्रत्यवाय नाहीं. ८. अति (अतिशयितं) महो (तेजः) यस्य सः. अतिमहाः, महातेजाः. ९. सु (सुष्ठु, शोभनं) रूपं यस्याः सा सुरूपा, तस्याः भावः सुरूपता, तस्याः जन्यात् (जायमानात्) जन्य=जन्+कर्तरि यत्. १०. चंचलचित्ता. ११. विनयेन. १२. तव इव रूपं यस्य तेन. १३. अद्भुतं महो (तेजः) यस्य सः.

शापोत्सर्गाद्धि तस्येदं मुनेः सर्वमुपस्थितम्. ॥ ३७२
तच्छीघ्रं **वैष्णवं** **य** ज्ञं कुरु **शक्र**! यथाविधि ।
पावितः क्रतुना तेन प्राप्स्यसि त्रिदिवं पुनः[1]. ॥ ३७३
[2]प्रहारार्तस्तनू **ज** स्ते **पुलोम्ना**श्वपवाहितः ।
नीतः समुद्रे कुशली स [3]त्वागंताचिराद्धरे. ॥ ३७४
